थी इसलिये उसने उस दासीको वो फल दिया दासीने मनमें विचार किया ये अमरफल खायके अमर होनेसें अपना दासीपणा तो मीटेगा नहिं तो ये नीच दासीपणासें मरना ही ठीक है ऐसा विचार कर उस फलको कोई सत्पात्र ब्राह्मणको अर्पण करना जिससे पुण्यप्राप्ति होगी ऐसा सोचकर वो फल लेकर उस देवशर्मा ब्राह्मणके घर आकर पूछा तो वो घरमें नहिं था. पीछे उस दासीने उस फलको देवशर्माके स्त्रीके स्वाधीन किया और घर गई, थोडे समयमे ब्राह्मण घरमें आया और देखा तो जो अमरफल अपने राजाके स्वाधीन किया वो अपने घरमें फिर किस तरह सें आपहुंचा ऐसा विचारके ब्राह्मण राजसभामें जापहुंचा और राजाकूं पूछा राजा फल सेवन किया ? तब राजाको फलका स्मरण हुवा और जनानामे जाकर स्त्रीकूं पूछा तो वो चुप होगई फिर राजाने अतिकोपायमान होकर इसका तलास करनेसे सब हाल मालुम होगये तब राजाने स्त्री इत्यादि उन सबका तिरस्कार किया और वैराग्यका स्वीकार करके राज्यका त्याग कर अरण्यमें चलागया. उस समयका ' यां चिन्तयामि ' ये श्लोक है. राजा नीतिमे निपुण और शृंगार रसास्वादनमें परम निष्णात होनेसें नीति और शृंगार शतक तो राज्यत्यागके प्रथम किये होने चाहिये, और पीछेसें बैराग्य होनेसें वैराग्यशतक बनाया ऐसा मालुम होताहै. राजाकी कवित्व शक्तिभी बहोत उत्तमहै. इसके बनायेहुए औरभी एक दो ग्रंथ हैं परंतु उपलब्ध नहिं हैं. इस ग्रंथमें जो शृंगारशतक किया है सो लोकोंको विषयजालमें फसानेकेलिये नहिं है परंतु शृंगारका स्वरूपाविष्करण किया है जिससें इनमें कोई नहिं आफसें. इस ग्रंथके पाठभेद अनेक हैं परंतु इस पुस्तकमे जो उचित वोही पाठ लिये हैं. और मूलमें संस्कृतटीका नहिं होनेके कारण विद्वान् पण्डितद्वारा नूतन संस्कृतटीका तथा उसकेही आधारसें भाषाटीका तथा कवित्त लिखकर इनतीनोंका संग्रह इस पुस्तकमें किया है. और सुगमताके लिये अन्वयके अंकभी श्लोकके ऊपर डाल दिये हैं ! पहिले दो चार दफे ये ग्रंथ छप चुकाहै परन्तु उनमें कितनेक ठिकानेपर अशुद्धता रहनेसें और ग्रंथ संग्रहणीय होनेकेखातर और कितनेक लोकोंकी सूचना होनेसे ये सब टीका नवीन बनवाकर ये पुस्तक छपवायाहै. इस समय ग्रंथकी शुद्धताके ऊपर विशेष ध्यान देनेमें आयाहै जो देखनेसेही मालुम होगा. आप उदार महाशय इस ग्रंथका संग्रह करके हमारे इस प्रयत्नको उदार अन्तःकरणपूर्वक आश्रय देंगे और ऐसेही कितनेक नूतन ग्रंथ छापनेमें पांडितजी श्रीकृष्णलालजीको उत्साहित करेंगे और इसमें जो दोष रहेहों उनका त्याग कर गुणोंकाही ग्रहण करेंगे ऐसी बिनंति करके ये बहोत लंबाहुवा प्रार्थना लेख पूराकरताहूं ॥

आपका नम्रतम,

सीतारामशर्म्मा.

श्रीः

श्रीहरिर्वन्दे ।

श्रीवृन्दावनविहारिणेनमः ।

अथ

भर्तृहरिकृतशतकत्रयम् ।

तत्र

प्रथमं नीतिशतकं प्रारभ्यते ।

॥ मङ्गलाचरणम् ॥

दिक्कालाद्यनवच्छिन्नानन्तचिन्मात्रमूर्तये[1] ॥

स्वानुभूत्येकसाराय[2] नमः[5] शान्ताय[3] तेजसे[4] ॥ १ ॥

संस्कृत टीका—विघ्नेशं विघ्नहर्तारं गणराजं नमाम्यहम् । शारदां वरदां नौमि बुद्धि-
जाड्यापनुत्तये ॥ १ ॥ श्री गोपालं नमस्कृत्य नत्वा गुरुपरंपराम् । नीत्यादिशतकानां च व्याख्यां
कुर्वे सुबोधिनीम् । ग्रन्थादौ ग्रन्थमध्ये ग्रथान्ते च मङ्गलाचरणं कर्तव्यमितिशिष्टाचारोऽस्ति, अतो
ग्रन्थस्य निर्विघ्नपरिसमाप्तये ग्रन्थकर्त्रा नमनात्मकं मङ्गलं कृतम् । दिगिति । दशादिक्षु तथा भूत
भविष्यद्वर्तमान् त्रिकालेष्वनवच्छिन्ना व्याप्ता अतएव अनन्ता नास्त्यन्तो यस्याः साचिन्मात्रा चिद्रूपा
मूर्तिः स्वरूपं यस्य तस्मै, तथा स्वानुभूतिः स्वस्यानुभवः स एव सारांशो यस्य तस्मै तेजसे
प्रकाशरूपाय शान्ताय शान्तस्वरूपाय ब्रह्मणे नमः ॥ अनुष्टुप् वृत्तमिदम् ॥ १ ॥

भाषा टीका—दशोदिशा और त्रिकाल आदिमें परिपूर्ण अनन्त चैतन्य
मूर्ति और केवल अपने अनुभवसे ज्ञातव्य शान्त और तेजोमय ईश्वरको नमस्कार है ॥ १ ॥

सोरठा—सर्वदिशा सर्व काल, पूरि रह्यौ चैतन्य घन ।

सदा एकरस चाल, वन्दन वा परब्रह्मकौ ॥ १

यां चिन्तयामि सततं मयि सा विरक्ता।
साप्यन्यमिच्छति जनं स जनोऽन्यसक्तः॥
अस्मत्कृते च परितुष्यति काचिदन्या।
धिक्तां च तं च मदनं च इमां च मां च॥२॥

संस्कृत टीका—प्रयोजनं विना मन्दोऽपि न प्रवर्त्तते। एवं नीतिर्वर्तते तर्हि केन कारणेन ग्रन्थः कृतस्तत् कारणं येन वैराग्योत्पत्तिस्तल्लिखति। राज्ञाविक्रमशकेन स्वलब्धं फलं कस्मैचिद्ब्राह्मणाय दत्तं तस्य फलस्य महिमा येन भक्षितं सोऽमरो भवति तस्य मरणं नास्ति, ब्राह्मणेन तत्फलं बहूनाम् पालकाय राज्ञे भर्तृहरयेदत्तं, तेन भर्तृहरिणा स्वपत्न्यै दत्तं, अन्यपुरुषासक्ता साऽन्यस्मै दत्तवती, सजारोऽपि स्वप्रिया कांचन पुंश्चली तस्यै दत्तवान्, सा पुंश्चली तद्राज्ञे दत्तवती राजा तावत्पूर्वापर समस्तवृत्तान्तं ज्ञात्वा पश्चात् वैराग्येणात्मसहितान् भार्यादीन् निन्दति। यामिति। अहं यां स्त्रि सततं हृदि चिन्तयामि प्राणादधिकां मन्ये साऽपि मयि विरक्ताऽस्ति। सा स्त्रीअन्यं जनं जारपुरु प्रियतममिच्छति। स जनोऽप्यन्यां पुंश्चलीं प्रियत्वेनेच्छति सा काचिदन्या चास्मदर्थे परितुष्यति सन्तोषं प्राप्नोति। एवं न कश्चित् कस्यचित् प्रियः। अतोऽस्मत्कृते परितुष्यति तां पुंश्चलींधिक् तं जारपुरुषमपिधिक् इमां मदीयां स्त्रियं धिक्, अहमपि एतादृशोमूर्खः मां च धिक्। सर्वमिद मदनकृतमतो तं मदनं च धिगित्यर्थः॥ २॥

भाषा टीका—किसी समय एक ब्राह्मणको अमृतफल मिला तब उसने विचारा कि यह फल किसको देना योग्य है, सोचते २ उसको ध्यान आया कि यह राजा भर्तृहरिको देना चाहिये. क्योंकि वह बड़ा धर्मज्ञ और प्रजापालक है, यह सोच उसने वह फल राजाको दे दिया, राजाने उसे अपनी प्राणप्रिया स्त्रीको दिया, उस रानीने वह फल अपने मित्रको दिया, उस जारपुरुषने वह फल किसी वेश्याके लिये देदिया, और उस वेश्याने धनके लोभसे वह फल राजाको फिर दिया, उस फलको देखकर राजाको बड़ा सोच हुआ, और उसके समस्त वृत्तान्तको जानना चाहा, प्रयत्न करनेसे उसको सब वृतान्त ज्ञात हो गया, तब तो उसको एकदमसे वैराग्य उत्पन्न हुआ, और कहने लगा। (श्लोकार्थ) जिस प्रियतमाको मैं निरन्तर प्राणसे भी अधिक प्रिय मानता हूं वह मुझसे विरक्त होकर अन्य पुरुषकी इच्छा करती है, और वह, अन्य पुरुष दूसरी स्त्रीपर आसक्त है, और वह अन्य स्त्री मुझसे प्रसन्न है इसलिये मेरी प्रियाको जो अन्य पुरुषसे प्रीति रखती है धिक्कार है, उस अन्यको जो (ऐसी रानी पाकर) अन्य स्त्रीपर आसक्त है धिक्कारहै इस अन्य स्त्रीको जो मुझसे प्रसन्न है धिक्कार है तथा मुझको और इस कामदेवको भी धिक्कार है॥ २॥

छप्पय—जाकी मेरे चाह वहै मोसों विरक्त मन । और पुरुषसों प्रीति पुरुष वह चहत और धन । मेरे कृतपर रीझ रही कोऊ इक औरही । यह विचित्र गति देख चित्र ज्यों तजत न ठौरही । सब भांति राजपत्नी सुधिक् जारपुरुषकों परमधिक् । धिक् काम याहिधिक् मोहिधिक् अब व्रजनिधिकी शरण इक ॥ २ ॥

अज्ञः सुखमाराध्यः सुखतरमाराध्यते विशेषज्ञः ॥
ज्ञानलवदुर्विदग्धं ब्रह्मापि च तं नरं नरंजयति ॥ ३ ॥

संस्कृत टीका—एवं ज्ञाते सति स्वास्मिन् मूर्खत्वं ज्ञातमतो मूर्खलक्षणानि वदति । अज्ञ इति । यः केवलं न जानाति सोऽज्ञः मूर्ख इत्यर्थः स तु शिष्टेन युक्तायुक्तमुक्तम् तच्छृणोति तथैव करोति, अतः सुखेन आराधितुं वशीकर्तुम् शक्यः । यस्तुविशेषं युक्तायुक्तं जानाति स विशेषज्ञः । कदाचित् प्रमादादयुक्ते कर्मणि प्रवृत्तः सन्नपरेण निवारितश्चेच्छृणोति सच सुखतरमतिसुखेनाराध्यते । परन्तु उभयोर्विलक्षणोऽज्ञो न भवति पूर्णज्ञाताऽपि न भवति शास्त्रेष्वपि प्रवृत्तिर्नभवति बहुश्रुत-तया स्वस्मिन् पण्डितंमन्यतया परस्य वचनमपि न स्वीकरोति किञ्चित् ज्ञानलवेन दुर्विदग्धोगर्वितस्तं वशीकर्त्तुम् चतुर्मुखोब्रह्माऽपि न शक्तः तर्हि इतरेषां काकथा । आर्यावृत्तमिदम् ॥ ३ ॥

भाषा टीका—मूर्खका प्रसन्न करना सहज है, ज्ञानीका प्रसन्न करना उससे भी सहज है, परन्तु जो पुरुष अल्पज्ञानके मदसे भरे हैं उनको ब्रह्माभी प्रसन्न नहीं करसक्के ॥ ३ ॥

दोहा—सुखकर मूढ रिझाइये, अति सुख पण्डित लोग ।
अर्द्धदग्ध जड जीवकों विधिहुन रिझवन जोग॥ ३ ॥

प्रसह्य मणिमुद्धरेन्मकरवक्त्रदंष्ट्रांकुरात् ।
समुद्रमपि संतरेत्प्रचलदूर्मिमालाकुलम् ॥
भुजङ्गमपि कोपितं शिरसि पुष्पवद्धारयेत् ।
न तु प्रतिनिविष्टमूर्खजनचित्तमाराधयेत् ॥ ४ ॥

सं० टी० इदानीम् श्लोकद्वयेन मूर्खजनानाम् चित्तस्याराधनाभावं सदृष्टान्तं वर्ण्यते । प्रसह्येति । मकरो नामजलचरविशेषस्तस्य वक्त्रे दंष्ट्रांकुरस्तस्मिन्नुप्तमणिः समणिः प्रसह्य बलात्कारेण नि

ष्कासितुं शक्यो भवेत् । मकरमुखे मणेरभावो वर्तते किन्तु महताप्रयत्नेन सोऽपिसाध्योभविष्यति । तथा च प्रचलन्तीनामूर्मीणां लहरीणां मालाः समुदायास्ताभिराकुलं समुद्रमपि बाहुभ्यां सन्तरेत् । बाहुभ्यां समुद्रतरणमसम्भवमस्ति किन्तु उपायेन तदपि सुगमम्भवति । तथा च कोपितं भुजङ्गं सर्पं शिरसि पुष्पवद्धारयेत् । एते अघटिताः दृष्टान्ताः कालेन भविष्यन्ति परन्तु प्रतिनिविष्ट आविष्टचित्तः तस्य मूर्ख जनस्य चित्तं न आराधयेत्, आराधितुं न शक्य इत्यर्थः । पृथ्वीवृत्तम् ॥४॥

भा० टी०—मगर की डाढोंमें से मणिका निकालना सहज है, प्रचण्ड लहरों के आवेगसे चञ्चल समुद्र को तैरकर पार करना सहज है, कोपसे भरे सर्पको शिरपर पुष्पके समान धारण करलेनाभी सहज है किन्तु मूर्खका मन जिस वस्तु पर जम गया है उससे हटाना कठिन है ॥ ४ ॥

लभेत[6] सिकतासु तैल[4]मपि[5] यत्नतः[2] पीडयन्[3] ।
पि[11]बेच्च मृगतृष्णिकासु[9] सलिलं[10] पिपासार्दितः[8] ॥
कदा[12]चिदपि[15] पर्यटञ्छशविषाणमासादयेत्[13][14][16] ।
न[19] तु[17] प्रतिनिविष्टमूर्खजनचित्तमाराधयेत्[18][20] ॥ ५

सं० टी०—लभेतेति । सिकतासु वालुकासु, तैलं यत्नत प्रयासेन पीडयन् सन् कदाचिल्लभेत । तथाच पिपासार्दितः तृषार्तःसन् मृगतृष्णिकासु सलिलमुदकं कदाचित् पिबेत् । कदाचित् पृथ्वीं पर्यटन्सन् शशस्य विषाणं शृंगम् प्राप्नुयात् । एवमघटितघटनम् भविष्यति किन्तु प्रतिनिविष्टमूर्खजनस्य चित्तं न आराधयेत् ॥ ५ ॥ छन्दःपूर्वोक्तम् ।

भा० टी०—यत्नपूर्वक पेलनेसे रेतमें से तैल निकालना सम्भव है, मृगतृष्णासे प्यासेकी प्यास बुझाना सम्भव है. ढूंढनेसे खरगोशका सींग भी मिलसक्ता है परन्तु मूर्खका मन जिस वस्तुकी ओर झुक गया है उससे हटाना सम्भव नहीं है ॥ ५ ॥

छप्पय—निकसत वारू तेल जतनकर काढत कोऊ । मृगतृष्णाकौ नीरपियै प्यासौ है सोऊ। लहत शशाको शृंग ग्राह मुखतें मणि काढत । होत जलधिके पार लहर वाकी जब वाढत रिसभरे सरपकौ पहुप ज्यों अपने सिर पै धर सकत । हठभरे महासठ नरनकों कोऊ वसनहिं कर सकत ॥४॥५॥

व्यालं[2] बालमृणाल[3]तन्तुभिरसौ[1] रोद्धुं[4] समुज्जृम्भते[5]।
छेत्तुं[8] वज्र[7]मणीञ्छिरीषकुसुम[6]प्रान्तेन सन्नह्यते[9] ॥
माधुर्यं[12] मधुबिन्दुना[11] रचयितुं[13] क्षाराम्बुधे[10]रीहते[14]।
नेतुं[21] वाञ्छति[22] यः[15] खलान्[16] पथि[18] सतां[19] सूक्तैः[20] सुधास्यंदिभिः[19] ॥६॥

सं० टी०—मूर्खजनानां सन्मार्गे प्रवेशोऽति दुर्लभ इत्याह । व्यालमिति । असौ व्यालं गजं बालमृणालतन्तुभिः कोमलकमलतन्तुभीरोद्धुमवरोद्धुं वाञ्छति । तथाच वज्रमणीन् हीरकमणीन् शिरीषकुसुमप्रान्तेन शिरीषपुष्पाग्रेण छेत्तुं सच्छिद्रीकर्तुं सन्नह्यतवुद्युक्तो भवति । तथा च क्षाराम्बुधेः क्षारसमुद्रस्य मधुबिन्दुना माधुर्यं रचयितुं कर्त्तुमीहते चेष्टते, यः खलान् दुर्जनान् सतां पथि सुधास्यन्दिभिरमृततुल्यैः सूक्तैर्वाग्भिर्नेतुं वाञ्छति ॥ शार्दूलविक्रीडितवृत्तमिदम् ॥ ६ ॥

भा० टी०—वह मनुष्य कमल की कोमल डंडीसे हाथीको बांधना चाहता है, शिरीष के फूलकी पंखुरीसे हीरेको वेधना चाहता है, और मधु की एक बून्दसे खारे समुद्रको मीठा करना चाहता है, जो खलोंको अपने अमृततुल्य वाक्योंसे सत् मार्ग में लाने की इच्छा करता है ॥ ६ ॥

छन्द—कमल तन्तुसों बांधि गजहिं वसकरन उमाहत। सिरस पुहुपके तार वज्रकों वेध्यो चाहत॥ बूंद सहतकी डार उदधि को खार मिटावत। तैसेही हित बैन खलनके मनहिं रिझावत ॥ ६॥

स्वायत्त[3]मेकान्तगुणं[4] विधात्रा, विनिर्मितं[6] छादन[5]मज्ञतायाः[2] ॥
विशेषतः सर्वविदां समाजे, विभूषणं[12] मौन[11]मपण्डितानाम्[10]॥७॥

सं० टी०—अधुना मूर्खस्य मूर्खतायाः छादनोपायमाह । स्वायत्तमिति । अज्ञतायाः मौर्ख्यस्य छादनमाच्छादनं मौनं विधात्रा ब्रह्मणा विनिर्मितमुत्पादितं । कथंभूतं मौनं स्वायत्तं स्वाधीनं, पुनः कथंभूतं, एकान्ताः गुणाः । उत्कर्षाः यस्मिंस्तत् एकान्तगुणं । तन्मौनं विशेषतः विशेषेण सर्वविदां सर्वज्ञानिनां समाजे समूहे अपण्डितानां मूर्खाणां विभूषणं भवति । इह मूर्खस्य अज्ञताच्छादने केवलं मौनमेव उपायोऽस्तीति भावः । वृत्तमिन्द्रवज्रा ॥ १ ॥

भा० टी०—विधाताने मौन अर्थात् चुप रहनाही अज्ञानता का ढकना बनाया है, यह मनुष्यके आधीन है तथा इसमें औरभी अनेक गुण हैं । यही ज्ञानियोंकी सभामें अज्ञानियोंका आभूषण है ॥ ७ ॥

दोहा—सज्जन मन वशकरनकों रच्यौविधाता मौन ।
कूरनहूको आभरन मौन महासुख भौन ॥ ७ ॥

यदा किञ्चिज्ज्ञोऽहं द्विप इव मदान्धः समभवम् ।
तदा सर्वज्ञोऽस्मीत्यभवदवलिप्तं मम मनः ॥
यदा किञ्चित्किञ्चिद्बुधजनसकाशादवगतम् ।
तदा मूर्खोऽस्मीति ज्वर इव मदो मे व्यपगतः ॥८॥

सं० टी०—यदेति । यदा यस्मिन् काले किंचिज्ज्ञोऽहं तदा द्वाभ्यां शुण्डतुण्डाभ्यां पिव-तीतिद्विपोगजः । स इव मदेन अंधइति मदांधः समभवं जातः, तदा तस्मिन् काले अहं सर्वज्ञोऽस्मीति ममनोऽवलिप्तं गर्विष्टमभवत् । तदुपरि यदा बुधजनस्य पण्डितजनस्य सकाशात् संसर्गात् किंचित् किंचित् ज्ञानं अवगतं प्राप्तं तदा अहम् मूर्खोऽस्मीति ज्ञातम् पूर्वं यो मे मम मदः गर्वोऽभवत् सोऽपि ज्वर इव व्यपगतः । शिखरिणी वृत्तमिदम् ॥ ८ ॥

भा० टी०—जब मुझको थोडासा ज्ञान हुआ तब मैं हाथी की तरह मदसे अंधा होगया, और यह समझनें लगा कि ज्ञानमें मुझसे कोई अधिक नहीं है परन्तु जब विद्वानों की संगतिसे मुझको कुछ अधिक ज्ञान प्राप्त हुआ तब मुझको ज्ञात होगया कि मैं मूर्ख हूं और मेरा मदज्वर के समान उतर गया ॥ ८ ॥

छप्पय—जब हों समझों नैक तबहि सर्वज्ञ भयौ हौ । जैसे गज मदमत्त अंधता छाय गयौ हौ ॥ जब सतसंगतिपाय कछुकहों समझन लाग्यौ । तबहि भयौ अति मूढ गर्वगुणकौ सब भाग्यौ ॥ ज्वर चढतचढत अतिताप ज्यों उतरत सीतल होत तन । त्यौंही मनकौ मद उतरिगौ लियौ शील सन्तोषपन ॥ ८ ॥

कृमिकुलचितं लालाक्लिन्नं विगन्धि जुगुप्सितम् ।
निरुपमरसं प्रीत्या खादन्नरास्थि निरामिषम् ॥
सुरपतिमपि श्वा पार्श्वस्थं विलोक्य न शङ्कते ।
नहि गणयति क्षुद्रो जन्तुः परिग्रहफल्गुताम् ॥ ९ ॥

सं० टी०—इदानीं क्षुद्रविषये लिप्तं जनं श्वदृष्टान्तेन निन्दति । कृमिकुलेति । यथा कृमिकुलैश्चितं व्याप्तं लालया क्लिन्नमार्द्रं विगन्धि अपवित्रमतएव जुगुप्सितं निन्द्यं, निर्गता उपमा यस्य

एतादृशो यो रसः तं निरामिषं मांसरहितं नरास्थि प्रीत्या खादन् श्वा पार्श्वस्थं समीपस्थमपि सुरपतिमिन्द्रम् विलोक्य न शंकते तथा क्षुद्रः नीचो जन्तुः प्राणी, परिग्रहस्य फल्गुतां निःसारतां नगणयति न मनुते। हरिणीवृत्तमिदम् ॥ ९ ॥

भा० टी०—जैसे कुत्ता कीडों के समूहसे भरी हुई, लारसे भीगीहुई, दुर्गन्धयुक्त, निन्दित, निरस, और मांसरहित हड्डी को प्रीतिसे खातेसमय पास खडे हुए इन्द्रको भी देखकर शंका नहीं करता है वैसेही क्षुद्र जीव जिस पदार्थ को ग्रहण करलेताहै उसकी निःसारता पर ध्यान नहीं देता अर्थात् उसको श्रेष्ठ ही समझता है ॥ ९ ॥

कुण्डलिया—कूकर सिर कीरापरै गिरै वदन तें लार। बुरौ वास विकरालतन बुरौ हाल वीमार ॥ बुरौ हाल बीमार हाड सूखेकों चावत। सुरपति हूं की शंक नैक हूं करत नसावत ॥निठुर महा मन मांहि देख घुरांवत कूकर। तैसेही नर नीच निलज डोलै ज्यों कूकर ॥ ९ ॥

शिरः शार्वं स्वर्गात्पतति शिरसस्तत्क्षितिधरम्।
महीध्रादुत्तुङ्गादवनिमवनेश्चापि जलधिम् ॥
अधो गङ्गा सेयं पदमुपगता स्तोकमथवा।
विवेकभ्रष्टानां भवति विनिपातः शतमुखः ॥ १० ॥

सं० टी०—यः पुरुष उत्तमपदाद्भ्रष्टः सन् अधः पतति स पुनः उच्चपदम् न प्राप्नोतीति गङ्गादृष्टान्तेन द्योतयति। शिर इति। स्वर्गात् गङ्गा विष्णुपादोदकमादौ शार्वंशार्वो महादेवस्तस्येदं शार्वं शिरो मस्तकं पतति, तत् पश्चात् शिरसः क्षितिधरं हिमालयपर्वतं पतति, उत्तुङ्गात् महीं धारयतीति महीध्रः पर्वतस्तस्मात् अवनिं पृथ्वीं पतति, अवनेश्चापि जलधिं समुद्रं पतति, एवमियंगङ्गा अधोधः स्तोकमल्पं पदं स्थानं उपगता प्राप्ता। अथवा विवेकभ्रष्टानां विचारहीनानां शतमनेकानि मुखानि वदनानि यस्य तादृशो विनिपातोऽधःपतनं गङ्गाजलवद्भवतीत्यर्थः। विवेकशून्याः पुरुषाः सर्वदा नीचं पदं प्राप्नुवन्ति, तेषां नान्यागतिरिति भावः। शिखरिणीवृत्तमिदम् ॥ १० ॥

भा०टी० यह गङ्गा प्रथम स्वर्गसे शिवजीके मस्तकपर गिरी, फिर वहांसे ऊंचे पर्वतपर, और पर्वतसे पृथ्वीपर, और पृथ्वीसे समुद्रमें, इस भांति क्रमसे

नीचेही गिरती गई, इसी तरह जिन पुरुषों को किसी प्रकारका ज्ञान नहीं रहा, वे सर्वदासे सौ सौ प्रकारसे नीचेही गिरते जाते हैं ॥ १० ॥

दोहा--ईशशीश तजि स्वर्ग तजि गिरवर तजे उतङ्ग ।
अवनी तजि जलधिहि मिली पदसोंपर मुख गङ्ग ॥१०॥

शक्यो वारयितुं जलेन हुतभुक् छत्रेण सूर्यातपो ।
नागेन्द्रो निशितांकुशेन समदो दण्डेन गोगर्दभौ ॥
व्याधिर्भेषजसङ्ग्रहैश्च विविधैर्मन्त्रप्रयोगैर्विषम् ।
सर्वस्यौषधमस्ति शास्त्रविहितं मूर्खस्य नास्त्यौषधम् ॥११॥

सं० टी० सर्वरोग निरसनोपायो लोक शास्त्रेच विहितः किन्तु मूर्खस्य मूर्खत्वनाशकोपायः कुत्रापि नास्ति इत्याह। शक्य इति " हुतं भुंक्ते " इति हुतभुगग्निः जलेन वारिणा वारयितं शक्यः। तथा " सूर्यातपं उष्णत्वं छत्रेण वारयितुं शक्यः । तथा मदेनसह " समदो नागेन्द्र गजराजः निशितेन तीक्ष्णेनाङ्कुशेन वारयितुं शक्यः । तथा गौश्च गर्दभश्च तौ गोगर्दभौ दण्डेन तथा व्याधि, भेषजस्यौषधस्य संग्रहैः सेवनैः । तथाच विषं विविधैर्मंत्रप्रयोगैः वारयितुं शक्यं एवं सर्वस्य शास्त्रविहितमौषधमस्ति परंतु मूर्खस्य मूर्खत्वनिरसनरूपमौषधं कुत्रापि नास्तीति शार्दूलविक्रीडितं वृत्तमदिम् ॥ ११ ॥

भा० टी० जलसे अग्निका रोकनासम्भव है, छत्रीसे धूपका निवारण करन सम्भव है, मतवाला हाथी भी अंकुशसे वशमें हो सक्ता है, गौ गर्दभ आदि चौपायें को दंड देकर वशमें कर सक्ते हैं, रोगको विविध प्रकारकी औषधोंसे दूर करन सम्भव है और मंत्रद्वारा विष उतर जाता है इस प्रकार पृथ्वीपर सब वस्तुओं की शास्त्रोक्त औषधि हैं. परन्तु मूर्खताकी कोई औषधि नहीं है. ॥ ११ ॥

छप्पय-मिटै छत्रसों धूप और जलअग्नि बुझावै ॥ तीखे अंकुश मार मत्त गजवसमें लावै ॥ दंड दिये तें दुष्ट बैल अरु गदहा सूरन्त ॥ औषधि विविध प्रदान व्याधि खोवै चित तू रख ॥ लिखे अनेकन मंत्र हरहिं विषताहु सबनकी ॥ पै नहिं औषध एक मूर्खता दहै कुजनकी ॥ ११ ॥

**साहित्यसंगीतकलाविहीनः साक्षात्पशुः पुच्छविषाणहीनः ॥
तृणं न खादन्नपि जीवमानस्तद्भागधेयं परमं पशूनाम् ॥१२॥**

सं० टी०—साहित्यसंगीतकलाविहीनः पुरुषः साक्षात् पशुरित्याह । साहित्येति । साहित्यं काव्यालंकारादि । संगीतं गानादि । कलाः शिल्पादयः । एतैर्यो विहीनःस साहित्यसंगीतकलाविहीनः एतादृशः पुरुषः पुच्छञ्चविषाणञ्च पुच्छविषाणे ताभ्यां हीनो रहितः साक्षात पशुरेव । तृणभक्षणं पशूनां धर्मस्तर्हि कुतो नायं खादतीत्याह । तृणमिति । तृणं न खादन्भक्षयन्नपि जीवमान इदं तु इतरपशूनां परममुत्कृष्टं भागधेयमदृष्टं मनुष्यमात्रेण धर्मशास्त्रमवश्यमाकलनीयमिति भावः । उपजातिवृत्तमिदम् ॥ १२ ॥

भा० टी०—जिस मनुष्यने साहित्य और संगीतशास्त्र नहीं सीखा वह विना पूंछ और सींगका साक्षात् पशु है, तृण खाये विनाही जीता है यह उस पशुका परम भाग्य है ॥ १२ ॥

कुंडलिया—गीत और साहित्यमें जो न लहै कछुभेद ॥ ताहि देखके होत है मेरे चित अतिखेद ॥ मेरे चित अतिखेद देखकर वाकी सूरत ॥ सींगपूंछ विन फिरै मत्तपशुकीसी मूरत ॥ बिना घास जीवत वहै यही कुटिल है नीत ॥ ऐसे नरसें और पशु हैं उत्तम अनुरीत ॥ १२ ॥

**येषां न विद्या न तपो न दानं ।
ज्ञानं न शीलं न गुणो न धर्मः ॥
ते मर्त्यलोके भुवि भारभूता ।
मनुष्यरूपेण मृगाश्चरन्ति ॥ १३ ॥**

सं० टी०—विद्यादिधर्महीना नरा मनुष्यरूपेण मृगा इव भूमौ विचरन्ति, इत्याह । येषामिति । येषां विद्या व्याकरणन्यायादिर्न, तपो व्रतोपासादि न, दानं न, ज्ञानं न, शीलं सद्वृत्तं न " शीलं स्वभावे सद्वृत्ते " इत्यमरः । (सत्यादिः) गुणो न, धर्मो न, एवंभूता ये मनुष्यास्तेऽस्मिन् मर्त्यलोके भुवि भारभूताः सन्तो मनुष्यरूपेण मृगाः पशव इव " मृगः पशौ कुरंगे " इति मेदनी । चरन्ति विचरन्ति । विद्यादिसदाचरणहीनाः पुरुषाः पशुसदृशा इति भावः । पशुत्वनिरसनार्थं विद्या अवश्यमेव पठनीया ! उपजातिवृत्तमिदम् ॥ १३ ॥

भा० टी०—जिन मनुष्योंको न विद्या है, न तप है, न दान है, न ज्ञान है, और न जिनमें शील, गुण और धर्म है, वे इस पृथ्वीपर भाररूप हैं, वे मनुष्यरूप धारणकर पशुके समान विचरतेहैं ॥ १३ ॥

दोहा—विद्यादान न ज्ञान तप शीलधर्म गुणहीन ॥
विचरहिं महि नररूप पशु भूमिभार अतिदीन ॥ १३ ॥

वरं पर्वतदुर्गेषु भ्रान्तं वनचरैः सह ॥
न मूर्खजनसम्पर्कः सुरेन्द्रभवनेष्वपि ॥ १४ ॥

सं० टी०—पर्वते वनचरैः सह भ्रमणं श्रेष्ठं किन्तु मूर्खजनसम्पर्कः स्वर्गेऽप्युचितो न, इत्याह । वरमिति । पर्वतदुर्गेषु वनचरैः व्याघ्रादिभिःसह भ्रान्तं भ्रमणं वरमुत्कृष्टं, परन्तु मूर्खजनसम्पर्क इन्द्रभवनेष्वपि मास्त्विति । अनुष्टुब् वृत्तमिदम् ॥ १४ ॥

भा० टी०—पर्वतों और वनोंमें वनचरोंके संग विचरना श्रेष्ठ है परन्तु मूर्खमनुष्यका संग स्वर्गमेंभी बुरा है ॥ १४ ॥

दोहा—वनचरसंग रहबौ सुखद वनपर्वतके मांहि ।
पै मूरखसंग स्वर्गहू दुखयुत संशय नांहि ॥ १४ ॥

इत्यज्ञनिंदाप्रकरणम् ।

शास्त्रोपस्कृतशब्दसुन्दरगिरः शिष्यप्रदेयागमा ।
विख्याताः कवयो वसन्ति विषये यस्य प्रभोर्निर्धनाः ॥
तज्जाड्यं वसुधाधिपस्य कवयो ह्यर्थं विनापीश्वराः ॥
कुत्स्याःस्युः कुपरीक्षका हि मणयो यैरर्घतः पातिताः १५

सं० टी०—यस्य राज्ञो देशे कवया निर्धना वसन्ति स राजा मूर्ख इत्याह । शास्त्रेति । व्याकरणाभिधानादिभिः शास्त्रैरुपस्कृताः शिक्षिताः शब्दास्तैः सुन्दरा गीर्वाणी येषान्ते । तथा च शिष्येभ्यः प्रदेया दत्ताः पाठिता आगमा वेदशास्त्राणि यैस्ते । तथा च सर्वलोकेषु विख्याताः प्रसिद्धाः कवयः कवित्वं कुर्वाणाः । एवंभूता विद्वांसो यस्य प्रभोर्विषये देशमध्ये वसन्ति अथ च निर्धना धनरहिताः । राजा तान्नैव जानाति तेषां परामर्शं न गृह्णाति, तत् वसुधाधिपस्य राज्ञो जाड्यं मौर्ख्यं । कवयस्तु सुधियस्तु अर्थं विनापीश्वराः समर्थाः । यथा मणयो बहुमूल्यास्ते कुपरीक्षकैरज्ञात्वा अर्घतो मूल्यतः पातिताः न्यूनमूल्याः कृताः तर्ह्ययं दोषः परीक्षकाणां न तु मणीनां ।

परीक्षकाः कुत्स्याः स्युः कुत्सिता एव न तु मणयः । ये भूपतयः सन्तस्तादृशानां कवीनां स्वरूपं न जानन्ति ते मणिमूल्यं यथार्थमजानन्तः कुपरीक्षका इव निंद्या इत्यर्थः । तस्मात् राज्ञा कवयोऽवश्यं आदरणीया इति भावः । शार्दूलविक्रीडितवृत्तमिदम् ॥ १९ ॥

भा० टी०—जिनकी वाणीको शास्त्रोक्तशब्दोंनें सुन्दर कियाहै, और जिनकी विद्या शिष्योंके पढाने योग्य है, ऐसे प्रसिद्ध कवि जिस राजाके देशमें निर्धन रहतेहैं वे राजा मूर्ख हैं, कविलोग तौ विनाद्रव्यकेही श्रेष्ठ हैं। तथा वे राजा उस जौहरीकेसमान मूर्ख हैं जो मणिको न पहिचानकर उसका मूल्य घटातेहैं ॥ १९ ॥

छप्पय—सब ग्रन्थनको ज्ञान मधुर वाणी जिनके मुख। विनित प्रति विद्या देत सुजसको पूर रह्यौ सुख। ऐसे कवि जिहिं देश वसत निर्धनता लहि अति। राजा नांहि प्रवीणभई याही ते यह गति ॥ वे है विवेक सम्पति सहित सब पुरुषनमें अतिहि वर। घट कियौ रतनकौ मोल जिन तेई जौ हरीकूरनर ॥ १५॥

हर्तुर्याति न गोचरं किमपि शं पुष्णाति यत्सर्वदा ॥
ह्यर्थिभ्यः प्रतिपाद्यमानमनिशं प्राप्नोति वृद्धिं पराम् ॥
कल्पांतेष्वपि न प्रयाति निधनं विद्याख्यमंतर्धनम् ॥
येषां तान्प्रति मानमुज्झत नृपाः कस्तैः सह स्पर्धते॥१६॥

सं० टी०—राज्ञा कवयः सर्वदा आदरणीयाः नतु अहंकारेण निर्भत्सनीया इति श्लोकद्वयेनाह । हर्तुरिति । भो नृपा राजानः! येषां विद्याख्यमन्तर्धनं वर्त्तते तान्प्रति मानमहंकारमुज्झत त्यजत । कथंभूतं विद्याख्यं धनम् । हर्तुस्तस्करस्य यद्गोचरं न याति तस्य दृश्यं न भवति। पुनः कथंभूतं किमप्यनिर्वचनीयं शं सुखं पुष्णाति पुष्टिं प्रापयति । पुनः कथंभूतं । सर्वदा सर्वकालेष्वपि अर्थिभ्यः शिष्येभ्यः प्रतिपाद्यमानं दत्तं परामुत्कृष्टां वृद्धिं प्राप्नोति । पुनः कल्पान्तेष्वपि निधनं नाशं न प्रयाति न प्राप्नोति । एतादृशं येषामन्तर्धनं तैःसह कःस्पर्धते स्पर्धां करोति । न कोऽपीत्यर्थः । शार्दूलविक्रीडितं वृत्तमिदम् ॥ १६ ॥

भा० टी०—जो चोरको नहीं दीखसक्ता, जो सदैव सुखकी वृद्धि करताहै, जो जिज्ञासुओंको देनेसे परमवृद्धिकोप्राप्तहोताहै, तथा कल्पान्तमें भी जिसका नाश नहीं होता, ऐसा विद्यारूपी गुप्तधन जिनकेपास है उनसे हे

[illegible] ! कभी अभिमान मत करो, क्योंकि उनके समान इस जगत्‌में [illegible] कौन है ? ॥ १६ ॥

छप्पय—चोर सकत नाहि चोर भोर निशि पुष्ट करत हित। औरनहू को देत होत क्षण क्षणमें अगणित। कबहुं बिनसत नाहिं [illegible] विद्या सम गुप्तधन। जिनके ये सुख साज सदा तिनको [illegible] मन ॥ राजाधिराज छत्रपति भे एतो अधिकार नहि। तिनको निरादर तुम करो यह तुमको है उचित नहि ॥१६॥

अधिगतपरमार्थान्पण्डितान्मावमंस्थाः ।
तृणमिव लघु लक्ष्मीर्नैव तान्संरुणद्धि ॥
अभिनवमदलेखाश्यामगण्डस्थलानाम् ।
न भवति बिसतन्तुर्वारणं वारणानाम् ॥ १७ ॥

अम्भोजिनीवननिवासविलासमेव।
हंसस्य हन्ति नितरां कुपितो विधाता॥
नत्वस्य दुग्धजलभेदविधौ प्रसिद्धाम्।
वैदग्ध्यकीर्तिमपहर्तुमसौ समर्थः॥ १८॥

सं० टी०—औपाधिकगुणान् निवर्तयितुं लोकः समर्थः किन्तु स्वाभाविकगुणं निवर्तयितुं न कोऽपि समर्थ इति हंसदृष्टान्तेन द्योतयति। अम्भोजिनीति। यो यस्य स्वाभाविकः सद्गुणस्तं गुणं न कोऽपि हर्तुं शक्नोति। अत्र दृष्टान्तः। अम्भसो जाताः कमलिन्यस्तासां वनं तत्र निवासो वसतिस्थानं तेन विलसदम्भ एतादृशं हंसस्य विलासं विधाता ब्रह्मा नितरामत्यन्तं कुपितश्चेद्विलासमेव हन्ति न तु दुग्धजलयोर्भेदविधौ यत् प्रसिद्धं वैदग्ध्यं चातुर्यं तस्य कीर्तिस्तांहर्तुं समर्थः। तर्हि इतरेषां का वार्ता। वसन्ततिलकावृत्तमिदम्॥ १८॥

भा० टी०—हंसपर यदि विधाता कोप करे तो उसका कमलके वनोंका निवास और वहांका विलास नष्ट करसक्ताहै; परन्तु उसके दूध और पानीके अलग करनेकी प्रसिद्ध कीर्तिको नही नष्ट करसक्ता; अर्थात् उसके गुणोंको नहीं छीनसक्ता॥ १८॥

सोरठा—कमलन डारै खोय कोप करै विधि हंस पै।
पय पानी संग होय जुदे करै ले सकत नहि॥ १८॥

केयूरा न विभूषयंति पुरुषं हारा न चंद्रोज्ज्वला।
न स्नानं न विलेपनं न कुसुमं नालंकृता मूर्द्धजाः॥
वाण्येका समलंकरोति पुरुषं या संस्कृता धार्यते।
क्षीयंते खलु भूषणानि सततं वाग्भूषणं भूषणम्॥१९॥

सं० टी—केयूरादयोऽलंकाराः पुरुषं न विभूषयन्ति किन्तु वागलंकारो हि तस्योत्तमोऽलंकार इत्याह। केयूरेति, केयूरा वाहुभूषणानि, चन्द्रवदुज्ज्वला मुक्ताफलानां हाराः, शुद्धं स्नानं, विलेपनं गंधादिकं, कुसुमं पुष्पं च अलंकृताः सज्जीकृताः धूपिता मूर्द्धजाः केशाः ऐते पदार्थाः पुरुषं न भूषयन्ति। यदा मौर्ख्यं पुरुषस्याऽस्ति तदेभिः किंभूषणं भवति। तर्हि किं एका वाक् सम्यक्प्रकारेण अलंकरोति शोभयति, साऽपि वाक् या संस्कृता व्याकरणादिशास्त्रसंस्कारयुक्ता पुरुषेण धार्यते।

सन्मित्र निवाहत ॥ धनसंचय फल हीन होय विद्याजु अदूषण। लज्जायुत जो होय ताहि नहिं चहिये भूषण ॥ २१ ॥

दाक्षिण्यं स्वजने दया परजने शाठ्यं सदा दुर्जने।
प्रीतिः साधुजने नयो नृपजने विद्वज्जनेष्वार्जवम् ॥
शौर्यं शत्रुजने क्षमा गुरुजने नारीजने धूर्तता ।
ये चैवं पुरुषाः कलासु कुशलास्तेष्वेव लोकस्थितिः ॥ २२॥

सं० टी०—अधुना लोकस्थितिं द्योतयति । दाक्षिण्यमिति । स्वजने पुत्रकलत्रादौ दाक्षिण्यमौदार्य्यं "दक्षिणे सरलो दारावित्यमरः" । परजने दया कृपा "कृपा दयाऽनुकम्पा स्यादित्यमरः" । दुर्जने शठमनुष्ये सदा शाठ्यं शठता, । नृपजने राज्ञि नयो नीतिर्न्यायः, । विद्वज्जनेषु पण्डितेष्वार्जवमृजुत्वम् । साधुजने प्रीतिः । शत्रुजने शौर्यं शूरता । गुरुजने मान्यजने क्षमा । नारीजने धूर्तता । एवमनेन प्रकारेण ये पुरुषाः कलासु कुशला दक्षास्तेष्वेव लोकानां स्थितिर्मर्यादापालनम् । वृत्तं पूर्वोक्तमेव ॥ २२ ॥

भा० टी०—स्त्रीपुत्रादिपर उदारता, परजनोंपर दया, दुर्जनके संग शठता, भलोंके संग प्रीति, राजसभामें नीति, विद्वानोंके संग नम्रता, शत्रुके प्रति शूरता, वडेलोगोंसे क्षमा, और स्त्रियोंके साथ धूर्त्तता, जो पुरुष इन सब कलाओंमें कुशल हैं उन्हींसे लोककी मर्यादा है ॥ २२ ॥

छप्पय—सज्जनसों हित रीति दया परजनसों भाषहु । दुर्जनसों शठभाव प्रीति सन्तन प्रति राखहु । कपट खलनसों राखि विनय राखौ बुधजनसों । क्षमा गुरुनसों राख शूरता वैरीगणसों । धूरतता राखि युवतीनसों जो तू जग वसिवो चहै । अति ही करालकलिकालमें इन चालनसों सुख लहै ॥ २२ ॥

जाड्यं धियो हरति सिञ्चति वाचि सत्यम् ।
मानोन्नतिं दिशति पापमपाकरोति ॥
चेतः प्रसादयति दिक्षु तनोति कीर्तिम् ।
सत्सङ्गतिः कथय किं न करोति पुंसाम् ॥ २३ ॥

सं० टी०—इदानीं सत्सङ्गतेः प्रभावं वर्णयंति । जाड्यमिति । सत्सङ्गतिः साधुजनानां समागमः धियः बुद्धेर्जाड्यं मन्दतां हरति, वाचि वाण्यां सत्यं सिंचति, मानस्योन्नतिं वृद्धिं दिशति ददाति, पापमपाकरोति दूरीकरोति । चेतश्चित्तं प्रसादयति प्रसन्नतां नयति । दिक्षु कीर्तिं यशः तनोति विस्तारयति । एवंच सत्सङ्गतिः पुंसां किंकिं न करोतीति कथय वद वसन्ततिलकावृत्तमिदम् ॥ २३ ॥

भा० टी०—सज्जनोंकी संगति बुद्धिकी मन्दताको नाश करतीहै, वाणीको सत्यताकी धारासे सींचती है, मानको बढातीहै, पापको दूर करतीहै, चित्तको प्रसन्न रखतीहै, और चारोंओर यशको फैलातीहै, फिर बताओ यह मनुष्यको क्या २ लाभ नहीं पहुंचाती ॥ २३ ॥

दोहा—जडताई मतिकी हरत पाप निवारत अङ्ग ।
कीरति सत्य प्रसन्नता देत सदा सत्सङ्ग ॥ २३ ॥

जयन्ति ते सुकृतिनो रससिद्धाः कवीश्वराः ॥
नास्ति येषां यशःकाये जरामरणजं भयम् ॥ २४ ॥

सं० टी०—अधुना रससिद्धकवीश्वराणां सर्वोत्कर्षत्वमाह । जयन्तीति । रसेषु शृङ्गारादिषु सिद्धाः परिपूर्णाः सुकृतिनः पुण्यवन्तः "सुकृती पुण्यवान् धन्य" इत्यमरः । ते कवीश्वराः कविश्रेष्ठाः जयन्ति सर्वोत्कर्षेण वर्त्तन्ते । ते के, येषां यशःकाये कीर्तिरूपदेहे जरा च मरणं च ताभ्यां जातं भयं नास्ति । अनुष्टुब्वृत्तमिदम् ॥ २४ ॥

भा० टी०—जय होनेसे पुण्यात्मा कवीश्वरोंकी जिनने रसोंको सिद्ध किया, और जिनकी यशरूपी कायाको बुढापे और मृत्युसे भय नहीं है ॥ २४ ॥

दोहा—सबसें ऊंचे सुकवि जानत रसको सोत ।
जिनके जसकी देहको जरामरण नहि होत ॥ २४ ॥

सूनुः सच्चरितः सती प्रियतमा स्वामी प्रसादोन्मुखः ।
स्निग्धं मित्रमवञ्चकः परिजनो निःक्लेशलेशं मनः
आकारो रुचिरः स्थिरश्च विभवो विद्यावदातं मुखम् ।
तुष्टे विष्टपहारिणीष्टदहरौ संप्राप्यते देहिना ॥ २५ ॥

सं० टी०—भगवत्प्रसादादेव सच्चरितादियुक्ताः पुत्रादयो भवन्तीत्याह । सूनुरिति । पुत्रः सच्चरितः सद्वृत्तः । अतिशयेनप्रिया प्रियतमा सती । स्वामी प्रसादे प्रसन्नतायां ऊर्ध्वं यस्येति प्रसादोन्मुखः । स्निग्धं स्नेहयुक्तं मित्रम् । अवंचकः परिजनः स्वकीयजनसमुदायः । नि क्लेशमाधिरहितं स्वस्थं मनः । आकारो रुचिरः । स्थिरश्च विभवः ऐश्वर्यं । विद्ययाऽवदातं मुखमिति । ऐते पदार्था विष्टपहारिणि स्वर्गवासिनीष्टदहरौ नारायणे तुष्टे प्रसन्ने सति पुरुषेण प्राप्यन्ते ॥ शार्दूलविक्रीडितं वृत्तमिदम् ॥ २५ ॥

भा० टी०—सपूतलडका, पतिव्रतास्त्री, हंसमुखस्वामी, प्रेमीमित्र, कुटुम्बी, क्लेशरहित मन, सुन्दरस्वरूप, स्थिरसम्पत्ति, और विद्यासे शोभित मुख, ये सब उस मनुष्यको प्राप्तहोतेहैं जिसपर सम्पूर्णमनोरथोंका देनेवाला स्वर्गवासी ईश्वर प्रसन्न हो ॥ २५ ॥

छप्पय—पुत्रमिलैंसच्चरित नारीहू सतीसुहावन । स्वामी हँसमुख मिलै मीत्रहू प्रीतनिवाहन ॥ परिजन छलसों हीन कलहविन मन सुखकारी ॥ आनन सुन्दर मिलै अचल लक्ष्मीहू भारी ॥ सब शोभाकी खान मिलै विद्यामुख मंडन ॥ होंहि प्रसन्न रमेश सकल अघओघ विखंडन ॥ २५ ॥

प्राणाघाता[1]न्निवृत्तिः[2] परधन[3]हरणे संयमः[4] सत्यवाक्यम्[5] ।
काले[6] शक्त्या[7] प्रदानं[8] युवतिजनकथामूकभावः[10] परेषाम्[9] ॥
तृष्णास्रोतोविभङ्गो[11] गुरुषु[13] च[12] विनयः[14] सर्वभूतानुकम्पा[15] ।
सामान्यः[17] सर्वशास्त्रेष्वनुपहतविधिः[18] श्रेयसा[20]मेष[19]पन्थाः[21] ॥२६॥

सं० टी०—प्राणाघातादिति । प्राणस्य आत्मनोऽन्यस्य वा आघातो हननं तस्मान्निवृत्तिः । परधनहरणे संयमश्चित्तस्य नियमनं । सत्यवाक्यं यथार्थवचनम् । योग्यकाले शक्त्या दानम् । परेषां युवतिजनकथासु मूकभावस्तूष्णींभावः । तृष्णालक्षणं स्रोतस्तस्याविभङ्गः आशाप्रवाहनिवर्तनम् । गुरुषु विनयो नम्रत्वम् । सर्वभूतेष्वनुकम्पा कृपा । ऐते पदार्थाः सर्वशास्त्रेषु सामान्यतो बाहुल्येन अनुपहतविधिः न त्यक्तो विधिर्मर्यादा एवंभूतः श्रेयसां पुण्यानामेषः पन्थाः मार्गः प्रोक्तः स्रग्धरावृत्तमिदम् ॥ २६ ॥

भा० टी०—जीवहिंसा न करना, परधनहरण न करना, सत्यबोलना, समयपर यथाशक्ति दान करना, पराईस्त्रियोंकी कथापर ध्यान न देना, तृष्णाके

प्रवाहको तोडना (लोभको छोडना) बडेलोगोंसे नम्रता करना, प्राणिमात्रपर दया करना, और शास्त्रानुसार विधिपूर्वक कार्य करना, ये सब मनुष्योंके कल्याणके मार्ग हैं ॥ २६ ॥

छप्पय—तजै प्राणकी घात और परधन नहिं राखे । परयुवतीकों त्याग वचन झूंठे नहिं भाखै । निजहाथन जुति दान, देत तृष्णाकों रोकत । दया सवनमें राख गुरुनके चरनन ढोकत । यह संमत है श्रुति सुमृतिको सवकों सुखदायक सुभग । जे चलत धीरते धन्यहै उनहींसो जगभगत जग ॥ २६ ॥

प्रारभ्यते न खलु विघ्नभयेन नीचैः ।
प्रारभ्य विघ्नविहता विरमन्ति मध्याः ॥
विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः ।
प्रारभ्य चोत्तमजना न परित्यजन्ति ॥ २७ ॥

सं० टी०—इदानीं उत्तममध्यमाधमपुरुषाणां कार्यारम्भे वैचित्र्यं वर्णयति । प्रारभ्य इति । नीचैः क्षुद्रैर्विघ्नमयेन यत्किंचित्कर्म न प्रारभ्यते नानुष्ठीयते । मध्यमा आदौ प्रारम्भं कृत्वा पश्चात् विघ्नेन विहता वाधिताः संतः कार्यं तथैव परित्यजन्ति । उत्तमजनास्तु यदारब्धं कार्यं पुनः पुनः विघ्नेन प्रतिहता अपि नपरित्यजन्ति । वसन्ततिलकावृत्तमिदम् ॥ २७ ॥

भा० टी०—नीचमनुष्य विघ्नके भयसे कोई काम आरम्भही नहीं करते, मध्यमपुरुष कार्यको आरम्भ तौ करदेतेहैं पर विघ्न होतेही छोड़देतेहैं, परन्तु उत्तमपुरुष वारम्वार विघ्न होनेपरभी जिसकार्यको आरम्भ करतेहैं उसे पूरा-कियेविना नहीं छोडते ॥ २७ ॥

छप्पय—करहिंन काज आरंभ विघ्नभय अधम अनारी । मध्यम काजहिं छेड विघ्नभय देंहिं विसारी ॥ उत्तम त्यागहि नाहिं करे जो काज अरंभा ॥ परें अनेकन विघ्न तदपि रहँ अडिगअथंभा । धनजन वैभव पाप रहें ऐसे जनसूरे । दै मूंछनपै ताव फिरें जग सब सुख पूरे ॥ २७ ॥

असन्तो नाभ्यर्थ्याः सुहृदपि न याच्यः कृशधनः।
प्रिया न्याय्या वृत्तिर्मलिनमसुभङ्गेऽप्यसुकरम्।
विपद्युच्चैः स्थेयं पदमनुविधेयं च महताम्।
सतां केनोद्दिष्टं विषममसिधाराव्रतमिदम्॥ २८॥

सं. टी०—अधुना सत्पुरुषाणां स्वाभाविकगुणान् दर्शयति। प्रियेति। असन्तो दुष्टानाभ्यर्थ्याः न याचनीयाः। कृशधनोऽल्पधनः सुहृदपि नयाच्यः। सर्वेषां प्रिया न्याय्या विध्युक्ता वृत्तिः। असुभङ्गे प्राणभङ्गेऽपि मलिनं पापमसुकरं नैव करोति। विपद्यापत्तौ उच्चैः स्थेयम्। महत्पदे स्थितो भवति स्वगौरवं न त्यजति। महतां पदमनुविधेयं। यथा महान्तः स्वपदे स्वस्थाने महत्वेन स्थिताः तथैवायमप्यनुकरोति। इति विषममसिधाराव्रतं नैष्टिकव्रतं सतां केनोद्दिष्टमुपदिष्टं न केनापि। अयं सतां स्वाभाविको गुण इत्यर्थः। शिखरिणीवृत्तमिदम्॥ २८॥

भा० टी०—अच्छेमनुष्योंको न्यायसे प्रेम होताहै, और वे प्राण जाने परभी बुरे काम नहीं करते। दुष्टमनुष्यसे और स्वल्पधनवाले मित्रसेभी कैसी ही विपत्ति क्योंनपडे नहीं मांगते, और अपने गौरवको ऊच्चपदसे नहीं गिरने देते। यह नहीं जानपडता कि तलवारकी धारसेभी कठिन यह व्रत किसने इनको सिखाया है? ॥ २८॥

कुण्डलिया—मांगत नांहि न दुष्टसों लेत मित्रकौ नांहि। प्रीति निवाहत विपदमें न्यायवृत्ति मन मांहि। न्यायवृत्ति मन माहिं उच्चपद प्यारौ जिनकों। प्राणन हं के जात अकृत नहि भावत तिनकों। खड्गधारव्रत धार रहे कोहू नहि त्यागें। सन्तनकों यह मंत्र दियो कौने विन मागें॥ २८॥

॥ इति विद्वत्प्रशंसा॥

अथ मानशौर्यप्रशंसा।

क्षुत्क्षामोऽपि[2] जराकृशोऽपि[3][4] शिथिलप्रायोपि[5][6] कष्टां दशा-
मापन्नोऽपि[9][10] विपन्नदीधितिरपि[11][12] प्राणेषु[13] नश्यत्स्वपि[14][15]॥
मत्तेभेन्द्रविभिन्नकुम्भकवलग्रासैकबद्धस्पृहः[16]।
[23]किं जीर्णं[20] तृणमत्ति[21][22] मानमहतामग्रेसरः[17][18] केसरी[19]॥ २९॥

सं. टी०—अतिहीनदशामापन्नोऽपि मानी पुरुषः स्वमाननाशकं किमपि कार्यं न करोतीति सिंहान्योक्त्या ध्वनति। क्षुत्क्षामेति। क्षुत्क्षामोऽपि क्षुधया क्षामो हीनसत्वोऽपि, जरया, कृशोऽपि, शिथिलप्रायोऽपि, एवं कष्टां दशामापन्नः प्राप्तोऽपि। विपन्नदीधितिरपि, निस्तेजाअपि। प्राणेषु नश्यत्स्वपि मरणसमयं प्राप्तोपि। एवं जाते सति क्षुधानाशार्थं केसरी सिंहः किं जीर्णं तृणमत्ति भक्षयति। कथंभूतः केसरी महान्तश्चते इभेन्द्राश्च तेषां विभिन्ना विदारिताः कुम्भाः गण्ड-स्थलानि तेषां ये मांसकवलास्तेषां ग्रासास्तेपु बद्धा स्पृहा येन। पुनः कथंभूतः मानेनाभिमानेन महान्तस्तेषांमध्येऽग्रेसरोऽग्रगण्योऽहंकारयुक्तः। एवं सिंहवदहंकारवान् पुरुषार्थी पुरुषः क्षुद्रकार्यं नावलम्बेत। शार्दूलविक्रीडितवृत्तमिदम्॥ २९॥

भा. टी०—भूखकेमारे दुर्बल, शक्तिहीन, बुढापेसे दुःखी कष्टकी दशा को प्राप्त तेजहीन और महान्‌पुरुषोंमें अग्रगण्य सिंह प्राण जानेवाले हों तौ-भी मदवाले हाथीके मस्तकको फाडकर मांस खानेकी इच्छा रखताहै, सूखी घास खानेकी नहीं। इस श्लोकका अभिप्राय यहहैं कि चाहै जैसी विपत्ति क्यों न पडे उत्तम पुरुष नीचकर्म कभी नहीं करते॥ २९॥

कुण्डलिया—नाहर भूखौ उदर कृश वृद्ध वयस तनक्षीण। शिथिल प्राण अतिकष्टसों चलिवेही मेंलीन। चलवै ही में लीन तऊ साहस नहि छाँडै। मदगज कुम्भविदार मांसभक्षण मन-माँढै। मृगपति भूखौ घास पुरानौ खात न जाहर। अभिमानिन में मुख्य शिरोमणि सोहत नाहर॥ २९॥

सं० टी०—कुसुमेति। कुसुमानां पुष्पाणां स्तवको गुच्छस्तस्येव प्रशस्ते मनोऽस्य! मनस्वी तेषां द्वे गती स्थितीस्तः, के ते प्रकाराः यथा ग्रहीतरि सति पुष्पस्तवकेन सर्वलोकस्य मूर्ध्नि मस्तके अवशीर्यते अथवा वने विशीर्येत। तथा मनस्विनः हितोपदेशकरणेन पूज्या भवन्तीत्यन्यथा तूष्णी मवतिष्ठन्त इति ज्ञातव्यम्। अनुष्टुब्वृत्तमिदम्॥ ३३॥

भा०टी०—श्रेष्ठपुरुषोंकी गति फूलके गुच्छेके समान दोप्रकारकी है, कि या तौ वे सबलोगोंके शिरही पर विराजते हैं अथवा वनमेंही सूखकर नष्ट हो जाते हैं॥ ३३॥

दोहा—पहुप गुच्छ सिरपै रहै कै सूखै वन माँहि।
मान ठौर सत् पुरुष रहिकै सुखदुःख वन मांहि॥३३॥

सन्त्यन्येऽपि बृहस्पतिप्रभृतयः संभाविताः
पञ्चषास्तान्प्रत्येष विशेषविक्रमरुची राहु
र्न वैरायते॥ द्वावेव ग्रसते दिनेश्वरनि-
शाप्राणेश्वरौ भासुरौ भ्रांतः पर्वणि पश्य
दानवपतिः शीर्षावशेषीकृतः॥ ३४॥

सं० टी०—शूराः समानपराक्रमान् पीडयन्ति अल्पवीर्यान् नेति राहुदृष्टान्तेन ध्वनति। सन्तीति। बृहस्पतिप्रभृतयः पञ्च वा षड्वा पञ्चषाः सम्भाविता महान्तःसन्ति। तान् प्रत्येषो राहुः विशेषविक्रमरुचिः सन्नवैरायते न वैरं करोति। पर्वणि दिनेश्वरः सूर्यो निशाप्राणेश्वरश्चन्द्रः इमौ द्वावेव [illegible] ग्रसते। कथंभूतो राहुः दानवपतिः शीर्षावशेषीकृतः अतो भ्रांतः। किमुक्तं [illegible] न हन्तव्योऽपि तु निःशेषम्। शार्दूलविक्रीडितवृत्तमिदम्॥ ३४॥

भा० टी०—पराक्रमकी विशेष इच्छा करनेवाला दानवोंका पति या राहु बृहस्पति आदि अन्य पांच वा छ ग्रहोंसे बैर नहीं करता, केवल सिरमात्रही रह-जानेपरभी यह अतितेज प्रकाशवाले सूर्य और चन्द्रमाकोही अमावास्या और पूर्णमासीको जाकर ग्रासता है। इसका अभिप्राय यह है कि शूरवीर अपने बराबर-वालोंकाही सामना करते हैं निर्बलोंसे नहीं लड़ते हैं॥ ३४॥

कुण्डलिया--राजानिशि अरु दिवसकों रवि शशि तेजनिधान। पांचौ ग्रह इनसम नहीं ताते तजै निदान ॥ ताते तजै निदान आन इनहीं सो अकडत। रह्यौ तीसकौ राह चाहकर जबतब अकडत। ऐसेही नरधीर मरतहू करत सुकाजा । गिरत पडत रणमाँहि सुभट पहुंचत जहां राजा ॥ ३४ ॥

वहति भुवनश्रेणीं शेषः फणाफणकस्थितां कमठपतिना मध्येपृष्ठं सदा स विधार्यते ॥ तमपि कुरुते क्रोडाधीनं पयोधिरनादरादहह महतां निःसीमानश्चरित्रविभूतयः ॥ ३५ ॥

सं० टी०--वहतीति । शेषो नागः भुवनस्य संसारस्य श्रेणीं पंक्तिं फणाफलकस्थितां फणामण्डलस्थितां वहति धारयति। स शेषः कमठपतिना कूर्मेण मध्यपृष्ठे पृष्ठमध्ये सदा धार्यते । तं कूर्मं पयोनिधिः समुद्रोऽनादरात् क्रोडो वराहस्तदधीनं कुरुते । एवं महतां चरित्रविभूतयः ऐश्वर्याणि निःसीमानो मर्यादामतिक्रान्ता अतिशयिताः अनेन महतां सामर्थ्यं निःसीममपरिमितमिति सूचितम् । हरिणीवृत्तमिदम् ॥ ३५ ॥

भा० टी०—चौदह भुवनोंकी पंक्ति शेषजी अपने फनापर धारण करते हैं, और उनशेषजीको कच्छप अपनी पीठपर धारण करता है, तथा इस कच्छपको समुद्रने अनादरसे वराहजी (सूअर) के आधीन करदिया है, इससे यह सिद्ध होता है कि महज्जनोंके चरित्रकी विभूति असीम है ॥ ३५ ॥

छप्पय--धरी धराकों शीस शेष अति करयौ पराक्रम । शेष सहित सबभूमि कमठ धर रह्यौ बिनाश्रम। कमठ शेष और भूमिभार वाराह रख्यौ धर। इन सबहिनकौ भार एक जलके आश्रितकर। एक एकसौं विक्रम अधिकही करत बडे अद्भुतकृति। तिनके चरित्र सीमारहित अति विचित्र राखत सुवृत्ति ॥ ३५ ॥

वरं पक्षच्छेदः समदमघवन्मुक्तकुलिशप्रहारैरुद्गच्छद्बहलदहनोद्गारगुरुभिः ॥ तुषाराद्रेःसूनोरहह पितरि क्लेशाविवशे नचासौ संपातःपयसि पयसां पत्युरुचितः ॥ ३६ ॥

सं. टी०--क्लेशाक्रान्तं पितरं त्यक्त्वाऽन्यत्र स्वप्राणरक्षणार्थं गन्तुं नोचितमित्याह। तुषाराद्रेर्हिमालयस्य सूनोः पुत्रस्य मैनाकस्य समदमघवन्मुक्तकुलिशप्रहारभेदेन युक्तो मघवानिन्द्रस्तेन मुक्ताः कुलिशप्रहारास्तैः पक्षच्छेदः वरं श्रेष्ठः कथंभूतैरुद्गच्छन्तो ये बहलदहनस्योद्गारास्तैः गुरुभिः पृथुभिरेवंभूतैः खड्गप्रहारैः। कस्मिन् सति। पितरि हिमाद्रौ क्लेशविवशे पक्षच्छेदेन क्लेशयुक्ते सति तं पितरं त्यक्त्वा पयसां पत्युः समुद्रस्य पयस्युदके संपातः भयेन पतनं नोचितं न योग्यम्। शिखरिणीवृत्तमिदम्॥ ३६॥

भा० टी०--मदमें भरेहुए इन्द्रके चलाये हुए वज्रसे कि जिसकी अग्निकी ज्वाला अत्यन्त कठिन है मैनाकका मरजाना अच्छा था, परन्तु उसको उचित नहीं था कि अपने पिता हिमाचलको क्लेशविवश छोडकर समुद्रमें कूदकर अपने पंख बचावै॥ ३६॥

कुण्डलिया--हिमगिरि सिर धुनकै कहै कहा कियौ मैनाक। सहिवौ हौ निजसीसपै इन्द्रवज्रपरिपाक। इन्द्रवज्र रि[illegible] अग्निज्वालासें जदिवौ। नीकौ हौ सब भांत उहां स[illegible] है मरिवो। दुरयौ सिन्धुके माँहि कहौ कौलों व्है है थिर। [illegible]ज लजायौ मोहि पिता नाहि जान्यौ हिमगिरि॥ ३६॥

यदचेतनोऽपि पादैःस्पृष्टः प्रज्वलति सवितुरिनकांतः।
तत्तेजस्वी पुरुषः परकृतविकृतिं कथं सहते॥ ३७॥

सं० टी०--तेजस्वीपुरुषः परकृतविकृतिं नसहत इति इनकान्तदृष्टान्तेन वदति। यदिति। यदचेतनोऽपि चेतनारहितोऽपि इनकान्तः सूर्यकान्तः सवितुः सूर्यस्य पादैः किरणैः स्पृष्टः सन् प्रज्वलति। एवं सति सचेतनस्तेजस्वी पुरुषः परकृतां विकृतिं विकारं कथं सहते नसहत इत्यर्थः। आर्यावृत्तमिदम्॥ ३७॥

भा० टी०--जब सूर्यकान्तमणि अचेतन होनेपरभी सूर्यके किरणरूपी पांवके स्पर्शसे जल उठता है तो सचेतन तेजस्वी पुरुष दूसरोंके अनादरको कैसे सहसक्ते हैं॥ ३७॥

दोहा--वचन बाणसम श्रवण सुन सहत कौन रिस त्याग।
सूरजपद परिहारतें पाहन उगलत आग॥ ३७॥

सिंहःशिशुरपि निपतति मदमलिनकपोलभित्तिषुगजेषु।
प्रकृतिरियं सत्त्ववतां न खलु वयस्तेजसो हेतुः॥ ३८

सं० टी०--सत्ववतां तेजसो हेतुः प्रकृतिरेव वयो नेति सिंहशिशुदृष्टान्तेन वदति। सिंहेति। शिशुरपि सिंहो मदेन मलिनाः कपोलभित्तयो येषां तेषु गजेषु निपतति। इयं सत्ववतां प्रकृतिःस्वभावः। अतो खलु निश्चयेन तेजसो हेतुः वयो नेत्यर्थः। आर्यावृत्तमिदम् ॥ ३८ ॥

भा० टी०--सिंहका बच्चाभी मदसे मलिन कपोलोंवाले हाथियोंपरही झपटता है क्योंकि तेजस्वियोंका यही स्वभाव है। निश्चय जानो कि तेजका हेतु अवस्था नहीं है ॥ ३८ ॥

दोहा--टूट सिंह शिशु करिनिकर विचलावै क्षणमांहि।
तेजवानकी प्रकृति यह तेजहेतु वय नांहि ॥ ३८ ॥

इति मानशौर्यप्रशंसा।

॥ अथ द्रव्यप्रशंसा ॥

जातिर्यातु रसातलं गुणगणस्तस्याप्यधो गच्छतां
शीलं शैलतटात्पतत्वभिजनः सन्दह्यतां वह्निना ॥
शौर्ये वैरिणि वज्रमाशु निपतत्वर्थोऽस्तु नः केवलं
येनैकेन विना गुणास्तृणलवप्रायाः समस्ता इमे ॥ ३९ ॥

सं० टी०--इदानीं द्रव्यप्रशंसा वर्ण्यते। जातिरिति। जातिः स्वजातिः रसातलं यातु गच्छतु। गुणाः सद्गुणास्तेषां गणः समुदायो रसातलस्याप्यधो गच्छतात्। शीलं सद्वृत्तं शैलतटात् पर्वततटात् पततु। अभिजनः कुलं "सन्ततिर्गोत्रजनन कुलान्यभिजनान्वयौ" इत्यमरः वह्निना दह्यताम्। शौर्येण याचितुं न शक्यतेऽतस्तद्वैरिणि शौर्ये तस्मिन् वज्रमाशु शीघ्रं निपततु। एवं सर्वस्य हानिर्भवतु परन्तु नोऽस्माकं केवलं मुख्योऽर्थो द्रव्यमस्तु किमर्थं येनैकेनार्थेनाविना पूर्वोक्तगुणास्तृणलवप्राया भवन्ति। शार्दूलविक्रीडितवृत्तमिदम् ॥ ३९ ॥

भा० टी०--चाहें जाति रसातलमें जाय, सब उत्तमगुण उससेभी नीचे चले जाँय, शीलता पर्वतसे गिरकर नष्ट होजाय, कुलके लोग अग्निसे जलजाँय, और शूरतारूपी शत्रुपर वज्र गिरपडे (इनसे हमको कुछ प्रयोजन नहीं) हमको तो केवल एक द्रव्यसे प्रयोजन है, जिसकेबिना सब गुण तृणके समान हैं ॥ ३९ ॥

छप्पय--जाति रसातल जाहु गुण ताहूके तर। परौ शील-पर शैल अग्निमें जरौ सुपरिकर। सूरातनके शीश वज्र वैरिनिको बरसहु। एक द्रव्य बहुभांति रैन दिन घन ज्यों सरसहु। जिहिबिन

सकल गुण तृणहि सम कहुकारज नाहिं करसकहिं । कंचन अर्थी सबसोंजसुख विनकंचन अकचकाहि ॥ ३९ ॥

तानीन्द्रियाणि सकलानि तदेव कर्म सा बुद्धिरप्रतिहता वचनं तदेव ॥ अर्थोष्मणा विरहितः पुरुषः स एव त्वन्यः क्षणेन भवतीति विचित्रमेतत् ॥ ४० ॥

सं॰ टी॰—अधुना श्लोकद्वयेन द्रव्यस्य श्रेष्ठत्वं वर्णयति । सामर्थ्ये सति यानि पूर्वमिन्द्रियाणि आसन् तान्येव सन्ति । तदेव कर्म । बुद्धिरपि सैव कीदृश्यप्रतिहता नाशं न प्रता। वचनमपि तदेव वक्तृशक्तिः । एवं सर्वथा पूर्वं यदासीत्तदस्ति परन्तु एकोऽर्थो द्रव्यं तस्योष्मा तेन विरहितः शून्यः स एव पुरुषः क्षणेनान्यो भवतीति एतत् विचित्रमाश्चर्यम् । अवश्यं द्रव्यं सम्पादनीयमितिभावः ॥ वसन्ततिलकावृत्तम् ॥ ४० ॥

भा॰ टी॰—सब इन्द्रियांभी वही हैं, सब व्यवहारभी वही हैं, बुद्धिभी पहिलेकेसदृश प्रबल है, वचनभी वही है, परन्तु बडे आश्चर्यकी बात है की विना धनके वही मनुष्य क्षणभरमें औरका और होजाताहै ॥ ४० ॥

दोहा—वही इन्द्री वही कर्म है वही बुद्धि वह ठौर ॥
धनविहीन नर क्षणएकमें होत औरते और ॥ ४० ॥

यस्यास्ति वित्तं स नरः कुलीनः स पण्डितः स श्रुतवान् गुणज्ञः ॥ स एव वक्ता स च दर्शनीयः सर्वे गुणाः काञ्चनमाश्रयन्ति ॥ ४१ ॥

सं॰ टी॰—यस्य पुरुषस्य वित्तं धनमस्ति स नरः कुलीन एव। स एव पाण्डितः स एव श्रुतवान् शास्त्रज्ञः, स एव गुणज्ञः गुणज्ञाता, स एव वक्ता । स एव दर्शनीयः द्रष्टुं योग्यः । एवं सर्वे गुणाः कांचनं सुवर्णमाश्रयान्ति । उपजातिर्वृत्तम् ॥ ४१ ॥

भा॰ टी॰—जिसकेपास धन है वही मनुष्य कुलीन, पण्डित, गुणी, वक्ता और देखनेयोग्य होताहै, इससे ज्ञात होताहै की सबगुण सुवर्ण (धन) केही आश्रित हैं ॥ ४१ ॥

दोहा—सोई पंडित वक्ता गुणी दर्शनयोग कुलीन ॥
जाके ढिग है लक्ष्मी सब गुण तिहिं आधीन ॥ ४१ ॥

दौर्मन्त्र्यान्नृपतिर्विनश्यति यतिः संगात्सुतो लालना
द्विप्रोऽनध्ययनात्कुलं कुतनयाच्छीलं खलो-
पासनात् ॥ ह्रीर्मद्यादनवेक्षणादपि कृषिः स्नेहः
प्रवासाश्रयान्मैत्री चाप्रणयात्समृद्धिरनयात्त्यागा
त्प्रमादाद्धनम् ॥ ४२ ॥

स० टी०--दौर्मन्त्र्यादिति । नृपतिर्भूपालः दौर्मन्त्र्यात् दुष्टप्रधानानुरोधात् विनश्यति नाशं प्राप्नोति । यतिः सन्यासी संगात् स्त्र्यादिसंसर्गात् विनश्यति, सुतः पुत्रो लालनात् विनश्यति, विप्रो ब्राह्मणोऽनध्ययनात् विद्याध्ययनं विना नष्टो भवति, कुलं कुतनयात् कुमार्गगामिसुतात् विनश्यति, । शीलं सद्वृत्तं "शीलं स्वभावे सद्वृत्ते" इत्यमरः । खलोपासनात् दुष्टजनोपासनात् विनश्यति, ह्रीर्लज्जा मद्यान्मदिरापानात् नश्यति, कृषिरनवेक्षणात् वारम्वारमनवलोकनात् विनश्यति, स्नेहः प्रीतिः प्रवासात् चिरकालविदेशनिवासाद्विनश्यति, मैत्री चाप्रणयात् अविनयात् विनश्यति, समृद्धिरैश्वर्य्यमनयादन्यायात् नाशं प्राप्नोति, धनं प्रमादात् व्यर्थव्ययात् नष्टं भवति । तस्मान्नृपादिभिर्दुष्टप्रधानाद्यनुसेवनं न कर्तव्यमितिभावः ॥ शार्दूलविक्रीडितं वृत्तम् ॥ ४२ ॥

भा० टी०--बुरे मंत्रियोंसे राजाका नाश होताहै, संगतिसे तपस्वी भ्रष्ट होजाताहै, बहुत लाड प्यारसे पुत्र विगडजाताहै, विद्या न पढनेसे ब्राह्मणका और कुपूतसे कुलका नाश होजाताहै; दुर्जनोंकी सेवा करनेसे शीलता और मद्य पीनेसे लज्जा जातीरहतीहै, विना देखभालकिये खेती और विदेशमें रहनेसे स्नेह नष्ट होजाताहै । नम्रता न करनेसे मित्रता, अनीति करनेसे ऐश्वर्य और असावधानतासे व्यय करनेसे धनका नाश होजाताहै ॥ ४२ ॥

छप्पय--कुत्सितमंत्री भूप सन्त विनसत कुसंगतें । लाडलडाये पूत गोत कन्या कुढंगतें । विनविद्यातें विप्र शील खल संग लियेतें । होत प्रीतिको नाश वास परदेस कियेतें । वीनता विनाश मदहाससों खेती विन देखै दृगन । सुख जात अनय अनुरागतें, अतिप्रमादतें जात धन ॥ ४२ ॥

दानं भोगो नाशस्तिस्रो गतयो भवन्ति वित्तस्य ॥
यो न ददाति न भुंक्ते तस्य तृतीया गतिर्भवति ॥ ४३ ॥

सं० टी०—दानमिति। दानं भोगो नाशः। एताः तिस्रो वित्तस्य धनस्य गतयो भ
यः पुरुषो न ददाति न च भुंक्ते भोगं न कुरुते तस्य वित्तस्य तृतीया गतिर्नाशो भवति। त
द्धनवता पुरुषेण दानं भोगश्चावश्यमेव कर्तव्य इति तात्पर्यम्। आर्यावृत्तमिदम् ॥ ४३ ॥

भा० टी०--दान, भोग और नाश यह्इ धनकी तीन गति हैं, यदि
न तौ भोगा जाय, और न दिया जाय तौ उसकी तीसरी गति होती है, अ
नाश होजाताहै ॥ ४३ ॥

सोरठा--दान भोग और नास तीन होत गति द्रव्यकी।
नांहिन द्वैको वास तहां तीसरौ वसत है ॥ ४३ ॥

मणिः[१]शाणोल्लीढः[२] समरविजयी[३] हेतिनिहतो[४] मद[५]-
क्षीणो नागः[६] शरदि सरितः[७] श्यानपुलिनाः ॥
कलाशेषश्चन्द्रः[१०][११] सुरतमृदिता[१२] बालललना[१३] तनिम्ना[१४]
शोभंते[१९] गलितविभवाश्चार्थिषु[१६][१४][१५] नृपाः[१७] ॥ ४४ ॥

सं० टी०—मणिरिति। शाणेन निकषपाषाणेनोल्लीढ उल्लिखितः कृशीकृतो मणि
हेतिभिरायुधैर्निहतः कृतक्षतः समरे विजयशीलो योद्धा, मदेन क्षीणो नागो हस्ती, श
श्यानानि शुष्काणि पुलिनानि जलनिर्मुक्ततटानि यासां ताः सरितो नद्यः। कलया षोडशभा
शेषोऽवशिष्टश्चन्द्रः। सुरते मृदिता चुम्बनालिङ्गनाद्युपमर्दितांगी बाला नवयौवना षोडशवर्ष
स्त्री। एवमर्थिषु याचकेषु गलितः संक्रान्तः विभवः समृद्धिर्येषांते नृपाश्च। तनिम्ना तनोः कृश
भावस्तनिमा कार्श्यं तेन शोभन्त इत्यन्वयः। शोभारूपैकधर्मादीपकालंकारः॥ शिखरिणीवृ
मिदम् ॥ ४४ ॥

भा० टी०---सानसे खरादा हुआ मणि, समरमें शस्त्रोंसे घायल कियाहु
शूर, मदसे उतरा हुआ हाथी, शरदृतुकी क्षीण नदी, द्वितीयाका चन्द्रमा क
केलिमें मर्दनकीहुई नवयौवना वाला स्त्री और अतिदान करनेसे दरिद्री रा
इन सबकी दुर्बलताहीसे शोभा है ॥ ४४ ॥

कुण्डलिया—छोटी हू नीकी लगै मणि खरपाण चढीसु
वीरअंग कटि शस्त्रसों शोभा सरस वढीसु। शोभा सरस वढी
अंग गज मदकर छीनहि। द्वैज कला ससि सोह शरदि सरि

जेमिही नहिं। सुरत दलसलीनार लहत सुन्दरता मोटी। अर्थिनकों धन देत घटी सो नाहिं न छोटी ॥ ४४ ॥

परिक्षीणः कश्चित्स्पृहयति यवानां प्रसृतये स पश्चात्संपूर्णो गणयति धरित्रीं तृणसमाम् ॥ अतश्चा-नैकान्त्याद्गुरुलघुतयार्थेषु धनिनामवस्था वस्तूनि प्रथयति च संकोचयति च ॥ ४५ ॥

सं० टी०—वस्तूनां गुरुत्वलघुत्वहेतुरवस्थाभेदो नान्य इत्याह । परिक्षीणेति । कश्चित् पुरुषः क्षीणो दरिद्रः सन् यवानां प्रसृतये तुषाय स्पृहयति स्पृहां करोति। स एव पश्चादग्रे लक्ष्म्या सम्पूर्णः सन्निमां धरित्रीं तृणसमां तृणतुल्यां गणयति। अतो धनिनामनैकांत्यादेकस्थितेरभावा-दवस्थाऽर्थेषु प्रयोजनेषु गुरुलघुतया वस्तूनि प्रथयति संकोचयति च। यदा कालेनावस्थाया गुरुत्वं भवति तदा गुरुत्वमेवेच्छति। यदा च तस्या लघुत्वं भवति तदा लघुत्वमेवाङ्गीकरोति। एवं कालपरत्वेनावस्थाभेदो भवति। शिखरिणीवृत्तमिदम् ॥ ४९ ॥

भा० टी०—जब कोई मनुष्य दरिद्री होताहै तब तौ वह केवल एक अंजलि जौंकि इच्छा करताहै, परन्तु वही मनुष्य जब सर्वसम्पन्न अर्थात् धनी होजाताहै तब पृथ्वीको तृणसमान समजता है, इसलिये येहि दौनों चंचलअवस्था मनुष्यको गुरु और लघु बनाती हैं तथा वस्तुओंको फैलाती और समेटती है ॥ ४५ ॥

छपय्य—होत वहै धनहीन तबै अंजलि जौ मांगत ॥ धन पाये वैराग्यताहि सहि तृणसम लागत ॥ दशा यहीं दोन रहिं लघु अरु दीर्घ वनावे। कराहिं नीचको ऊंच ऊंचकों नीच ज-नावें ॥ कवहुं करें संकोच कवहुं तिनको विस्तारें ॥ धन्य धन्य वे धीर हुहुं न जो एक निहारें ॥ ४५ ॥

राजन्दुधुक्षसि यदि क्षितिधेनुमेनां तेनाद्य वत्समिव लोकममुं पुषाण ॥ तस्मिंश्च सम्यगनिशं परिपोष्य-माणे नानाफलैः फलति कल्पलतेव भूमिः ॥ ४६ ॥

सं० टी०—इदानीं राज्ञा भूमिपालनप्रकारमाह। राजन्निति। हे राजन्। यद्येनां क्षिति-धेनुं पृथ्वीरूपां धेनुं दुधुक्षसि दोग्धुमिच्छसि। तेन दोहनेनाद्याधुनेमं लोकं प्रजां वत्समिव पुषाण

पोषयेति। तस्मिन् लोके वत्से सम्यक् परिपोष्यमाणे सतीयं भूमिः कल्पलतेवानिशं सर्वकालं न फलैः फलति फलं ददाति। वसन्ततिलकावृत्तमिदम् ॥ ४६ ॥

भा० टी०—हे राजन्! यदि तुम पृथ्वीरूपी धेनुको दुहा चाहतेहो प्रजारूपी बछडेको तन मन धनसे पालन करो, यदि उसका पालन भलीभ कियाजायगा तौ पृथ्वी कल्पवृक्षकेसमान अनेकप्रकारके फल देगी ॥ ४६ ॥

दोहा—धेनु धराकौ चहत पय प्रजा वत्स करि मान।
याकौ परिपोषण किये कल्पवृक्ष सम जान ॥ ४६ ॥

सत्यानृता च परुषा प्रियवादिनी च हिंस्रा दयालुरपि चार्थपरा वदान्या ॥ नित्यव्यया प्रचुरनित्यधनागमा च वेश्याङ्गनेव नृपनीतिरनेकरूपा ॥ ४७ ॥

सं० टी०—अधुना नृपनीतिर्वेश्याङ्गनेवानकरूपेत्याह। सत्येति कुत्राचिदव्ययं सर्वत्र वक्तव्यम कुत्रचित्सत्या सत्यत्वेन, अनृतानृतत्वेन, परुषा काठिन्येन, मृदुवादिनी मधुरभाषणेन, हिंस्रा हिंसय दयालुः कृपालुत्वेन, अर्थपरार्थग्रहणेन, वदान्या दातृत्वेन, नित्यव्यया धनापगमे, यस्य यन्नियमि तेन प्रचुरं नित्यं धनानामागमनं यस्यां तादृशी। एवं नृपते राज्ञो नीतिः कर्तव्यतानेकरूपा। य वाराङ्गना वेश्या नानावेषान् करोति तथा राजनीतिरपि नानारूपा भवति। उपमालंकारोऽत्र वसन्ततिलकावृत्तमिदम् ॥ ४७ ॥

भा० टी०—राजनीति वेश्याके समान अनेकप्रकारसे वर्तती है, कहीं य सत्य होतीहै, कहीं असत्य होतीहै, कहीं कठोर और कहीं प्रियभाषिणी हो है, कहीं हिंसक और कहीं दयालु होतीहै, कहीं कृपण और कहीं उदार होतीं कहीं अधिक द्रव्यव्यय करनेवाली और कहीं बहुत संचय करनेवाली होती है॥४७

छप्पय—सांची है सब भांति सदा सब बातिन झूठी। कब रोससों भरी कबहु प्रिय बनै अनूठी। हिंसाको डर नाहि दयाहू प्रग दिखावत। धन लैवेकी बान खर्चहू धनको भावत। राखत ज भीर बहु नरनकी सदा सवांरत रहतग्रह। इह भांतिरूप नान रचत गनिकासम नृपनीति यह ॥ ४७ ॥

विद्या कीर्तिः पालनं ब्राह्मणानां दानं भोगो मित्रसंरक्षणं च ॥ येषामेते षड्गुणा न प्रवृत्ताः कोऽर्थस्तेषां पार्थिवोपाश्रयेण ॥ ४८ ॥

सं० टी०—"विद्यादिषट्गुणैर्विना मनुष्याणां नृपाश्रयो व्यर्थः" इत्यधुना वदति । विद्या, र्तिर्यशः, ब्राह्मणानां पालनं रक्षणं, दानं, भोगः, विपद्भ्यो मित्राणां संरक्षणं, एते पूर्वकथिताः द्गुणा येषां न प्रवृत्ता न प्राप्तास्तेषां पार्थिवस्य नृपस्योपाश्रयेणाश्रयेण कोऽर्थः कोऽपि न । लिनीवृत्तमिदम् ॥ ४८ ॥

भा० टी०—विद्या, यश, ब्राह्मणोंका पालन, दान, भोग, और मित्रोंकी ा करना, जिनमें यह छ गुण विद्यमान नहीं हैं उनको राजाकी सेवा करनेसे या मिलसक्ताहै ॥ ४८ ॥

ोहा—विद्या यश द्विजपालना दान भोग सन्मान ।
नृपसेवा इन छः विना निष्फल जान सुजान ॥ ४८ ॥

यद्धात्रा निजभालपट्टलिखितं स्तोकं महद्वा धनं तत्प्राप्नोति मरुस्थलेऽपि नितरां मेरौ ततो नाधिकम् ॥ तद्धीरो भव वित्तवत्सु कृपणां वृत्तिं वृथा मा कृथाः कूपे पश्य पयोनिधावपि घटो गृह्णाति तुल्यं जलम् ॥ ४९ ॥

सं० टी०—"विधात्रा यत् स्वभालपट्टलिखितं ततोऽधिकं कोऽपि न प्राप्नोति" इति घट ष्टान्तेन वदति । यद्धात्रेति विधात्रा ब्रह्मणा यन्निजे स्वकीये भालपट्टे स्तोकमल्पं वा महद्बहुधनं लिखितं देव पुरुषो मरुस्थले निर्जलदेशे मेरौ च सुवर्णाद्रौ नितरां निश्चयेन प्राप्नोति । अतस्त्वं धीरो भव। वेत्तवत्सु द्रव्याढ्येषु कृपणां दीनां वृत्तिं वर्तनं जीवनं वा वृथा मा कृथाः मा कुरु। अत्र दृष्टान्तः । श्य । कूपेऽथवा पयोनिधौ समुद्रे घटः तुल्यं स्वप्रमाणानुसारं जलं गृह्णाति । शार्दूलविक्रीडितं त्तमिदम् ॥ ४९ ॥

भा० टी०—थोडा अथवा बहुत जितना धन विधातानें भागमें लिख दियाहै वह अवश्यही निर्जल और शून्यस्थानोंमेंभी मिलजायगा, परन्तु उससे अधिक जो सुमेरु पर्वतपरभी चलेजाओ तौ न मिलेगा, इसलिये धैर्य धारण करो और धनीके निकट वृथा अपनी दीनताको प्रगट मत करो । देखो ! कुएमें और समुद्रमें घडा समानही जल भरताहै ॥ ४९ ॥

ोहा—भाललिख्यो विधिना सुवह घटै बढै कछु नांहि ।
सुरधर कञ्चन मेरुसम जान लेहु मनमांहि ॥ ४९ ॥

त्वमेव चातकाधारोऽसीति केषां न गोचरः ॥
किमम्भोदवरास्माकं कार्पण्योक्तिं प्रतीक्ष्यसे ॥ ५० ॥

सं० टी०--मेघं प्रति चातकस्योक्तिः । त्वमेवेति । हे अम्भोदवर ! हे मेघश्रेष्ठ ! चातकानामाधारः आश्रयोऽसीति केषां गोचरः प्रत्यक्षं न अपितु सर्वेषां गोचरः । तस्मादस्माकं चातकानां कार्पण्योक्तिं किं प्रतीक्ष्यसे किमुपेक्षसे । अनुष्टुब्वृत्तमिदम् ॥ ५० ॥

भा० टी०--हे मेघश्रेष्ठ ! यह कौन नहीं जानता है कि तुमही हम चातकोंके आधार हौ, फिर अब तुम हमारी दीनताकी क्यों प्रतीक्षा करते हो ॥ ५० ॥

दोहा--मेघ तुह्मे जाने जगत पपिहा प्राणअधार ।
दीनवचन चाहत सुन्यौ यह नहिं उचित विचार ॥५०॥

रे रे चातक सावधानमनसा मित्र क्षणं श्रूयताम-
म्भोदा बहवो वसन्ति गगने सर्वेऽपि नैतादृशाः॥
केचिद्वृष्टिभिरार्द्रयन्ति वसुधां गर्जन्ति केचिद्वृथा यं
यं पश्यसि तस्य तस्य पुरतो मा ब्रूहि दीनं वचः ॥५१॥

सं० टी०--चातकोक्तेरुत्तरमिदम् । रेरे चातकेति । रेरे इति वीप्सा । हे चातक ! सावधानमनसा स्वस्थचेतसा क्षणं क्षणमात्रं श्रूयतां मम वचः इति शेषः । हि यस्माद्गगनेऽम्भोदा मेघा बहवो वसन्ति किन्तु सर्वे एतादृशाः करुणावन्तो न, कुतः केचिद्वृष्टिभिर्वसुधां पृथ्वीमार्द्रयन्ति जलेन सिञ्चन्ति । केचिद्वृथा गर्जन्ति गर्जनां कुर्वन्ति । तस्मात् हे मित्र ! यं यं मेघं पश्यसि तस्य तस्य पुरतोऽग्रे दीनं वचो मा ब्रूहि मा वद ॥ दातारं प्रति याचना कर्तव्या सर्वान्प्रति नेतिभावः । शार्दूलविक्रीडितवृत्तमिदम् ॥ ५० ॥

भा० टी०--हे चातक ! सावधान होकर मेरी बातको सुन, आकाशमें मेघ बहुतसे हैं परन्तु सब एकसे नहीं होते, कितनेही तौ जल बर्पाकर पृथ्वीको तृप्तकरदेतेहैं, कितने वृथाही गर्जना कियाकरतेहैं, इसलिये जिसको तूं देखै उसीकेआगे दीन होकर मत मांग ॥ ५१ ॥

कुण्डलिया--चातक सुन मेरे वचन सावधान मन होय ।
मेघ बहुत आकाशमें प्रकृति जुदी पन जोय॥ प्रकृति जुदी पन जोय

होय परसैं महि भारी ॥ कोई बूंद न देहीं गरज कर उपल प्रहारी॥ तातेसों नें काल लेय मत यह सिर पातक। देखै जोही मेघ ताहि मत माँगे चातक ॥ ५१ ॥

इति द्रव्यप्रशंसा समाप्ता ।

अकरुणत्वमकारणविग्रहः परधने परयोषिति च स्पृहा ॥ सुजनबन्धुजनेष्वसहिष्णुता प्रकृतिसिद्धमिदं हि दुरात्मनाम् ॥ ५२ ॥

सं० टी०—इदानीं दुर्जनानां प्रकृतिसिद्धलक्षणं द्योतयति । अकरुणेति । प्राणिमात्रेषु अकरुणत्वं दयाहीनता, अकारणविग्रहः कारणं विना वैरं, परस्यान्यस्य धने द्रव्ये तथाच परस्य योषिति स्त्रियां स्पृहेच्छा । सुजनेषु बन्धुजनेषु सहिष्णोर्भावः सहिष्णुता न सहिष्णुता असहिष्णुता असहनशीलता । इदं दुरात्मनां प्रकृतिसिद्धं स्वाभाविकं लक्षणमिति शेषः । द्रुतविलम्बितं वृत्तम् ॥ ५२ ॥

भा० टी०—दया न करना, विनाकारणही वैर करना, पराये धन और स्त्रीकी इच्छा करना, कुटुम्बियों और मित्रोंकी बात न सहना, ये सब दुर्जनोंके स्वाभाविक लक्षण हैं ॥ ५२ ॥

दोहा—दयाहीन बिनकाज रिपु, तस्करता परपुष्ट ।
सह न सकल सुख बन्धुकौ, यह सुभावसों दुष्ट ॥५२॥

दुर्जनः परिहर्तव्यो विद्यया भूषितोऽपि सन् ॥
मणिनालङ्कृतः सर्पः किमसौ न भयङ्करः ॥ ५३ ॥

सं० टी०—विद्यावानपि दुर्जनः परिहर्तव्य इति सर्पदृष्टान्तेन वदति । दुर्जन इति । दुर्जनो दुष्टजनः विद्यया भूषितोऽप्यलंकृतोऽपि सन् परिहर्तव्यस्त्याज्योऽस्ति । असौ सर्पो मणिनाऽलंकृतोऽपि भयं करोतीति भयंकरो न किम् । अपितु भयंकर इत्यर्थः । अनुष्टुब्वृत्तमिदम् ॥ ५३ ॥

भा० टी०—दुर्जन यदि विद्यावान्भी हो तोभी उसकी संगति मत करे । क्या मणिसे भूपित सर्प भयंकर नहीं होता ॥ ५३ ॥

सोरठा—विद्यायुतहू होय, तदपि दुष्ट तजदीजिये ।
सर्पजु मणिधर कोय, भयकारी कह कीजिये ॥ ५३ ॥

सं० टी०—लोभश्चेदिति। लोभो लुब्धकता चेदगुणेन गुणरहितेन किं स्वस्योऽपि ...भः सर्वगुणानामन्तरयतीति भावः। यदि पिशुनता दौर्जन्यमस्ति तर्हि पातकैः किं पिशुनता ...ऽपि पातकमिति भावः। सत्यं यथार्थभाषणं चेदस्ति तर्हि तपसा किम्। सत्यमेव सर्वश्रेष्ठं ...पः। यदि मनोऽन्तःकरणं शुचि शुद्धमस्ति तर्हि तीर्थेन तीर्थयात्रया किम्। शुद्धान्तःकरणे ...तीर्थानि तिष्ठन्ति इति भावः। यदि सौजन्यं सुजनताऽस्ति तर्हि निजैरात्मीयजनैः किम्। ...जनस्य सर्वे लोका आत्मीया इति भावः। यदि सुमहिमा सुश्लोकश्चेत् मण्डनैरितरभूषणैः सुन्दर ...लङ्कारधारणैः किम्। सुमहिमैव परमोत्तमभूषणम्। यदि सद्विद्या उत्कृष्टविद्यास्ति तर्हि ...नैः किम्। सर्वधनेषु विद्याधनं श्रेष्ठतमं इति भावः। यद्यपयशोऽपकीर्तिरस्ति तर्हि मृत्युना किं ...स्यैव मृत्युकार्यकारित्वादिति भावः। शार्दूलविक्रीडितवृत्तमिदम् ॥ ५५ ॥

भा० टी०—जिसमें लोभ है उसमें दूसरे अवगुणोंकी क्या आवश्यकता ..., जो कुटिल है उसे और उपाय करनेकी क्या आवश्यकता है, जो सत्यवादी है ...से तपसे क्या प्रयोजन है, जिसका मन शुद्ध है उसको तीर्थ करनेसे क्या अधिक ...गा, जो सज्जन हैं उनको मित्र और कुटुम्बियोंकी क्या कमीहै, यशस्वी ...नुष्योंकेलिये यशसे वढकर दूसरा कौन भूषण है, विद्यावान्को अन्यधनकी ...या आवश्यकता है, जिसको अपयश है उसको मृत्यूसे वढकर क्या चाहिये ...र्थात् अपयशी मनुष्यकेलिये मृत्युही उत्तम है ॥ ५५

छपय्य—भयौ लोभ मनमांहि कहा तव अवगुन चहिये। ...नेन्दा सबकी करत तहां सब पातक लहिये। सत्यवचन तप ...तान शुद्ध मन तीरथ जानहु। होत सुजनता जहां तहां गुण प्रगट ...मानहु। जस जहां कहां भूपण चहै सद्विद्या जहां धन कहा। ...पजस जु छयौ या जगतमें तिन्है मृत्युही है महा ॥ ५५ ॥

शशी[१] दिवसधूसरो[२] गलितयौवना[३] कामिनी[४] सरो[५] विगतवारिजं[६] मुखमनक्षरं[७] स्वाकृतेः[८] ॥ प्रभुर्धनप-[९] रायणः[१०] सततदुर्गतः[११] सज्जनो[१२] ॥ नृपाङ्गणगतः[१३] खलो[१४] मनसि[१५] सप्त[१६] शल्यानि मे[१७] ॥ ५६ ॥

सं० टी०—अधुना स्वमनसि यानि दुःखानि तानि निरूपयति। शशीति। शशी चन्द्रमा दिवसे धूसरो मलिनः, गलितं नष्टं यौवनं तारुण्यं यस्यास्तादृशी कामिनी, विगतं

जाड्यं ह्रीमति गण्यते व्रतरुचौ दम्भः शुचौ कैतवं
शूरे निर्घृणता मुनौ विमतिता दैन्यं प्रियालापिनि॥
तेजस्विन्यवलिप्तता मुखरता वक्तर्यशक्तिः स्थिरे तत्को
नाम गुणो भवेत्स गुणिनां यो दुर्जनैर्नाङ्कितः ॥५४॥

सं० टी०—गुणिनां सर्वे गुणा दुर्जनैः कलंकिता इत्याह । जाड्यमिति । गुणिनां गुणे यो दुर्जनैर्नांकितःस को नाम भवेत् नास्त्येव । तत्कथं ह्रीमति लज्जावति पुरुषे जाड्यं मौर्ख्यं स्थापयन्ति । व्रते रुचिः प्रीतिर्यस्य तस्मिन् पुरुषे दम्भो गण्यते । शुचौ शुचिमति कितवस्य धूर्तस्य भावः कैतवं प्रतारणं धूर्तता शूरे निर्घृणता निर्दयत्वम् । मुनौ मौनवति विमतिता प्रज्ञाराहित्यं वक्तुमशक्तिः । प्रियालापिनि प्रियवक्तरि दैन्यं दीनत्वं । तेजस्विन्यवलिप्तता वक्तरि मुखरता वाचालता । स्थिरे पुरुषे अशक्तिः शक्त्यभावः । एवं सर्वेष्वपि गुणेषु दोषारोपो दुर्जनैः क्रियते । एवं दुर्जनैरङ्कितो न निन्दित इत्थं गुणो नास्ति ॥ शार्दुलविक्रीडितं वृत्तमिदं ॥ ५४ ॥

भा० टी—दुर्जन लज्जावान् पुरुषको मूर्ख, व्रतधारीको दंभी, पवित्रको पाखण्डि, शूरको निर्दयी, मौनव्रत करनेवालेको मूर्ख, मिष्टभाषीको दरिद्री, तेजस्वीको गर्वीला, वक्ताको बकवादी, और स्थिरचित्तवालेको आलसी कहतेहैं, इससे यह ज्ञात होताहै कि ऐसा कोई गुण नहीं है जिसको दुर्जनोंने कलंक नहीं लगाया ॥ ५४ ॥

छप्पय—लज्जायुत जो होंय ताहि मुरख ठहरावत । धर्मवृत्ति मन मांहि ताहि दम्भी कहि गावत । अति पवित्र जो होय ताहि कपटी कहि बोलत । धरै शूरता अंग ताहि पापी कहि तोलत । विक्रमी मत्र प्रियवचन रत तेजवान लम्पट कहत । पण्डित लवार कहै दुष्टजन गुणको तज औगुन गहत ॥ ५४ ॥

लोभश्चेदगुणेन किं पिशुनता यद्यस्ति किं पातकैः
सत्यं चेत्तपसा च किं शुचि मनो यद्यस्ति
तीर्थेन किम् ॥ सौजन्यं यदि किं गुणैः स्वमहिमा यद्यस्ति किं मंडनैः सद्विद्या यदि किं जनैर्धनैर्यशो यद्यस्ति किं मृत्युना॥ ५५ ॥

सं० टी०—लोभश्चेदिति। लोभो लुब्धकता चेदगुणेन गुणरहितेन किं स्वल्पोऽपि लोभः सर्वगुणानाच्छादयतीति भावः। यदि पिशुनता दौर्जन्यमस्ति तर्हि पातकैः किं पिशुनता सर्वोपरि पातकमिति भावः। सत्यं यथार्थभाषणं चेदस्ति तर्हि तपसा किम्। सत्यमेव सर्वश्रेष्ठं तपः। यदि मनोन्तःकरणं शुचि शुद्धमस्ति तर्हि तीर्थेन तीर्थयात्रया किम्। शुद्धान्तःकरणे सर्वतीर्थानि तिष्ठन्ति इति भावः। यदि सौजन्यं सुजनताऽस्ति तर्हि निजैरात्मीयजनैः किम्। सुजनस्य सर्वे लोका आत्मीया इति भावः। यदि सुमहिमा सुश्लोकश्चेत् मण्डनैरितरभूषणैः सुन्दर वस्त्रालंकारधारणैः किम्। सुमहिमैव परमोत्तमभूषणम्। यदि सद्विद्या उत्कृष्टविद्यास्ति तर्हि धनैः किम्। सर्वधनेषु विद्याधनं श्रेष्ठतमं इति भावः। यद्यपयशोऽपकीर्तिरस्ति तर्हि मृत्युना किं तस्यैव मृत्युकार्यकारित्वादिति भावः। शार्दुलविक्रीडितवृत्तमिदम् ॥ ५५ ॥

भा० टी०—जिसमें लोभ है उसमें दूसरे अवगुणोंकी क्या आवश्यकता है, जो कुटिल है उसे और उपाय करनेकी क्या आवश्यकता है, जो सत्यवादी है उसे तपसे क्या प्रयोजन है, जिसका मन शुद्ध है उसको तीर्थ करनेसे क्या अधिक होगा, जो सज्जन हैं उनको मित्र और कुटुम्बियोंकी क्या कमीहै, यशस्वी मनुष्योंकेलिये यशसे वढकर दूसरा कौन भूषण है, विद्यावान्को अन्यधनकी क्या आवश्यकता है, जिसको अपयश है उसको मृत्यूसे वढकर क्या चाहिये अर्थात् अपयशी मनुष्यकेलिये मृत्युही उत्तम है ॥ ५५

छपय्य—भयौ लोभ मनमांहि कहा तव अवगुन चहिये। निन्दा सवकी करत तहां सव पातक लहियै। सत्यवचन तप जान शुद्ध मन तीरथ जानहु। होत सुजनता जहां तहां गुण प्रगट प्रमानेहु। जस जहां कहां भूषण चहै सद्विद्या जहां धन कहा। अपजस जु छयौ या जगतमें तिन्है मृत्युही है महा ॥ ५५ ॥

शशी दिवसधूसरो गलितयौवना कामिनी सरो विगतवारिजं मुखमनक्षरं स्वाकृतेः॥ प्रभुर्धनपरायणः सततदुर्गतः सज्जनो॥ नृपाङ्गणगतः खलो मनसि सप्त शल्यानि मे ॥ ५६ ॥

सं० टी०—अधुना स्वमनसि यानि दुःखानि तानि निरूपयति। शशीति। शशी चन्द्रमा दिवसे धूसरो मलिनः, गलितं नष्टं यौवनं तारुण्यं यस्यास्तादृशी कामिनी, विगत

वारिजं कमलं यस्मात्तत् सरः सरोवरम् (शोभना आकृतिर्यस्य) स्वाकृतिस्तस्य (न वि॰ अक्षराणि वर्णाः यस्मिंस्तत्) अनक्षरं मुखं, सततदुर्गतः निरन्तरं दारिद्र्यं प्राप्तः सज्जनः, नृपस्य राज्ञोऽगणे चत्वरे गतः प्राप्तः खलो दुर्जनः, एते सप्तेमे मम मनसि शल्यानि शल्य प्रहारं कुर्वन्ति ॥ पृथ्वीवृत्तम् ॥ ५६ ॥

भा॰टी॰—दिनका मलिनचन्द्रमा, यौवनहीन स्त्री, कमलरहित सरो॰ सुन्दर रूपवान् मनुष्य मूर्ख, धनवान् कृपण, सज्जनपुरुष दरिद्री, और राज॰ धामें दुष्ट, ये सातों हमारे हृदयमें कांटेके समान खटकतेहैं ॥ ५६ ॥

कुण्डलिया-दोहा—फीकौ है शशि दिवसमें कामिन ॰ वनहीन । सुन्दर मुख अक्षरविना सरवर पंकज छीन । ॰ पंकजछीन होत प्रभु लोभी धनकौ । सज्जन कपटी होत नृ॰ ढिगवास खलनकौ । ऐ सातों हैं शल्य परम छेदत या जीके वृजनिधि इनकों देख होत मेरो मन फीकौ ॥ ५६ ॥

न कश्चिच्चण्डकोपानामात्मीयो नाम भूभुजाम् ॥
होतारमपि जुह्वानं स्पृष्टो दहति पावकः ॥ ५७ ॥

सं॰ टी॰—अत्यन्तक्रोधिनो नृपस्य कोऽपि प्रीयार्हो न भवतीति पावकदृष्टान्तेनाह ने॰ चण्डकोपानामुग्राणां भूभुजां राज्ञां कश्चिदात्मीयः प्रीत्यर्हो न भवति, यथा पावकोऽग्निर्होतारं कर्तारमपि जुह्वानं होमसमयेऽपि स्पृष्टः सन्दहति । अनुष्टुब्वृत्तम् ॥ ५७ ॥

भा॰ टी॰—अत्यन्त क्रोधि राजाओंका कोईभी मित्र नहींहोता होमकरनेवालेकोभी अग्नि आहुति देतेसमय स्पर्शकरतेही जलादेताहै ॥ ५७

दोहा—जे अतिपापी भूप तें काहूसों न कृपाल ।
होमकरतहूं द्विजनकों दहत अग्निकी ज्वाल ॥ ५७

मौनान्मूकः प्रवचनपटुश्चाटुलो जल्पको वा धृष्टः पार्श्वे वसति च तदा दूरतश्चाप्रगल्भः ॥ क्षान्त्या भीरुर्यदि न सहते प्रायशो नाभिजातः सेवा-धर्मः परमगहनो योगिनामप्यगम्यः ॥ ५८ ॥

सं० टी०—इदानीं सेवाधर्मकाठिन्यमाह—मौनेति। यदि सेवकेन मौनं धृतं तर्हि मूकः। प्रवचनपटुश्चेद्वातुलो वातार्दितोऽथवा जल्पको वाचालः। पार्श्वे स्थितः सन् धृष्टः, दूरतो भवति चेद-प्रगल्भः। क्षान्तिः क्षमा धृता चेत् भीरुर्भयशीलः। यदि न सहते तदा नाभिजातः मूर्खोऽप्रयोजकः; एवं प्रायशः सेवाधर्मः परमगहनः कठिनो योगिनामप्यगम्यः कर्तुमशक्यः। मन्दाक्रान्तावृत्त-मिदम् ॥ ५८ ॥

भा० टी०—यदि सेवक मौन रहे तौ मूक गिनाजाताहै, यदि बोलनेमें चतुर हो तौ वातूनी अथवा बकवादी समझाजाताहै, यदि पास रहे तौ ढीट और दूर रहे तौ मूर्ख कहाताहै, यदि सहनशील हो तौ डरपोक और असहनशील हो तौ कुलहीन कहाजाताहै, सारांश यहहै कि सेवाधर्म अत्यन्त कठिन है, योगियोंसेभी होना दुर्गम है ॥ ५८ ॥

दोहा—चुप गूंगो लापर वचन निकट ढीठ जड दूर।
क्षमाहीन परिहास खलसेवा कष्टहि पूर ॥ ५८ ॥

उद्भासिताखिलखलस्य विशृङ्खलस्य प्राग्जातवि-स्तृतनिजाधमकर्मवृत्तेः॥ दैवादवाप्तविभवस्य गुण-द्विषोऽस्य नीचस्य गोचरगतैः सुखमास्यते कैः ॥५९॥

सं० टी०—येऽधमजनान् सेवन्ते ते सुखिनो न भवन्तीत्याह। उद्भासितेति। नीचस्य क्षुद्रजनस्य गोचरगतैः समीपवर्तिभिः पुरुषैः कैः सुखमास्यत उपविश्यते। कथम्भूतस्य नीचस्य उद्भासिताखिलखलस्य उद्भासिताः प्रकटीकृता अखिलाः समस्ताः खला येन। पुनः प्राक् पूर्वजाता इदानीं विस्तृता निजा स्वकीया धर्मकर्मणां वृत्तिर्येन। एवं सति दैवाददृष्टवशात् प्राप्तो विभवो येन। पुनः कथम्भूतस्य गुणान् सद्गुणान् द्विषतीति गुणद्विट् तस्य गुणद्विषः। एवम्भूतगुणस्य समीपे कैरपि सुखेन नैव उपविष्टुं शक्यतेऽथवा सुखं प्राप्यते। वसन्ततिलकावृत्तमिदम् ॥ ५९ ॥

भा० टी०—जिसकी सम्पूर्ण दुष्टता भलीप्रकार प्रगट होगईहै, जिसके पूर्वजन्मके अधमकर्म इसजन्ममें उदय होरहेहैं, जो दैवात् धनी होगयाहै, और जो अच्छेगुणोंसे द्वेष रखताहै, ऐसे निरङ्कुश नीचके पास बैठनेसे कौन सुख पाताहै ॥ ५९ ॥

कुण्डलिया—संग न करिये दुष्टकौ जासों होय उपाध ॥
पूर्वजन्मके पाप सब उपज उठावें व्याध ॥ उपज उठावें व्याध
दैवबल होय धनीसो ॥ शुभगुण राखै द्वेष कुबुधकों मित्र

करैसो ॥ निपट निरंकुश नीच तासु चितरंग न धरिये ॥ दुर्गु
दुर्गुणखान तासुकौ संग न करिये ॥ ५९ ॥

आरम्भगुर्वी क्षयिणी क्रमेण लघ्वी पुरा वृद्धिमती च पश्चात् ॥ दिनस्य पूर्वार्द्धपरार्द्धभिन्ना छायेव मैत्री खलसज्जनानाम् ॥ ६० ॥

सं० टी०—अधुना खलसज्जनयोर्मित्रताया विभिन्नतां वर्णयति । आरम्भगुर्वी इति आरम्भे प्रारम्भे गुर्वी महती । क्रमेण क्षयिणी प्रतिक्षणं क्षयशीला, पुरा पूर्वं लघ्वी पश्चात् वृद्धिरस्यास्तीति वृद्धिमती, दिनस्य पूर्वार्धे च परार्द्धे च ताभ्यां भिन्ना छायेव खला दुर्जनाश्च सज्जनाः साधवश्च तेषां मैत्री मित्रता भवति । यथा दिवसपूर्वार्द्धे छाया महती तदुत्तरे दिवसक्षये क्षयिणी तथा खलानां मैत्री आरम्भे गुर्वी परिणामे लघ्वी भवति । यथा दिनपरार्द्धे आरम्भे छाया लघ्वी पश्चात् दिनक्षये वृद्धिमती भवति तथा सज्जनानां मित्रता आरम्भे लघ्वी परिणामे वृद्धिमती भवतीत्यर्थः । उपजातिवृत्तमिदम् ॥ ६० ॥

भा० टी०—दुर्जनमनुष्यकी प्रीति प्रातःकालके अनन्तरकी छाया समान है, जो प्रारम्भमे लम्बी चौडी होती है और फिर क्रमसे घटती जाती है परन्तु सज्जनकी मित्रता मध्यान्हके उपरान्तकी छायाके समान है, जो प्रारम्भ में कम होतीहै और फिर वढतीही जातीहै ॥ ६० ॥

कुण्डलिया—छाया जैसी प्रातकी तैसी दुर्जनप्रीति पहिले दीरघ होय पुनि घटनलगे तजरीति ॥ घटनलगै तजरीति प्रीतिकौ करै वहानौ ॥ पै सज्जनकी प्रीति विरुध याके मन मानौ ॥ पहिलै सूक्ष्मरूप फेर दिनरात सवाया ॥ सज्जन प्रीति बढै नित ऐसै ज्यों संध्याकी छाया ॥ ६० ॥

मृगमीनसज्जनानां तृणजलसंतोषविहितवृत्तीनाम् ॥ लुब्धकधीवरपिशुना निष्कारणवैरिणो जगति ॥ ६१ ॥

सं० टी०—"लुब्धकादयः प्रयोजनंविना वैरिणो भवन्ति" इति वदति । मृगमीनेति अस्मिन् जगति संसारे लुब्धको व्याधः "व्याधो मृगवधाजीवो मृगयुर्लुब्धकश्च स" इत्यमरः । धीवरः कैवर्तः "कैवर्ते दाशधीवरौ" इत्यमरः । पिशुनो दुर्जनः "पिशुनो दुर्जनः खलः" इत्यमरः ॥ एते निष्का

[illegible] एतेषां इति जीवने येषां तेषां मृगमीनसज्जनानां लुब्धकधीवरपिशुना वैरिणो भवन्ति । आर्यावृत्तमिदम् ॥ ६१ ॥

भा० टी०—हरिण घास खाकर रहताहै तबभी व्याध उससे वैर कर-ताहै, मछली जलपीकर रहतीहै तबभी मछुआ उससे वैर रखताहै, और सज्जन सन्तोषरूपसे जीतेहैं तोभी दुर्जन उनके शत्रु होजातेहैं, इन तीनोंसे इन तीनों-का वैर इस संसारमें विनाकारणही होताहै ॥ ६१ ॥

दोहा—खाही जल मृगके सुचन सज्जन हितकर जीव ।
लुब्धक धीवर दुष्टजन बिनकारण दुख कीव ॥ ६१ ॥

इति दुर्जननिन्दाप्रकरणम् ।

॥ अथ सुजनप्रशंसा ॥

वाञ्छा सज्जनसङ्गमे परगुणे प्रीतिर्गुरौ नम्रता
विद्यायां व्यसनं स्वयोषिति रतिर्लोकापवादाद्भयम् ॥
भक्तिः शूलिनि शक्तिरात्मदमने संसर्गमुक्तिः खलेष्वेते
येषु वसन्ति निर्मलगुणास्तेभ्यो नरेभ्यो नमः ॥ ६२ ॥

सं० टी०—नम्रतादिगुणभूषिता नरा नमस्कारार्हा भवन्तीत्याह । वाञ्छेति । सज्जनानां साधुजनानां संगमे समागमे वाञ्छा इच्छा, परेषां गुणे प्रीतिरभिरुचिः, गुरौ नम्रता, विद्यायां व्यसनमासक्तिः, स्वस्यात्मनो योषिति स्त्रियां रतिः प्रीतिः, लोकापवादात् लोकनिन्दाया भयं, शूलिनि शिवे भक्तिः, आत्मनो मनसो दमने निग्रहे शक्तिः सामर्थ्यम्, खलेषु पिशुनेषु संसर्गः सम्बन्धस्तस्य मुक्तिस्त्यागः । एते ये निर्मला निर्दोषा गुणास्ते येषु वसन्ति तेभ्यो नरेभ्यो नमः नमस्कारोऽस्तु । शार्दूलविक्रीडितं वृत्तमिदम् ॥ ६२ ॥

भा० टी०—सज्जनोंकी संगतिकी इच्छा, दूसरेके गुणोंसे प्रसन्न होना, बडेलोगोंके सामने झुकना, विद्या पढनेमें मन लगाना, अपनी स्त्रीसे प्रीति करना, लोकनिन्दासे डरना, ईश्वरमें भक्ति, अपने मनको वशमें रखना, और दुष्टकी संगतिको त्यागना, ये सब उत्तमगुण जिसमें विद्यमान हैं उन महापुरुषोंको नमस्कार है ॥ ६२ ॥

संं० टी०—इदानीं सतां महत्त्ववैचित्र्यं वर्णयति । प्रदानमिति । प्रदानं प्रकर्षेण यद्दत्तं प्रच्छन्नमाच्छादितं, गृहमुपगते प्राप्ते सम्भ्रमविधिरादरविधिः, प्रियं कृत्वा मौनमेकस्य प्रियं कृत चेन वदति । सदसि सभायामुपकृतेरेकेनोपकारः कृतस्तस्य कथनं करोति । लक्ष्म्यां सत्यामनुत्सेकोऽगर्वः । परस्य सत्कथाः निरभिभवसाराः निन्दारहिताः निरवधि कर्तव्याः । इदं व्रतमसिधारावत्कठिनं सता केनोपदिष्टं न केनापि । अयं सतां स्वाभाविको गुणः । शिखरिणीवृत्तमिदम् ॥ ६४ ॥

भा० टी०-दानको गुप्तरखना, घरपर आयेहुए महमानका आदर करना, पराया भलाकर चुप रहना, दुसरोंके कियेहुए उपकारका सभामें वर्णनकरना, धन पाकर घमण्ड न करना, और पराई चर्चा निन्दारहित करना, ये तलवारकी धारके समान कठिनव्रतका सज्जनोंकेलिये किसने उपदेश दियाहै. ॥ ६४ ॥

छप्पय—दियौ जनावत नांहि गयें घर कर सतआदर । हितकर साधत मौन कहत उपचार वचन वर । काहूकों दुख होय कथा वह कवहुन भाषत । सदां दानसों प्रीति नीतियुत सम्पत राखत । यह खड्गधारव्रत धारकै जे नर साधत मन वचन । तिनकौसुनुहां इह लोकमें पूर रह्यौ जसही रचन ॥६४॥

करे श्लाघ्यस्त्यागः शिरसि गुरुपादप्रणयिता मुखे सत्याँ वाणी विजयिभुजयोर्वीर्यमतुलम् ॥ हृदि स्वस्था वृत्तिः श्रुतमधिगतैकव्रतफलं विनाप्यैश्वर्येण प्रकृतिमहतां मंडनमिदम् ॥ ६५ ॥

सं० टी०—दानादिकमेव सज्जनानां भूषणं नान्यदित्याह । कर इति । करे हस्ते त्यागः सत्पात्रे दानं श्लाघ्यः प्रशंसनीयस्तदेव हस्तभूषणम् । शिरसि मस्तके गुरोः गुरुजनस्य पादयोश्चरणयोः प्रणयिता नम्रता । मुखे सत्या वाणी यथार्थकथनं तदेव मुखभूषणम् । विजयिभुजयोरतुलं निरुपमं वीर्यं पराक्रमः (युधि विक्रम एव भूजयोर्भूषणं कंकणं न) हृदि हृदये स्वस्था निर्मला वृत्तिर्वर्तनम् । निर्मल वृत्तिरेव हृदयस्य भूषणं नान्यः । अधिगतं प्राप्तं एकं मुख्यं व्रतमीश्वर प्राप्तिसाधनं तदेव तस्य फलं येन तत् श्रुतं शास्त्राध्ययनम् । इदमैश्वर्येण वैभवेन विनाऽपि प्रकृत्या स्वभावेन ये महान्तस्तेषां मण्डनं भूषणम् । शिखरिणीवृत्तमिदम् ॥ ६५ ॥

भा० टी०--हाथकी शोभा दानसे है, शिरकी शोभा बडोंके प्रणाम० है, मुखकी शोभा सत्य वोलनेसे है, भुजाओंकी शोभा युद्धमें अतुल विक्रम है, हृदय स्वच्छतासे शोभापाताहै, और कानकी शोभा शास्त्र श्रवण है, और येही सब धन न होनेपरभी सज्जनोंके भूषण हैं ॥ ६५ ॥

छप्पय--करत करत ते दान शीस गुरुचरणन राखत। ... सों बोलत सांच भुजनसों जय अभिलाषत। चितकी नि... वृत्ति श्रवणमें कथा श्रवणरति। निशदिन परउपकारसहित ... जिनकी मति। ते विना साजसम्पत तऊ सोहत सकल ... उनकौ जुसंग नित देहु प्रभु तौ यह सुधरै चपल मन ॥ ६५ ॥

संपत्सु महतां चित्तं भवत्युत्पलकोमलम् ॥
आपत्सु च महाशैलशिलासंघातकर्कशम् ॥ ६६ ॥

सं० टी०---सम्पत्काले आपत्काले च सतामन्तःकरणस्य या वृत्तिर्भवति तां वदति। महतां साधुजनानां चित्तं मनः सम्पत्सु वैभवे उत्पलं कमलं तद्वत् कोमलं मृदु भवति । किन्तु आपत्सु आपत्तिकाले महांश्चासौ शैलश्च तस्य शिलानां संघातः समूहस्तद्वत् कर्कशं कठोरं भवति। अनुष्टुव् वृत्तमिदम् ॥ ६६ ॥

भा० टी०—सज्जनमनुष्योंका चित्त धन होनेपर कमलसेभी अधिक कोमल होजाताहै । परन्तु आपत्तिमें उनका चित्त पत्थरसेभी कठिन होजाताहै॥६६॥

सोरठा—सतपुरुषनकी रीति सम्पत्में कोमलहि मन ।
दुखहीमें यह रीति वज्रसमानहि होत तन ॥ ६६ ॥

संतप्तायसि संस्थितस्य पयसो नामापि न ज्ञायते
मुक्ताकारतया तदेव नलिनीपत्रस्थितं राजते ॥
स्वात्यां सागरशुक्तिमध्यपतितं तन्मौक्तिकं जायते
प्रायेणाधममध्यमोत्तमगुणाः संसर्गतो देहिनाम् ॥ ६७ ॥

सं० टी०—पुरुषस्योत्तममध्यमाधमगुणाः संसर्गात् जायन्तेइति जलदृष्टान्तेनाह । सन्तप्तेति । एकमेव जलं तत्संसर्गतोऽनेक गुणं भवति । तद्यथा । सन्तप्तायसि सन्तप्ते लोहे क्षितं चेत्पयसो नामापि न ज्ञायते अभाव एव । तदेव जलं नलिनीपत्रे स्थितं मुक्ताकारतया राजते । तदेव जलं स्वातीमहानक्षत्रे मेघात् सागरे पतितं तदपि शुक्तिकामध्यगतं चेत् मुक्ताफलं जायते । एवं प्रायेण प्रायशः पुरुषस्योत्तममध्यमाधमगुणाः संसर्गतो जायन्ते । तस्मात् मनुष्यदेहधारिभि-रुत्तमा संगतिः कार्या न मध्यमाधमे इति भावः । शार्दूलविक्रीडितं वृत्तमिदम् ॥ ६७ ॥

भा० टी०—तप्तलोहेपर पडनेसे पानीकी बूंदका नामभी नहींरहता, परन्तु वही बूंद कमलके पत्तोंपर गिरनेसे मोतीकेसमान दीखतीहै, और वही बूंद स्वातीनक्षत्रमें समुद्रकी सीपोंमें पडनेसे मोती बनजातीहै, इससे यह जानपडता है कि मनुष्यके उत्तम, मध्यम, और अधमगुण संसर्गसेही होतेहैं ॥ ६७ ॥

सोरठा—तवे बुन्द ह्वै क्षीण कमलपत्र जे सरस हैं ।
मुक्ता सीपहि कीन थान मान अपमान है ॥ ६७ ॥

यः प्रीणयेत्सुचरितैः पितरं स पुत्रो यद्भर्तुरेव हित-
मिच्छति तत्कलत्रम् ॥ तन्मित्रमापदि सुखे च
समक्रियं यदेतत्त्रयं जगति पुण्यकृतो लभन्ते ॥ ६८ ॥

सं० टी०—उत्तमपुत्रकलत्रमित्रान् सुकृतिन एव प्राप्नुवन्तीति द्योतयति । य इति । यः सुचरितैः सदाचरणैः पितरं स्वजनकं प्रीणयेत सन्तोषयेत् स एव पुत्रो नान्यः । यद्भर्तुरेव हितं कल्याणमिच्छति तदेव कलत्रं भार्या । नान्यं इति शेषः । यदापदि आपत्काले सुखे च (समाना क्रिया यस्य तत) समानक्रियं तदेव मित्रं सुहृत । एतत् त्रयं जगति लोके पुण्यकृतः सुकृतिनो लभन्ते प्राप्नुवन्ति । वसन्ततिलकावृत्तमिदम् ॥ ६८ ॥

भा० टी०—जो अपने उत्तमचरित्रोंसे पिताको प्रसन्न रखताहै, यथार्थमें वही पुत्र है, जो अपने पतिका सदैव हित चाहतीहै यथार्थमें वही स्त्री है, और जो सुख और दुःख दोनोंमें समान रहै वही सच्चा मित्र है, ये तीनों इस संसारमें पुण्यवान्कोही मिलतेहैं ॥ ६८ ॥

दोहा—पुत्रचरित तियहितकरन, सुखदुखमित्रसमान ।
मनरंजन तीनों मिलैं पूरवपुण्यहि जान ॥ ६९ ॥

एको देवः केशवो वा शिवो वा एकं मित्रं भूप-
तिर्वा यतिर्वा ॥ एको वासः पत्तने वा वने वा
एका नारी सुन्दरी वा दरी वा ॥६९॥

सं० टी०--प्रवृत्तिनिवृत्तिमार्गप्रकारभेदमाह । एक इति । एको मुख्यो देवः (प्रशस्त
केशाः यस्य स) केशवः 'केशाद्वोन्यतरस्यामिति व प्रत्ययः' विष्णुर्वा शिवः शंकरो वा । एकं मु
मित्रं भूपति राजा वा यतिः सन्यासी वा । एको मुख्यो वासो वसतिस्थानं पत्तने नगरे वने
वा एका मुख्या नारी भार्या सुंदरी सुरूपा वा दरी पर्वतगुहा वा । शालिनीवृत्तमिदम् ॥ ६९ ॥

भा० टीका०—एक देवकीही सेवा करनी चाहिये केशव हो अथवा शिव,
एकही मित्र करना उचित है, राजा हो वा तपस्वी, एक स्थानपरही रहना उचित
है नगर हो, अथवा वन, और एकहीसे प्रीति करना उचित है सुन्दरी स्त्री हो
अथवा पर्वतकी गुफा हो ॥ ६९ ॥

कुण्डलिया--सेवहु केशवदेवकों कै शिवकी कर सेव । मित्र
एककर नृपतिकों कै जोगेश्वर देव । कै जोगेश्वर देव दुहुनमें एक
हितू कर । करिये नगर निवास किधों वनवास करहु ढरि । पुत्रवती
तियसंग अंग अंगन भेंटे वहु । कर गिरिगुहाप्रसंग प्रीतिसों
नितप्रति सेवहु ॥ ६९ ॥

नम्रत्वेनोन्नमन्तः परगुणकथनैः स्वान् गुणान् ख्या-
पयन्तः स्वार्थान् सम्पादयन्तो विततप्रियतरारम्भ-
यत्नाःपरार्थे ॥ क्षान्त्यैवाक्षेपरूक्षाक्षरमुखरमुखान्
दुर्जनान् दूषयन्तःसन्तःसाश्चर्यचर्या जगति बहु-
मताः कस्य नाभ्यर्चनीयाः ॥ ७० ॥

सं० टी०--अस्मिन् संसारे नम्रत्वादिगुणसंयुक्ता बहुमान्याः साधवोऽर्चनीया भवन्तीत्याह ।
नम्रत्वेनेति । नम्रत्वेनोन्नमन्त उच्चा मान्या भवन्ति । स्वान् स्वकीयान् गुणान् परेषां गुणानां कथनैः
सह ख्यापयन्तः कथयन्तः स्वान् गुणान् स्वयं न वदन्ति, परेषां गुणानुवादाः क्रियन्ते तैरेव प्रसंगेन
स्वगुणानुवर्णनं क्रियते इति कृत्वा स्वार्थान् सम्पादयन्तः, परस्यार्थे वितता विस्तृताः 'प्रियतराश्चारम्भाः

...मर्माणि मन्त्राश्च येषां ते, आक्षेपाश्च ते रूक्षाक्षराश्च तैर्मुखराणि मुखानि येषां तान् दुर्जनान् क्षान्त्यैव तस्मैव दूषयन्त आश्चर्येण सहिता साश्चर्या गतिर्येषां तथाभूता जगति बहुमता मान्याः सन्तः कस्य नाभ्यर्थनीयाः पूजनीया न भवन्ति । एवंभूताः सन्तः सर्वेषां पूज्या एवेतिभावः स्रग्धरावृत्तमिदम् ॥ ७० ॥

भा० टी०—जो नम्रतासे ऊंचे होतेहैं, जो औरोंके गुणोंका बखान करनेसे अपने गुणोंको प्रसिद्ध करतेहैं, जो औरोंका उपकार करते हुए अपना कार्यभी साधन करतेहैं, जो क्षमाहीसे दुर्जनोंके निन्दा और कठोरवचनोंसे पूर्ण मुखको दूषित करतेहैं, ऐसे अद्भुत आचरणवाले सन्तोंको जगत्में कौन पूजनीय नहीं समजताहै ॥ ७० ॥

छप्पय—नीचे व्हे कै चलत होत सबसे ऊंचे अति । परगुण कीरत करत आपगुण ढाकत यह मति । आपन अरथ विचार करत निशिदिन परमारथ । दुष्ट दुर्वचन् कहत क्षमा कर स्वारथ स्वारथ । नित रहत एकरस सबनसों वचन कोप कर कहत नहिं । ऐसे जु सन्त या जगतमें पूजावत सबके सुतंत्र हि ॥७०॥

इति सज्जनप्रशंसाप्रकरणम् ।

भवन्ति[4] नम्रा[3]स्तरवः[1] फलोद्गमै[2]र्नवाम्बुभिर्भूरि[7] विलम्बिनो घनाः ॥ अनुद्धताः[11] सत्पुरुषाः[9] समृद्धिभिः[10] स्वभाव[14] एवैष[15,16,13] परोपकारिणाम्[12] ॥ ७१ ॥

सं० टी०—अधुना वृक्षदृष्टान्तेन परोपकारिणां स्वभावं वर्णयति । भवन्तीति । यथा फलानामुद्गमैः प्रादुर्भावैस्तरवो वृक्षा नम्रा भवन्ति, घना मेघाः नवानि नूतनान्यम्बूनि जलानि तै र्भूमि विलम्बन्त इति भूमिविलम्बिनो भवन्ति । तथा सत्पुरुषाः सज्जनाः समृद्धिभिरैश्वर्यैरनुद्धता भवन्ति उद्धता न परोपकारिणामेषः स्वभावोऽस्ति । वंशस्थं वृत्तमिदम् ॥ ७१ ॥

भा० टी०—जैसे फल आनेपर वृक्ष नमजातेहैं, जैसे नवीनजलसे पूर्ण होनेपर मेघ पृथ्वीपर झुकजातेहैं, वैसेही सज्जनमनुष्यभी धन पाकर नम्र हो जातेहैं, अभिमान नहीं करते· कारण यह है कि परोपकारीमनुष्योंका स्वभावही ऐसा होताहै ॥ ७१ ॥

भा० टी०—अपने मित्रको पापसे बचाना, हितकर्ममें लगाना, उसकी गुप्तवातको गुप्त रखना, मित्रके गुणोंको प्रकटकरना, दुःखमें मित्रका संग न छोडना, और समयपर सहायता करना, ये उत्तममित्रोंके लक्षण सन्तोंने कहेहैं॥७३॥

दोहा—पाप निवारत हित करत गुन गनि औगुन ढांकि।
दुखमें राखत देत कछु सन्मित्रन ये आंकि ॥ ७३ ॥

पद्माकरं दिनकरो विकचीकरोति चन्द्रो विकास-
यति कैरवचक्रवालम् ॥ नाभ्यर्थितो जलधरोऽपि
जलं ददाति सन्तः स्वयं परहिते सुकृताभियोगाः॥७४॥

सं० टी०—"सन्तः स्वयमेव परहितं कुर्वन्ति" इति दिनकरादिदृष्टान्तेन द्योतयति। पद्माकरमिति पद्माकरं सूर्यविकासिकमलानामाकरं समुदायं दिनकरः सूर्यः विकचीकरोति। प्रफुल्लं करोति। 'प्रफुल्लोत्फुल्लसंफुल्लव्याकोशविकचस्फुटाः' इत्यमरः। तथैव चन्द्रो रात्रिविकासिकैरवानां कुमुदानां चक्रवालं समुदायं विकासयति विकासितं करोति। एवं जलधरो मेघोऽपि नाभ्यर्थितः सन् जलं ददाति। यतः सन्तः स्वयं परहिते सुकृताभियोगा अप्रार्थिताः सन्तः स्वयं परहितं कुर्वन्ति। तेषां स्वभाव एवायम्। वसन्ततिलकावृत्तमिदम् ॥ ७४ ॥

भा० टी०—सूर्य स्वयंही कमलोंको विकसितकरताहै, चन्द्रमा स्वयंही कुमुदिनीको प्रफुल्लितकरताहै, और मेघ विनामांगेही जल वर्षाताहै, इसका यह कारण हैकि सज्जनमनुष्य आपही विनाकहे औरोंके भला करनेमे तत्पर रहतेहैं ॥७४॥

दोहा—शशि कुमुदिनि प्रफुलित करत कमल विकासत भानु।
विन मांगत घन देत जल त्योंही सन्त सुजानु ॥७४॥

एके सत्पुरुषाः परार्थघटकाः स्वार्थं परित्यज्य ये॥
सामान्यास्तु परार्थमुद्यमभृतः स्वार्थाविरोधेन ये ॥
तेऽमी मानुषराक्षसाः परहितं स्वार्थाय निघ्नन्ति ये ॥
ये निघ्नन्ति निरर्थकं परहितं ते के न जानीमहे ॥७५॥

सं० टी०—एक इति। स्वार्थं परित्यज्य त्यक्त्वा ये परार्थघटकाः परकार्यं कुर्वन्ति ते सत्पुरुषाः। स्वार्थस्याविरोधेनादौ स्वकार्यं कृत्वा पश्चात् परकार्यं ये कुर्वन्ति ते सामान्या सज्जनाः।

सौर आपभी अग्निमें कूदनाही चाहताथा कि पुनः शीतल जलके छीटे पाकर अपने मित्रको लौट आया जान शान्त होगया, सचहै सज्जनोंकी मित्रता ऐसीही होतीहै॥७६॥

कुण्डलिया——पानी पयसों मिलतही जान्यौ अपनौ मित । आप भयौ फीकौ वहै जलकों कियौ सुचित्त । जलकों कियौ सुचित्त तसपयकों जव जानी । तव अपनौ तन वारि वारि मन प्रीतहि आनी । उफन चल्यौ सीध अग्नि शान्ति जल छिरकत ठानी । सत्पुरुषनकी प्रीति रीति ज्यों पय और पानी ॥ ७६ ॥

इतः स्वपिति केशवः कुलमितस्तदीयद्विषामितश्च
शरणार्थिनः शिखरिणां गणाः शेरते ॥ इतोऽपि
वडवानलः सह समस्तसांवर्तकैरहो विततमूर्जितं
भरसहं च सिन्धोर्वपुः ॥ ७७ ॥

सं० टी०——सतां सहनशीलतां समुद्रदृष्टान्तेन दर्शयति । इत इति । अहो इत्याश्चर्ये । सिन्धोः समुद्रस्य वपुर्विततं विस्तृतमूर्जितमतिवलिष्ठं भरं भारं सहत इति भरसहमस्ति । तत् ...यम् । इत एकतो देशे केशवो विष्णुःस्वपिति निद्रां करोति । इतस्तदीयद्विषां तद्वैरिणां कुलं समूहः ...ते । इतश्च शरणार्थिनां शरणागतानां शिखरिणां पर्वतानां गणाः समूहाः शेरते । इतोऽपि ...डवानलः समस्ताः सांवर्तकाः प्रलयकारिणोऽग्नयस्तैः सह शेते । एवं विलक्षणरूपं परस्य भरसहं ...पुरित्याश्चर्यम् । सज्जनाः समुद्रवदुपकारिणः सर्वाधाराश्रयभूताश्च भवन्ति । पृथ्वीवृत्तमिदम् ॥ ७७ ॥

भा० टी०——समुद्रमें एक ओर श्रीविष्णुभगवान् शयन करतेहैं. दूसरी ...ोर उनके शत्रु असुर पडेहैं, एक ओर शरणागत पर्वतोंके समूह पडेहैं, और एक ...ौर वडवानल प्रलयके घोर अग्निसहित जलको औटारहाहै, देखो समुद्र ...विशाल वलवान् और सहनशील है कि इन सवसे विलकुल नहीं घवडाता । सज्जन ...नभी समुद्रके समान अत्यन्त सहनशील होतेहैं ॥ ७७ ॥

छप्पय——इत सोवत श्रीकृष्ण इतें वैरी दानव गन । इत-...ों गिरवर वृन्द सरन सोवत निर्भयमन । इतकों वाडव अग्नि ...हित जलमांहि निरन्तर । मच्छ कच्छ इत्यादि रहत सुखसों सव ...लचर । अतिही अगाध ऊचों अधिक सहनशीलताकी अवध । ...विस्तार अमित कहिये कहा अद्भुत गति राखत उदधि ॥ ७७ ॥

तृष्णां छिन्धि भज क्षमां जहि मदं पापे रतिं मा कृथाः सत्यं ब्रूह्यनुयाहि साधुपदवीं सेवस्व विद्वज्जनम्॥ मान्यान्मानय विद्विषोऽप्यनुनय प्रख्यापय स्वान्गुणान्कीर्तिं पालय दुःखिते कुरु दयामेतत्सतां लक्षणम् ॥ ७८ ॥

सं० टी—अधुना सतां लक्षणं वर्णयति । तृष्णामिति । तृष्णां स्पृहां छिन्धि । क्षान्तिं भज सेवस्व । मदं दर्पं जहि त्यज । पापे पापकर्मणि रतिं प्रीतिं मा कृथाः मा कुरु । सत्यं ब्रूहि, यथार्थ भाषणं कुरु । साधूनां सज्जनानां पदवीं मार्गमनुयाहि अनुगच्छ । विद्वज्जनान् पण्डितजनान् सेवस्व । मान्यान् मानय । विद्विषोऽप्यनुनय सान्त्वय । स्वान् स्वकीयान् गुणान् प्रख्यापय कीर्तिं यशः पालय । दुःखिते दयां कुरु । एतत् सतां सज्जनानां लक्षणम् । शार्दूलविक्रीडितं वृत्तमिदं॥७८॥

भा० टी०—तृष्णाका छेदनकरो, क्षमा धारणकरो, अभिमानका परित्याग करो, पापमें मन मत लगाओ, सत्य वोलो, साधुजनोंकी पदवीको प्राप्तकरो विद्वानोंकी सेवाकरो, मान्यपुरुषोंका आदरकरो, शत्रुकोभी प्रसन्नरक्खो अपने गुणोंको प्रसिद्धकरो, यशका पालन करो, और दुःखियोंपर दया करो, येह सब सत्पुरुषोंके लक्षण हैं ॥ ७८ ॥

छप्पय—तृष्णाकों तजि देहु क्षमाकौ भजन करहु नित दया हियेमें राख पापसों दूर राखि चित । सत्य वचन मुख बोल धर्मपदवी जिय धारहु । सत्पुरुषनकी सेव नम्रता अति विस्तारहु । सब गुणसु अपने गुप्त रखि कीरत पर पालन करहु करि दया दुखित नर देखके सन्त रीति यह अनुसरहु ॥ ७८

मनसि वचसि काये पुण्यपीयूषपूर्णास्त्रिभुवनमुपकारश्रेणिभिः प्रीणयन्तः ॥ परगुणपरमाणून्पर्वतीकृत्य नित्यं निजहृदि विकसंतः सन्ति सन्तः कियन्तः॥७९॥

सं० टी०—अस्मिन् जगति स्वप्रकाशमानानां साधूनां दर्शनमतीव दुस्तरमित्याह ।ति । मनसि हृदये वचसि, वाण्यां, काये, देहे पुण्यं सुकृतमेव पीयूषममृतं तेनपूर्णाः । उ. श्रेणीभिरुपकारपंक्तिभिस्त्रिभुवनं प्रीणयन्तस्तर्पयन्तः । परेषां गुणास्तेषां परमाणून् पर्वती

त्य पर्वतप्रमाणान् कृत्वा नित्यं निजहृदि स्वान्तःकरणे विकसन्तः प्रकाशमानाः सन्तः सज्जनाः. यन्तः विरलाः सन्ति । परोपकारकारिणः सन्तो दुर्लभा इति भावः ॥ ७९ ॥

भा० टी०—जिनके तन, मन और वाणीमें पुण्यरूपी अमृत भराहुआ है, जिनने अपने उपकारोंसे तीनों लोकोंको प्रसन्न किया है, और जो दूसरेके पर-माणुबरावर गुणोंको पर्वतके समान वढाकर अपने हृदयमें सदा प्रसन्न रहतेहैं से सज्जन मनुष्य इस संसारमें विरलेही हैं ॥ ७९ ॥

दोहा—अमृत भरे तन मन वचन निशिदिन जग उपकार।
परगुण मानत मेरुसम विरले जन संसार ॥ ७९ ॥

किं तेन हेमगिरिणा रजताद्रिणा वा यत्राश्रिताश्च तरवस्तरवस्त एव ॥ मन्यामहे मलयमेव यदाश्रयेण कङ्कोलनिंवकुटजा अपि चन्दनाःस्युः ॥ ८० ॥

सं० टी०—परोपकारकारिणः सज्जनाः स्वकीयोत्तमगुणानन्येष्वपि स्थापयन्तीति मल-यान्योक्त्या व्यनक्ति । किमिति । किं तेन हेमगिरिणा मेरुणा रजताद्रिणा रौप्यगिरिणा कैलासेन वा यतोऽस्याश्रितास्तरवस्तरव एव नत्वात्मसदृशाः सुवर्णरूप्यरूपाः कृताः । अतस्ताभ्यां किं प्रयोजनम् । तस्मात् मलयाद्रिं बहु मन्यामहे यतोऽस्याश्रिताः कङ्कोलनिम्बकुटजा वृक्षाः अपि चन्दनाःसुगन्धका एव भवन्ति चन्दनवृक्षवद्भासन्त इति चन्दनवृक्षाणां परोपकारः । वसन्ततिलका वृत्तमिदम् ॥८०॥

भा० टी०—वह सोनेका सुमेरुपर्वत, और चान्दीका कैलासपर्वत किस कामका है जिसके आश्रित वृक्ष सदा वृक्षही बनेरहे (सोने चांदीके न हुए) हम तो मलयाचलपर्वतकीही बडाई करेंगे कि जहां कक्कोल, नीम और कुडाके वृक्षभी चन्दनकेसमान होजातेहैं ॥ ८० ॥

सोरठा—ऐरे निलज सुमेर तो साथी पाथर रहे ।
मलयागिरि कहँ हेर कुटज नीम चन्दन किये॥८०॥

अथ धैर्यप्रशंसा ।

रत्नैर्महार्हैस्तुतुषुर्न देवा न भेजिरे भीमविषेण भीतिम् ॥ सुधां विना न प्रययुर्विरामं न निश्चितार्थाद्विरमन्ति धीराः ॥ ८१ ॥

सं० टी०—"धीरपुरुषा निश्चितार्थप्राप्तिंविना उद्योगं न त्यजन्ति" इति म मथनोद्योगप्रवृत्तदेवदृष्टान्तेन दर्शयति । रत्नैरिति । धीरा निश्चितार्थात् न विरमन्ति न विश्र किन्तु तस्य प्राप्तिपर्यन्तमुद्योगं कुर्वन्ति । अत्र दृष्टान्तः । देवा महामूल्यै रत्नैर्न तुतुषुः सन्तो प्रापुः । तथाच भीमेन भयंकरेण विषेण भीतिं भयं न भेजिरे न सिषेविरे, भयंकरविषे भयं न प्रापुरित्यर्थः । तु सुधाममृतंविना विरामं विश्रामं न प्रययुः न प्रापुः । निश्चितार्थस्वरूपसुधां देवा विरामं न प्राप्ता इति भावः । इन्द्रवज्रावृत्तमिदम् ॥ ८१ ॥

भा० टी०—अनमोल रत्न पाकर देवता सन्तुष्ट न हुए, भयंकरविष भी भयभीत होकर उनने समुद्रका मथना न छोडा, और, अमृतको निकाले बि विश्राम न किया, इससे यह सिद्ध हुआ कि धीर मनुष्य, प्रारम्भकियेहु कार्यको विना पूरा किये नहीं छोडते ॥ ८१ ॥

छप्पय—महा अमोलक रत्न नाहिं रीझे सुर तिनसों महा हलाहल जान प्राण डरपत नहिं जिनसों । रहत चित्तकी वृ एक अमृतसों अतिही । तैसेंही नरधीर काज निश्चै कर मा ही । सब दोषरहित अरु गुणसहित ऐसे कारन मन धरत तिहिको सुअर्थ अमृत लहत कोऊ दुखकों नाहिं करत ॥ ८१ ॥

क्वचिद्भूमौ शय्या क्वचिदपि च पर्यङ्कशयनं क्वचिच्छाकाहारः क्वचिदपि च शाल्योदनरुचिः ॥ क्वचित्कन्थाधारी क्वचिदपि च दिव्याम्बरधरो मनस्वी कार्यार्थी न गणयति दुःखं न च सुखम् ॥ ८२ ॥

सं० टी०—मनस्वी कार्यार्थी पुरुषः सुखं दुखं च न गणयतीत्याह—क्वचिदिति । क्वचि कदाचित् भूमौ शय्या शयनं । क्वचिदपिच न पर्यंके शयनं करोति, क्वचिच्छाकाहार शाकभो क्वचिदपिच शाल्योदने रुचिर्यस्य स शाल्योदनभोजी । क्वचिद् कंथां धारयतीति कन्थाधा पिच दिव्यं सुन्दरमम्बरं वस्त्रं धरतीति दिव्याम्बरधरः । स कार्यार्थी कार्येच्छुः मनस्वी विवे दुःखं सुखं च न गणयति । शिखरिणीवृत्तमिदम् ॥ ८२ ॥

भा० टी०—कभी पृथ्वीपर सोरहतेहैं, कभी उत्तमपलंगपर शयनकर भी साग पात खाकर रहजातेहैं, और कभी चांवलादिका उत्तम भोज , कभी गूदडी ओढकर दिन वितावेहैं, और कभी दिव्यवस्त्र धार

रतेहै, धैर्यवान् पुरुषको जब कार्य साधन करना होताहै तौ सुख और दुःखको मानही गिनताहै ॥ ८२ ॥

दोहा--भूमिशयन कहुं पलँगपै शाकहार कहुं मिष्ट।
कहुं कंथा सिरपाँव कहुं अर्थी सुख दुख इष्ट ॥ ८२ ॥

ऐश्वर्यस्य विभूषणं सुजनता शौर्यस्य वाक्संयमो ज्ञानस्योपशमः श्रुतस्य विनयो वित्तस्य पात्रे व्ययः॥ अक्रोधस्तपसः क्षमा प्रभवितुर्धर्मस्य निर्व्याजता सर्वेषामपि सर्वकारणमिदं शीलं परं भूषणम्॥८३॥

सं० टी०—शीलमेव परमोत्तमभूषणमित्याह । ऐश्वर्येति । सुजनता सौजन्यमैश्वर्यस्य वैभवस्य विभूषणमलङ्कारो भवति । ऐश्वर्ये प्राप्ते सति सुजनतैव सम्पादनीयेति भावः । शौर्यस्य वीर्यस्य वाक्संयमः वाङ्नियमः । शौर्ये सति वाण्या तस्यानुद्घाटनं कर्तव्यमितिभावः । ज्ञानस्य विभूषणमुपशमः शान्तिरस्ति । श्रुतस्य शास्त्रश्रवणस्य विनयो नम्रता विभूषणमस्ति । वित्तस्य धनस्य पात्रे सत्पात्रे व्ययो दानं धनवति सति दानमवश्यं करणीयम् । तपसोऽक्रोधः । प्रभवितुः समर्थस्य क्षमा क्षान्तिः समर्थेन क्षमाऽवश्यमेव कार्या । धर्मस्य विभूषणं निर्व्याजता कपटराहित्यम् । सर्वेषामपि जनानां सर्वगुणकारणमिदं शीलं परमं श्रेष्ठं भूषणमस्ति । " सर्वे गुणाः स्वभावतः सिद्धा भवन्ति " इतिभावः । शार्दूलविक्रीडितं वृत्तमिदम् ॥ ८३ ॥

भा. टी०—ऐश्वर्यका भूषण सज्जनता है, अपनी वाणीको वशमें रखना शूरके शूरताकी शोभा है, ज्ञानकी शोभा शान्ति है, शास्त्रका भूषण विनय है, धनकी शोभा सत्पात्रको दान करना है, तपकी शोभा क्रोध न करना है, प्रभुत्वकी शोभा क्षमा है, धर्मका भूषण निष्कपटता है, और अन्य सबगुणोंका भूषण और कारण शील है ॥ ८३ ॥

कुण्डलिया-मण्डन है ऐश्वर्यकौ सज्जनता सनमान। वाणी सज्जन शूरतामण्डन धनकौ दान। मण्डन धनकौ दान ज्ञानमण्डन इन्द्रीदम । तपमण्डन आक्रोश विनयमण्डन सोहत सम। प्रभुतामण्डन क्षमा धर्ममण्डन छलखंडन। सबहिनमें सर्दार शीलता सबकौ मण्डन ॥ ८३ ॥

निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम् ॥ अद्यैव वा मरणमस्तु युगान्तरे वा न्याय्यात्पथः प्रविचलन्ति पदं न धीराः ॥ ८४ ॥

सं० टी०—धीरपुरुषा न्यायपथात् कदाचिदपि न प्रविचलन्तीति वर्णयति । निन्दन्त्विति । नीत्यं नये निपुणा विशारदाः कुशलाः पुरुषा निन्दन्तु निन्दां कुर्वन्तु, यदि वा स्तुवन्तु स्तुतिं कुर्वन्तु, लक्ष्मीः सम्पत् यथेष्टं यथेच्छं समाविशत्वागच्छतु वा गच्छतु । अद्यैव मरणं मृत्युरस्तु वा युगान्तरेऽन्यस्मिन् युगेऽस्तु । परन्तु धीराः पुरुषा न्याय्यात् पथः न्यायमार्गात् कदापि न प्रविचलन्ति । वसन्ततिलकावृत्तमिदम् ॥ ८४ ॥

भा० टी०—नीतिविशारद मनुष्य चाहे निन्दा करें चाहे प्रशंसा करें, लक्ष्मी चाहे आवे चाहे चली जाय, मृत्यु अभी आजाय और चाहे युगके अन्तमें हो परन्तु धैर्यवान् पुरुष न्यायके मार्गसे एक पगभी नहीं हटते ॥ ८४ ॥

छप्पय—नीतिनिपुण नर धीर वीर कछु सुजस करौ किन अथवा निन्दा कोटि कहौ दुर्वचन छिनहिं छिन । सम्पतहू चलि जाऊ रहौ अथवा अगणित धन । अबहि मृतक किन होहु हो[illegible] अथवा निश्चल तन । पर न्यायपंथको तजत नहिं बुद्ध विवेक गु[illegible] ज्ञाननिधि । यह संग सहायक रहत नित देत लोक परलोक सिधि ८[illegible]

भग्नाशस्य करण्डपीडिततनोर्म्लानेन्द्रियस्य क्षुधा कृत्वाखुर्विवरं स्वयं निपतितो नक्तं मुखे भोगिनः ॥ तृप्तस्तत्पिशितेन सत्वरमसौ तेनैव यातः पथा लोकाः पश्यत दैवमेव हि नृणां वृद्धौ क्षये कारणम् ॥ ८५ ॥

सं० टी०—दैवमेव हि नृणां वृद्धिक्षययोः कारणमिति सर्पदृष्टान्तेन वर्णयति । भग्नाशस्येति । कश्चित् सर्पो व्यालग्राहिणा धृत्वा करण्डमध्ये निक्षिप्तस्तस्य स्थितिं वदति । कथंभूतस्य सर्पस्य [illegible] "[illegible]" भग्ना आशा यस्य । पुनः करण्डपीडिततनोः करण्डे पीडिता तनुर्यस्य । पुनः क्षुधया म्लानेन्द्रियस्य । एवं जाते सति दैववशात् कश्चिदाखुर्मूषक[illegible]

करण्डस्य विवरं छिद्रं कृत्वा नक्तं रात्रावन्तः प्रविष्टः सन् भोगिनो मुखे पतितः पश्चात्त-खोः पिशितेन स सर्पस्तृप्तस्तेनैव छिद्रमार्गेण वहिर्यातः। अतो भो जना यूयं स्वस्थास्तिष्ठत अदृष्टमेव नृणां वृद्धौ क्षये च कारणमस्ति। अदृष्टवशात् यद्भविष्यति तद्भविष्यति। शार्दूल-विक्रीडितं वृत्तमिदम् ॥ ८५ ॥

भा० टी०—एक सर्प पिटारेमें वन्द होनेसे पीडित जीवनकी आशा छोडकर बैठाहुआ भूखसे उसकी इन्द्रियां शिथिल होगईथी। इतनेहीमें रात्रिके समय एक मूषक पिटारेमें छेदकर भीतर घुसा और सर्पके मुखमें स्वयं गिरपडा। तभी उसको खाकर सन्तुष्ट होके उसी छेदकी राहसे वाहर निकलगया। इसलिये लोगो! देखो मनुष्यकी वढती और घटतीका केवल दैवही मुख्य कारण है॥८५॥

कुण्डलिया—जैसे काहू सरपहूं छवरैपकर धस्यौसु। देसिर ट पस्वौसु भयौ पीडित अति कैदी। इन्द्री विह्वल भूख पिटारी तें छेदी। वाहीकौ भखि माँस छेद ह्वै निकस्यौ ऐसे। मनकौं थिर राख करै प्रभु ऐसे जैसे ॥ ८५ ॥

पातितोऽपि कराघातैरुत्पतत्येव कन्दुकः ॥
प्रायेण साधुवृत्तानामस्थायिन्यो विपत्तयः ॥ ८६ ॥

सं० टी०—साधुवृत्तीनां विपत्तयःअस्थायिन्यो भवन्तीति कन्दुकदृष्टान्तेन दर्शयति। तत इति। यथा करस्य हस्तस्याघातैस्ताडनैः कन्दुकः पातितोऽपि पुनरूर्ध्वमुत्पतत्येव। तथा यो वाहुल्येन साधुवृत्तानां सज्जनानां विपत्तयः अस्थायिन्यो भवन्ति। अनुष्टुब्वृत्तमिदम् ॥ ८६ ॥

भा० टी०—जैसे गेंद हाथसे फेंकनेपरभी ऊपरहीको उठती है, इसीप्रकार प्रायः साधुजनोंका दुःख थोडेही दिनोंका होताहै ॥ ८६ ॥

दोहा—करकौ मार्‌यो गेंद ज्यौं लागि भूमि उठि आत।
साधुसखनकी त्यौं विपति छिनहीमें मिटजात ॥ ८६ ॥

आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः ॥
नास्त्युद्यमसमो बन्धुर्यं कृत्वा नावसीदति ॥ ८७ ॥

सं० टी०—इदानीमुद्यमप्राधान्यं वर्णयति। आलस्यमिति। आलस्यमुद्योगराहित्यम्। मनुष्याणां शरीरे तिष्ठतीति शरीरस्थो महान् रिपुः शत्रुः हि इति निश्चयेनास्ति। उद्यमेनोद्योगेन समो वन्धुर्न। यमुद्यमं कृत्वा मनुष्या नाऽवसीदति दारिद्र्यादिदुःखं न प्राप्नोति। उद्योमोऽवश्यं कर्तव्य इति भावः ॥ अनुष्टुब्वृत्तमिदम् ॥ ८७ ॥

निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम् ॥ अद्यैव वा मरणमस्तु युगान्तरे वा न्याय्यात्पथः प्रविचलन्ति पदं न धीराः ॥ ८४ ॥

सं० टी०—धीरपुरुषा न्यायपथात् कदाचिदपि न प्रविचलन्तीति वर्णयति । नि[illegible]न्त्विति । नीत्यं नये निपुणा विशारदाः कुशलाः पुरुषा निन्दन्तु निन्दां कुर्वन्तु, यदि वा [illegible] स्तुतिं कुर्वन्तु, लक्ष्मीः सम्पत् यथेष्टं यथेच्छं समाविशत्वागच्छतु वा गच्छतु । अद्यैव मरणं [illegible] वा युगान्तरेऽन्यस्मिन् युगेऽस्तु । परन्तु धीराः पुरुषा न्याय्यात् पथः न्यायमार्गात् कदापि [illegible] प्रविचलन्ति । वसन्ततिलकावृत्तमिदम् ॥ ८४ ॥

भा० टी०—नीतिविशारद मनुष्य चाहे निन्दा करे चाहे प्रशंसा [illegible] लक्ष्मी चाहे आवे चाहे चली जाय, मृत्यु अभी आजाय और चाहे युगके [illegible] हो परन्तु धैर्यवान् पुरुष न्यायके मार्गसे एक पगभी नहीं हटते ॥ ८४ ॥

छप्पय—नीतिनिपुण नर धीर वीर कछु सुजस करौ किन
अथवा निन्दा कोटि कहौ दुर्वचन छिनहिं छिन । सम्पतहू [illegible]
जाऊ रहौ अथवा अगणित धन । अबहि मृतक किन होहु [illegible]
अथवा निश्चल तन । पर न्यायपंथकों तजत नहिं बुद्ध विवेक [illegible]
ज्ञाननिधि । यह संग सहायक रहत नित देत लोक परलोक सिधि ॥

भग्नाशस्य करण्डपीडिततनोर्म्लानेन्द्रियस्य क्षुधा कृत्वाखुर्विवरं स्वयं निपतितो नक्तं मुखे भोगिनः ॥ तृप्तस्तत्पिशितेन सत्वरमसौ तेनैव यातः पथा लोकाः पश्यत दैवमेव हि नृणां वृद्धौ क्षये कारणम् ॥ ८[illegible]

सं० टी०—दैवमेव हि नृणां वृद्धिक्षययोः कारणमिति सर्पदृष्टान्तेन वर्णयति । [illegible] [illegible] । कश्चित् सर्पो व्यालग्राहिणा धृत्वा करण्डमध्ये निक्षिप्तस्तस्य स्थितिं वदति । कथंभूतस्य स[illegible] [illegible] "[illegible]" भग्ना आशा यस्य । पुनः करण्डपीडिततनोः [illegible] [illegible] । पुनः क्षुधया म्लानेन्द्रियस्य । एवं जाते सति दैववशात् कश्चिदाखुः[illegible]

तत्करण्डस्य विवरं छिद्रं कृत्वा नक्तं रात्रावन्तः प्रविष्टः सन् भोगिनो मुखे पतितः पश्चात्तस्याखोः पिशितेन स सर्पस्तृप्तस्तेनैव छिद्रमार्गेण बहिर्यातः। अतो भो जना यूयं स्वस्थास्तिष्ठत दैवमदृष्टमेव नृणां वृद्धौ क्षये च कारणमस्ति। अदृष्टवशात् यद्भविष्यति तद्भविष्यति। शार्दूलविक्रीडितं वृत्तमिदम् ॥ ८५ ॥

भा॰ टी॰—एक सर्प पिटारेमें बन्द होनेसे पीडित जीवनकी आशा छोडकर बैठाहुआ भूखसे उसकी इन्द्रियां शिथिळ होगईथी। इतनेहीमें रात्रिके समय एक मूषक पिटारेमें छेदकर भीतर घुसा और सर्पके मुखमें स्वयं गिरपडा। सर्पभी उसको खाकर सन्तुष्ट होके उसी छेदकी राहसे वाहर निकलगया। इसलिये हे लोगो! देखो मनुष्यकी वढती और घटतीका केवल दैवही मुख्य कारण है॥८५॥

कुण्डलिया—जैसे काहू सरपहूं छवरैपकर धस्यौसु। देसिर फूट पस्यौसु भयौ पीडित अति कैदी। इन्द्री विह्वल भूख पिटारी मूसें छेदी। वाहीकौ भखि माँस छेद ह्वै निकस्यौ ऐसे। मनकों तूं थिर राख करै प्रभु ऐसे जैसे ॥ ८५ ॥

पातितोऽपि कराघातैरुत्पतत्येव कन्दुकः ॥
प्रायेण साधुवृत्तानामस्थायिन्यो विपत्तयः ॥ ८६ ॥

सं॰ टी॰—साधुवृत्तीनां विपत्तयःअस्थायिन्यो भवन्तीति कन्दुकदृष्टान्तेन दर्शयति। पातित इति। यथा करस्य हस्तस्याघातैस्ताडनैः कन्दुकः पातितोऽपि पुनरूर्ध्वमुत्पतत्येव। तथा प्रायो वाहुल्येन साधुवृत्तानां सज्जनानां विपत्तयः अस्थायिन्यो भवन्ति। अनुष्टुव्वृत्तमिदम् ॥ ८६ ॥

भा॰ टी॰—जैसे गेंद हाथसे फेंकनेपरभी ऊपरहीको उठती है, इसीप्रकार प्रायः साधुजनोंका दुःख थोडेही दिनोंका होताहै ॥ ८६ ॥

दोहा—करकौ मार्‍यो गैंद ज्यौं लागि भूमि उठि आत।
साधुसखनकी त्यौं विपति छिनहीमें मिटजात ॥ ८६ ॥

आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः ॥
नास्त्युद्यमसमो बन्धुर्यं कृत्वा नावसीदति ॥ ८७ ॥

सं॰ टी॰—इदानीमुद्यमप्राधान्यं वर्णयति। आलस्यमिति। आलस्यमुद्योगराहित्यम्। मनुष्याणां शरीरे तिष्ठतीति शरीरस्थो महान् रिपुः शत्रुः हि इति निश्चयेनास्ति। उद्यमेनोद्योगेन समो वन्धुर्न। यमुद्यमं कृत्वा मनुष्या नाऽवसीदति दारिद्र्यादिदुःखं न प्राप्नोति। उद्योगोऽवश्यं कर्तव्य इति भावः ॥ अनुष्टुब्वृत्तमिदम् ॥ ८७ ॥

भा० टी०—आलस्य मनुष्योंके शरीरमें महाशत्रु है, उद्योगके समान ज्यका दूसरा कोई बन्धु नहीं कि जिसके करनेसे मनुष्य कभी दुःख नहींपाता ॥८७॥

दोहा—आलस वैरी सन्त तन सब सुखकों हरलेत ।
त्योंही उद्यम बन्धुसम किये सकल सुख देत ॥ ८७ ॥

छिन्नोऽपि रोहति तरुः क्षीणोऽप्युपचीयते पुनश्चन्द्रः ॥
इति विमृशंतः सन्तः संतप्यन्ते न विप्लुता लोके ॥८८॥

सं० टी०—"दुःखप्राप्तावपि सन्तो न सन्तप्यन्ते" इत्याह । छिन्न इति । तरुः छिन्नोऽपि निकृत्तोऽपि पुना रोहति । तथा क्षीणोऽपि कलाक्षीणो पि चन्द्रः पुनरुपचीयते वृद्धिं प्राप्नोति । इत्यनेन विमृशन्तो विचारयन्तः सन्तो विप्लुता आपदा न सन्तप्यन्ते दुःखिनो न भवन्ति ॥ आर्यावृत्तमिदम् ॥ ८८ ॥

भा० टी०—कलमाकिया हुआ वृक्ष वढकर फिर फैलजाताहे, चन्द्रमा घटकर फिर वढजाताहै. यह विचारकर सज्जन दुःख पानेपरभी सन्ताप नहिं करते ॥ ८८ ॥

दोहा—छीन पत्र पल्लवित तरु छीन चन्द्र वढवार ।
सतपुरुषनकी विपति छिन सम्पति सदा अपार ॥ ८८ ॥

इति धैर्यप्रशंसा ।

अथ दैवप्रशंसा ।

नेता यस्य बृहस्पतिः प्रहरणं वज्रं सुराः सैनिकाः
स्वर्गो दुर्गमनुग्रहः किल हरेरैरावतो वारणः ॥ इत्यै
श्वर्यबलान्वितोऽपि बलभिद्भग्नः परैः संगरे तद्व्यक्तं
वरमेव दैवशरणं धिग्धिग्वृथा पौरुषम् ॥ ८९ ॥

सं० टी०—दैवे प्रतिकूले सर्वे यत्ना विफला भवन्तीति इन्द्रदृष्टान्तेन दर्शयति । नेतेति । यस्य इन्द्रस्य बृहस्पतिर्नेता नायकोऽस्ति । वज्रं कुलिशं प्रहरणमायुधम् । सुरा देवाः सैनिकाः दुःखेन गम्यते तद्दुर्गं स्वर्गः । हरेरनुग्रहः कृपा किलेति प्रसिद्धम् । वारणः गजः ऐरावतः । इत्यनेन प्रकारेणैश्वर्यं बलञ्च ताभ्यामन्वितो युक्तोऽपीन्द्रः बलिभिः परैः शत्रुभिः संगरे संग्रामे भग्नः

पराजितः । तत्तस्मात् दैवशरणमेव वरमिति व्यक्तं स्पष्टम् । दैवहीनं पौरुषं वृथा धिग्धिगिति । दैवस हायतांविना पौरुषं निष्फलमितिभावः । शार्दूलविक्रीडितवृत्तमिदम् ॥ ८९ ॥

भा० टी०—वृहस्पतिसमान जिसके मंत्री हैं, वज्र जिसका अस्त्र है, देवतागण जिसकी सेना हैं, स्वर्ग जिसका गढ है, और ऐरावत जिसके चढनेका हाथी है, ऐसा ऐश्वर्यबलसपन्न इन्द्र शत्रुओंसे संग्राममें हारताही रहा, इस लिये दैवही शरणके योग्य है, और वृथा पुरुषार्थको धिक्कार है ॥ ८९ ॥

छप्पय—सुरगुरु सेनाधीश सुरनकी सेना जाके । शस्त्र हाथलिये वज्र स्वर्ग सौ दृढगढ ताकै ॥ ऐरावत असवार प्रभूको परम अनुग्रह । ऐसी सम्पति सौंज सहित सोहत सु इन्द्र यह ॥ सो युद्ध माँहि दानवनसों लहत पराजय खोय पति । शोभा समाज सबही वृथा सबसों अद्भुत दैवगति ॥ ८९ ॥

कर्मायत्तं फलं पुंसां बुद्धिः कर्मानुसारिणी ॥
तथापि सुधिया भाव्यं सुविचार्यैव कुर्वता ॥ ९० ॥

सं० टी०—बुद्धिमता सुविचारपूर्वकमेव कार्यं कर्तव्यमित्याह । कर्मेति । यद्यपि पुंसां फलं सुखदुःखादिकं कर्मायत्तं कर्माधीनमस्ति तथा बुद्धिः कर्मानुसारिणी कर्मानुगामिनी अस्ति तथापि सुधिया बुद्धिमता सुविचार्यैव कार्यं कुर्वता भाव्यम् । अनुष्टुब्वृत्तमिदम् ॥ ९० ॥

भा० टी०—यद्यपि मनुष्योंको उनके कर्मानुसार फल मिलताहै, और बुद्धिभी कर्मके अनुसारही होजातीहै तथापि बुद्धिमानोंको उचित है कि कार्य विचारकर करें ॥ ९० ॥

दोहा—फलहू पावत कर्मतें बुधहू कर्म अधीन ।
तदपि बुद्धिविचारकै कारज करौ प्रवीन ॥ ९० ॥

खल्वाटो दिवसेश्वरस्य किरणैः संतापितो मस्तके
वाञ्छन् देशमनातपं विधिवशात्तालस्य मूलं गतः ॥
तत्राप्यस्य महाफलेन पतता भग्नं सशब्दं शिरः
प्रायो गच्छति यत्र भाग्यरहितस्तत्रैव यान्त्यापदः ॥ ९१ ॥

सं० टी०—भाग्यहीनो नरो यत्र गच्छति तत्र दुःखमेव लभत इति ... वर्णयति । खल्वाट इति । यथा खल्वाटः पुरुषो बहिरटन् दिवसेश्वरस्य दिनकरस्य सूर्यस्य ... णैर्मस्तके सन्तापितः सन्ननातपं घर्मशून्यं देशं वाच्छन्निच्छन् विधिवशात् दैववशात् ... तालवृक्षस्य मूलं गतः । तत्रापि तस्मिन् स्थलेऽपि दैववशादकस्मादेव पतता महाफलेनास्य ... टस्य शिरः सशद्बं यथास्यात्तथा भग्नमभूदिति शेषः । तथा प्रायो यत्र यस्मिन् स्थाने ... रहितो भाग्यहीनो नरो गच्छति तत्रैव तं प्रत्यापदो यान्ति ॥ शार्दूलविक्रीडितं वृत्तमिदम् ॥ ९१ ॥

भा० टी०—एक गंजे मनुष्यका सिर जब सूर्यकी किरणोसे जलनेलगा तब वह छायाकी इच्छा करके दैवयोगसे तालके मेडके नीचे गया । वहां जाते ही शीघ्र एक बडा फल गिरा । जिससे उसका शिर टूटगया । इसका यह भावार्थ है कि भाग्यहीन पुरुष जहां २ जाताहै वहां २ विपत्तिभी उसके पीछे जाती है ॥ ९१ ॥

छप्पय—टांट उघारै मूढ वारहू सिरपर नाहीं । तप्यौ जेठकौ घाम वेलकी पकरी छाहीं । तहां वेलफल एक शीसपर पर्‍यौ सुवाके । फूटि गयो करि शोर पीर बाढी तनुताके । सुख ठौर जा विरम्यौ सुवस तहां इते दुखकों सहत । निर्भाग्य पुरुप जित जात तित वैर विपति अगनित लहत ॥ ९१ ॥

शशिदिवाकरयोर्ग्रहपीडनं गजभुजङ्गमयोरपि बन्धनम् ॥ मतिमतां च विलोक्य दरिद्रतां विधिरहो बलवानिति मे मतिः ॥ ९२ ॥

सं० टी०—दैवगतिर्बलीयसीति सदृष्टान्तं वर्णयति । शशीति । शशी चन्द्रः दिवाकरः सूर्यस्तयोर्ग्रहेण राहुणा पीडनं । गजो द्विपः भुजंगमः सर्पः तयोरपि बंधनं । मतिमतां विदुषां दरिद्रतां दारिद्र्यं विलोक्य दृष्ट्वा विधिर्दैवं बलवान् बलिष्ठोऽस्तीति मे मम मतिरस्ति । अहो इत्याश्चर्ये । द्रुतविलम्बितवृत्तमिदम् ॥ ९२ ॥

भा० टी०—सूर्य और चन्द्रमामें ग्रहणकी पीडा देख, हस्ती और सर्पका बंधन देख, और बुद्धिमानोंको दरिद्री देख, मुझको यही निश्चय होताहै कि दैवही बडा बलवान है ॥ ९२ ॥

छप्पय—रवि शशि निशदिन फिरैं ग्रहणसों पीडा पावैं । बृहत् काय गज भुजग तेनु रजुसों बंध जावैं ॥ महाभयंकर सर्प

मंत्रवस रहै मौन गह ॥ जोगी अटल अकाम होय कामी इक क्षण महँ ॥ अधिगत शास्त्रसमूह महापंडितवर ज्ञानी ॥ निर्धन सहैं कलेश विधाता गति बडजानी ॥ ९२ ॥

सृजति तावदशेषगुणाकरं पुरुषरत्नमलंकरणं भुवः ॥
तदपि तत्क्षणभङ्गि करोति चेदहह कष्टमपण्डितता विधेः ॥ ९३ ॥

सं० टी०—विधेरपण्डिततामाह। सृजतीति। ब्रह्मा तावदादौ अशेषा ये गुणास्तेषामाकरं खानिं सर्वगुणानामुत्पत्तिस्थानं भुवः पृथिव्या अलंकरणमलंकारभूतमेतादृशं पुरुषरत्नं सृजति तदपि पुरुषरत्नमपि तत्क्षणभंगि तत्क्षणनाशशीलमल्पायुः करोति चेदहहेति खेदे कष्टं यथा स्यात्तथेयं विधेर्ब्रह्मणोऽपण्डितताऽज्ञातताऽस्ति। द्रुतविलम्बितं वृत्तमिदम् ॥ ९३ ॥

भा० टी०—विधाता पुरुषरत्नको सर्वगुणोंकी खानि और पृथ्वीका भूषण बनाताहै, परन्तु यह बडे कष्टकी बात है कि उसका जीवन क्षणभङ्गुर ही बनाताहै। इसमें विधाताकी मूर्खताही है ॥ ९३ ॥

दोहा—सब गुणयुत भूपण सही पुरुषरत्न नर कीन्ह ॥
पै लागत मोहि मन्द विधि क्षणभंगुर तन दीन्ह ॥ ९३ ॥

पत्रं नैव यदा करीरविटपे दोषो वसन्तस्य किं
नोलूकोऽप्यवलोकते यदि दिवा सूर्यस्य किं दूषणम् ॥
धारा नैव पतन्ति चातकमुखे मेघस्य किं दूषणं
यत्पूर्वं विधिना ललाटलिखितं तन्मार्जितुं कः क्षमः ॥ ९४ ॥

सं० टी०—विधिलिखितं मार्जितुं कःशक्य इति करीरवृक्षादेर्दृष्टान्तेन वर्णयति। पत्रमिति करीरविटपे करीरवृक्षे यदा पत्रं नैव भवति तदा वसन्तस्य किं दोषः। यदुलूको दिवाभीतो दिवाऽपि दिवसेऽपि नाऽवलोकते तर्हि सूर्यस्य दूषणं किम्। यदि चातकमुखे धारा जलधारा नैव पतन्ति तर्हि मेघस्य दूषणं किम्। यत् यस्मात् विधिना ब्रह्मणा जन्मकाले ललाटे लिखितं तन्मार्जितुं कः क्षमः समर्थः न कोऽपि। प्रारब्धमेव बलीय इति भावः। शार्दूलविक्रीडितवृत्तमिदम् ॥ ९४ ॥

भा० टी०—यदि करीरके वृक्षमें पत्ते नहीं लगते तो वसन्तका क्या दोप है? यदि उलू दिनमें नहीं देखसकता तो सूर्यका क्या दोप है? यदि चातकके मुखमें

दोहा—वन्दन सबही सुरनकूं विधिहूकों दण्डौत। कर्मनकौ फल देत ये इनकौ कहा उदोत ॥ ९५ ॥

ब्रह्मा येन कुलालवन्नियमितो ब्रह्माण्डभाण्डोदरे
विष्णुर्येन दशावतारगहने क्षिप्तो महासङ्कटे ॥
रुद्रो येन कपालपाणिपुटके भिक्षाटनं कारितः सूर्यो
भ्राम्यति नित्यमेव गगने तस्मै नमः कर्मणे ॥ ९६ ॥

सं० टी०—ब्रम्हेति। येन कर्मणा ब्रम्हाण्डमेव भाण्डं भाजनं तस्योदरे ब्रम्हा कुलालव-त्कीवन्नियमितो नियंत्रितः सृष्टिरचनायामिति शेषः। यथा कुलालो बहुप्रकारभाण्डरचनां करोति तथैव ब्रम्हाऽपि नानाप्रकारसृष्टिरचनां करोतीत्यर्थः। येन कर्मणा विष्णुर्हरिर्दशावतारा रामादयस्तन्मध्ये यद्गहनं दुःखं तदेव महत्सङ्कटं तस्मिन् क्षिप्तः पातितः। येन कर्मणा रुद्रो महादेवः कपालं नरकपालं तेन सहितो यः पाणिपुटकः करसंपुटकस्तस्मिन् या भिक्षा तदर्थमटनं भ्रमणं कारितः। तथा येन सूर्यो नित्यमेव गगने आकाशे भ्राम्यति भ्रमणं करोति तस्मै कर्मणे नमः। शार्दूलविक्रीडितं वृत्तमिदम् ॥ ९६ ॥

भा० टी०—जिस कर्मने ब्रम्हाको कुम्हारकेसमान सृष्टि रचनेमें नियत किया, जिसने विष्णुको दशअवतार लेनेके संकटमें डाला, जिसने रुद्रकोभी खोपडी हाथमें ले भिक्षा मांगनेका दुःख दिया, और जिसने सूर्यको नित्य आका-शमें भ्रमण करनेकी पीडा दी, उसकर्मको हम नमस्कार करतेहैं ॥ ९६ ॥

दोहा—विधिकों कियौ कुम्हार जिन हरिकों दश अवतार। भीख मंगावत ईशकों ऐसौ कर्म उदार ॥ ९६ ॥

नैवाकृतिः फलति नैव कुलं न शीलं विद्यापि
नैव न च यत्नकृतापि सेवा ॥ भाग्यानि पूर्वतपसा
खलु सञ्चितानि काले फलन्ति पुरुषस्य यथैव वृक्षाः ॥ ९७ ॥

सं० टी०—सर्वत्र भाग्यमेव फलति नाकृतिरिति दृष्टान्तेन दर्शयति। नैवेति। आकृतिः स्वरूपं नैव फलति। नैव कुलं सत्कुलं। नैव शीलं। विद्यापि नैव। यत्नेन कृता सेवाऽपि नैव फलति किन्तु पूर्वमाचरितं यत्तपस्तेन सञ्चितानि पुरुषस्य भाग्यानि काले समये वृक्षा इव फलन्ति ॥ ९७ ॥

जलकी धारा नहीं पडती तो मेघका इसमें क्या दोष है? । सत्यतो यह है कि
कुछ विधाताने ललाटमें प्रथमही लिखदियाहै उसको कौन मेटसक्ताहै ॥ ९४ ॥

छप्पय—कहा वसन्तहि दोष करीरहि पात न आहीं । उल्
लगे अंध्यार दिवस रवि दुषण नाहीं ॥ ज्यौ चातक मुखम
पडै नहिं जलकी धारा ॥ दूषण दैवे जोग नहीं घन देख विचार
सत्य यही जिव जान लिख्यौ जो भाल विधाता ॥ मेट न सकि
कोय समझ जिय लीजै जाता ॥ ९४ ॥

इति दैवप्रशंसा ।

अथ कर्मप्रशंसा ।

नमस्यामो देवान्ननु हतविधेस्तेऽपि वशगा विधिर्व-
न्द्यः सोऽपि प्रतिनियतकर्मैकफलदः ॥ फलं कर्मा-
यत्तं किममरगणैः किं च विधिना नमस्तत्कर्मभ्यो
विधिरपि न येभ्यः प्रभवति॥ ९५ ॥

सं० टी०—इदानीं कर्म श्लाघते । नमस्याम इति । देवानिन्द्रादीन् वयं नम[illegible]
[illegible] । ननु तेऽपि हतविधेर्वशगा अस्वाधीनाः स्वातन्त्र्येण फलं दातुमशक्ताः । अथ वि[illegible]
[illegible] फलं ददाति । [illegible] दातुं शक्तः । फलं तावत् क[illegible]
[illegible] विधिना च [illegible] कर्मभ्यो नमः । येभ्यो विधि[illegible]
[illegible] ॥ ९५ ॥

भा० टी०—देवताओंको हम नमस्कार करतेहैं परन्तु वेभी विधिके आ[illegible]
है, तब विधिको नमस्कार करतेहैं परन्तु विधाताभी हमारे कर्मोंके अनुसारही
[illegible] इसलिये जब देवता और विधि दोनोंही कर्मके आधीन है तब उनको
[illegible] नमस्कार करतेहैं, जिनपर विधाताकाभी
[illegible] ॥ ९५ ॥

दोहा—वन्दन सबही सुरनकूं विधिहूकों दण्डौत। कर्मनकों
फल देत ये इनको कहा उदोत ॥ ९५ ॥

ब्रह्मा येन कुलालवन्नियमितो ब्रह्माण्डभाण्डोदरे
विष्णुर्येन दशावतारगहने क्षिप्तो महासङ्कटे ॥
रुद्रो येन कपालपाणिपुटके भिक्षाटनं कारितः सूर्यो
भ्राम्यति नित्यमेव गगने तस्मै नमः कर्मणे ॥ ९६ ॥

सं० टी०—ब्रह्मेति। येन कर्मणा ब्रह्माण्डमेव भाण्डं भाजनं तस्योदरे ब्रह्मा कुलालव-
त्कौलवन्नियमितो नियंत्रितः सृष्टिरचनायामिति शेषः। यथा कुलालो बहुप्रकारभाण्डरचनां
करोति तथैव ब्रह्माऽपि नानाप्रकारसृष्टिरचनां करोतीत्यर्थः। येन कर्मणा विष्णुर्हरिर्दशावतारा
मत्स्यादयस्तन्मध्ये यद्गहनं दुःखं तदेव महत्सङ्कटं तस्मिन् क्षिप्तः पातितः। येन कर्मणा रुद्रो
महादेवः कपालं नरकपालं तेन सहितो यः पाणिपुटकः करसंपुटकस्तस्मिन् या भिक्षा तदर्थमटनं
भ्रमणं कारितः। तथा येन सूर्यो नित्यमेव गगने आकाशे भ्राम्यति भ्रमणं करोति तस्मै कर्मणे
नमः। शार्दूलविक्रीडितं वृत्तमिदम् ॥ ९६ ॥

भा० टी०—जिस कर्मने ब्रह्माको कुम्हारकेसमान सृष्टि रचनेमें नियत
किया, जिसने विष्णुको दशअवतार लेनेके संकटमें डाला, जिसने रुद्रकोभी
खोपडी हाथमें ले भिक्षा मांगनेका दुःख दिया, और जिसने सूर्यको नित्य आका-
शमें भ्रमण करनेकी पीडा दी, उसकर्मको हम नमस्कार करतेहैं ॥ ९६ ॥

दोहा—विधिकों कियौ कुम्हार जिन हरिकों दश अवतार।
भीख मंगावत ईशकों ऐसौ कर्म उदार ॥ ९६ ॥

नैवाकृतिः फलति नैव कुलं न शीलं विद्यापि
नैव न च यत्नकृतापि सेवा॥ भाग्यानि पूर्वतपसा
खलु सञ्चितानि काले फलन्ति पुरुषस्य यथैव वृक्षाः॥९७॥

सं० टी०—सर्वत्र भाग्यमेव फलति नाकृतिरिति दृष्टान्तेन दर्शयति। नैवेति। आकृतिः
रूपं नैव फलति। नैव कुलं सत्कुलं। नैव शीलं। विद्यापि नैव। यत्नेन कृता सेवाऽपि नैव फलति
किन्तु पूर्वमाचरितं यत्तपस्तेन सञ्चितानि पुरुषस्य भाग्यानि काले समये वृक्षा इव फलन्ति ॥ ९७ ॥

भा० टी०—सुन्दरस्वरूप, उत्तम कुल, शील, विद्या और यत्नसे कीहुई से ये सब मनुष्यको कुछभी फल नहीं देतेहैं, केवल पूर्वजन्मकी तपस्याद्वारा सञ्चित कियेहुए भाग्यही मनुष्योंको समयपर वृक्षकी नाईं फल देतेहैं ॥ ९७ ॥

दोहा—विद्या आकृति शील कुल सेवा फल नहिं देत।
फलत कर्महू समयमें ज्यौं तरु फलनसमेत ॥ ९७ ॥

वने रणे शत्रुजलाग्निमध्ये महार्णवे पर्वतमस्तके वा।
सुप्तं प्रमत्तं विषमस्थितं वा रक्षन्ति पुण्यानि पुराकृतानि ॥

सं० टी०—सर्वत्र पूर्वकृतानि पुण्यान्येव रक्षन्तीत्याह। वन इति। पुरा पूर्व पुण्यानि सत्कर्माणि। वनेऽरण्ये रणे युद्धे शत्रुश्च जलं च, अग्निश्च तेषां मध्ये महार्णवे स पर्वतस्य मस्तके सुप्तं निद्रितं प्रमत्तमुन्मत्तं वा विषमे नतोन्नतभूमौ स्थितं पुरुषं र उपेन्द्रवज्रावृत्तमिदम् ॥ ९८ ॥

भा० टी०—वनमें, लडाईमें, शत्रु जल और अग्निकेमध्यमें समुद्रमें अ पहाडकी चोटीपर सोतेहुए, वेहोशीमें और विषमअवस्थामें केवल पूर्व ज कर्मही मनुष्यकी रक्षाकरतेहैं ॥ ९८ ॥

दोहा—वन रण जल अरु अग्निमें गिरि समुद्रके मध्य।
निद्रा मद हौराहि कठिन पूरवपुण्यहि सध्य ॥ ९८ ॥

या साधूंश्च खलान्करोति विदुषो मूर्खान्हितान्द्वेषिणः
प्रत्यक्षं कुरुते परोक्षममृतं हालाहलं तत्क्षणात् ॥
तामाराधय सत्क्रियां भगवतीं भोक्तुं फलं वाञ्छितं
हे साधो व्यसनैर्गुणेषु विपुलेष्वास्थां वृथा मा कृथाः ॥ ९९ ॥

भा॰ टी॰—मनोहर सुगन्धियुक्त माला, पंखाका वायु, चन्द्रमाकी चा न्दनी, पुष्पोंका पराग, सरोवर, चन्दनकी रज, उत्तम मद्य, वडेमहलकी उत्तम स्वच्छ छत, महीनवस्त्र, और कमलनयनी सुन्दर स्त्री इत्यादि उत्तमोत्तम पदार्थोंसे पुण्य वान् पुरुष ग्रीष्मऋतुमें सुख उठातेहैं ॥ ३९ ॥

दोहा—पुष्पमाल पंखापवन चन्दन चन्द सुनारि ।
वैठ चान्दनी जललहर जेठमहिन पटधारि ॥ ३९॥

सुधाशुभ्रं धाम स्फुरदमलरश्मिः शशधरः प्रियावक्त्रा म्भोजं मलयजरजश्चातिसुरभि ॥ स्रजो हृद्यामोदास्तदिद मखिलं रागिणि जने करोत्यन्तःक्षोभं न तु विषयसंस र्गविमुखे ॥ ४० ॥

सं॰ टी॰—सुधेति । सुधया शुभ्रं धाम गृहं । स्फुरन्तः अमला रश्मयः किरणाः यस्य शशधरश्चन्द्रः । प्रियायाः वक्त्राम्भोजं मुखकमलं । अतिसुरभि सुगन्धि मलयजं रजः । स्र माल्यानि हृद्यः मनोहरः आमोदो गन्धो यासां ताः । तदिदमखिलं सर्वं रागिणि जने एतेषु पदार्थ विषयेषु रागो यस्य तस्मिन् जने अन्तःक्षोभं करोति । ननु विषयस्य संसर्गस्तस्मात् विमुखे अं क्षोभं करोति । शिखरिणीवृत्तमिदम् ॥ ४० ॥

भा॰ टी॰—चूनेसे पुताहुआ उज्ज्वल गृह, निर्मल चान्दनीयुक्त चन्द्रमा प्यारीका मुखकमल, सुगन्धित चन्दन, अत्यन्त सुगन्धिपुष्पोंकी माला, ये स वस्तु अनुरागीपुरुषोंके हृदयमें अत्यन्त खेदकरतेहैं, परन्तु जो विषयके संसर्ग विमुख हैं उनके हृदयमें क्षोभ नहींकरते ॥ ४० ॥

दोहा—शशिवदनी अरु शरदशशि चन्दन पुष्पसुगन्ध ।
ये रसिकनके चित हरत सन्तनके चितवन्ध ॥ ४० ॥

इति ग्रीष्मऋतुवर्णनम्

अथ वर्षावर्णनम् ।

तरुणीवेषा दीपितकामा विकसितजातीपुण्यसुगन्धिः ॥
उन्नतपीनपयोधरभारा प्रावृट् कुरुते कस्य न हर्षम् ॥४१॥

सं० टी०—तरुणी इति । एषा प्रावट् तरुणीव कस्य पुरुषस्य हर्षं न कुरुते अपि तु सर्वेषामपि कुरुते । कथंभूता प्रावट् तरुणीच । दीपितः उद्दीपितः कामो यया पक्षे यस्यांच, विकसिता प्रफुल्लिता जातिर्मालतीलता यस्यां, पक्षे केशादौ धारणत्वेन विकासिता जातयो जातिपुष्पाणि यस्यामतएव पुण्यो मनोज्ञः सुगन्धो यस्यां, पक्षे अङ्गादिसौगन्ध्यं, तरुणीपक्षेऽपि तथैव बोध्यम् । पुनःकथंभूता । उन्नता उच्चाः पीनाः पुष्टाः धरन्तीति धराः पचाद्यच् । पयसां धराः पयोधराः मेघास्तेषां भर एव भारः अतिशयो यस्यां तथाभूता । पक्षे उन्नतौ पीनौ पुष्टौ यौ पयोधरौ स्तनौ तयोः भारो यस्यां इति । उपचित्रावृत्तमिदम् ॥ ४१ ॥

भा० टी०—तरुणीके वेषवाली, कामदेवका उदयकरनेवाली, खिलेहुए जातीपुष्पोंकी सुगन्धिको धारणकरनेवाली, और उन्नत पुष्ट पयोधरोंके भारसें युक्त यह वर्षाऋतु किसके हृदयमें हर्ष नहीं उत्पन्नकरतीहै । यहांपर श्लेष है । जितने विशेषण प्रावट्के हैं वेही सब तरुणीमेंभी घटेंगे, और उन सबके भिन्न अर्थ होंगे । यथा जाती जुही लता और जावित्रीको तथा पयोधर मेघ और स्तनसे कहतेहैं॥४१

दोहा—पीनपयोधरकों धरत प्रगट धरत हैं काम ।
पावस और प्यारी निरख हर्षित होत तमाम ॥४१॥

वियदुपचितमेघं भूमयः कन्दलिन्यो नवकुटजकदम्बामोदिनो गन्धवाहाः ॥ शिखिकुलकलकेकारावरम्या वनान्ताः सुखिनमसुखिनं वा सर्वमुत्कण्ठयन्ति ॥ ४२ ॥

सं० टी०—वियदिति । वियद्गगनमुपचिता मेघा यस्मिन् तत् उपचितमेघं । कन्दला जाता यासु ताः कन्दलिन्यो भूमयः । नवा नूतनाः कुटजाः कदम्बाश्च तेषामामोदो गन्धो येषु तथाभूता गन्धवाहा वायवः । शिखि कुलस्य मयूरकुलस्य कलाः अव्यक्तमधुराः केकारवाः वाणीशब्दास्तै रम्याः वनान्ताः वनप्रदेशाः । एते प्रावृषि वर्षाकाले सुखिनमसुखिनं वा सर्वमुत्कण्ठयन्ति मदनाविर्भावेन उत्कण्ठितं कुर्वन्ति । मालिनीवृत्तमिदम् ॥ ४२ ॥

भा० टी०—मेघोंसे आच्छादित आकाश, नवीन २ अंकुरोंसे पूर्ण पृथ्वी, नवीन कुटज और कदम्बके पुष्पोंसे सुगन्धित वायु, और मयूरोंके झुण्डोंकी

सुन्दर वाणीसे रमणीय वनके प्रान्त, ये सब पदार्थ वर्षाऋतुमें सुखी और दुः
दोनोंप्रकारके पुरुषोंको उत्कण्ठित करतेहैं ॥ ४२ ॥

दोहा--नभबादर अवनी हरित कुटज कदम्ब सुगंध।
मोर शोर रमणीक वन सबकौ सुखसम्बन्ध ॥ ४२॥

उपरि घनं घनपटलं तिर्यग्गिरयोऽपि नर्तितमयूराः॥
वसुधा कंदलधवला तुष्टिं पथिकः क यातु संत्रस्तः ॥४३॥

सं० टी०--उपरीति । कश्चन पथिको मार्गे गच्छति । यस्योपरि घनं निविडं घन
मेघानां पटलं, तिर्यगागमनप्रदेशे नर्तिताः मयूराः येषु ते गिरयः । वसुधा भूमिः कन्दलैः
वाङ्कुरैर्धवला । एवंसति पथिको विरहेण संत्रस्तः सन्तापितः क तुष्टिं सन्तोषं यातु प्राप्नोतु
आर्यावृत्तमिदम् ॥ ४३ ॥

भा० टी०--ऊपर घनघोर घटा छारहीहै, दाहिने बाऐं पर्वतोंपर मोर
नाचरहेहैं, और नीचे भूमि नवीनअकुरोंसे हरीभरी होरहीहै, ऐसेसमयमें जब
चारोंओरही कामोद्दिपन करनेवाले पदार्थ विद्यमान हैं तौ विरहसे व्याकुल
पथिकको कैसे संतोष आवे ॥ ४३ ॥

दोहा--घटा चढी सिर मोर गिरी हरितभई सब भूमि।
विरही दृग डारे कहां देखरह्यौ जिय घूमि ॥ ४३॥

इतो विद्युद्वल्लीविलसितमितः केतकितरोः स्फुरद्गन्धः प्रो
द्यज्जलदनिनदस्फूर्जितमितः ॥ इतः केकिक्रीडाकलकलरवः
पक्ष्मलदृशां कथं यास्यन्त्येते विरहदिवसाः संभृतरसाः ॥४४॥

सं० टी०--प्रावृषि स्त्रीणां विरहव्यथामाह । इत इति । इतो विद्युद्वल्ली विद्युल्ल
तस्या विलसितं विलासः । इतः केतकितरोः स्फुरन्निव गन्धः । इतः प्रकर्षेण उद्यज्जलदनिनदः
मेघशब्दस्य स्फूर्जितं स्फुरणम् । इतः केकीनां मयूराणां क्रीडासु कलकलरवः कोलाहलः
पक्ष्मलदृशां स्त्रीणां संभृतरसा रसवन्तो विरहदिवसाः एते कथं यास्यन्ति गमिष्यन्ति ।
शिखरिणीवृत्तमिदम् ॥ ४४ ॥

भा० टी०--एकओर विद्युल्लताका विलास, दूसरीओर केतकीके
फूलोंकी उत्कट सुगन्धि, और एकओर मेघकी गर्जना, और दूसरीओर
मोरोंका शोर, ये सब जहां एकत्र हैं ऐसे यह रसभरे दिन विरहिणीस्त्रियां कैसे
व्यतीत करेंगी ॥ ४४ ॥

दोहा—दमकत दामिन मेघ इत केतकिपुष्पविकास।
मोर सोर निशिदिन करत विरहीजनसनत्रास ॥ ४४॥

असूचीसंसारे तमसि नभसि प्रौढजलदध्वनिप्राये तस्मिन् पतति दृषदां नीरनिचये ॥ इदं सौदामिन्याः कनककमनीयं विलसितं मुदं च म्लानिं च प्रथयति पथिष्वेव सुदृशाम् ॥ ४५

सं० टी०—असूचीति। असूचीसंसारे नास्ति सूच्याः संसारः संसरणं यस्मिन् तस्मिन् तमसि अंधकारे एवंभूते नभसि श्रावणे "नभः खं श्रावणो नभाः" इत्यमरः। कथंभूते श्रावणे मासे प्रौढाश्चते जलदाश्च तेषां ध्वनिप्राये दृषदां पाषाणानां नीरेणसह निचये समूहे पतति। एवमिदं सौदामिन्या विद्युतो विलसितं स्फुरणं कनकं सुवर्णं तद्वत् कमनीयं सुन्दरं। शोभना दृक् यासां तासां स्त्रीणां मार्गेष्वेव पथिष्वेव मुदं हर्षं च विरहिणां म्लानिं म्लानतां च प्रथयति प्रकटीकरोति। शिखरिणीवृत्तमिदम् ॥ ४५ ॥

भा० टी०—जिसमें कोई पदार्थ नहीं दीखसक्ता ऐसे गाढअंधकारयुक्त श्रावणमासमें बडे बडे मेघोंकी गर्जना और पत्थरसहित जलवृष्टि तथा सुवर्णके समान सुन्दर बिजलीका वारम्वार चमकना स्त्रियोंको मार्गमेंही सुख और दुःख दोनों करतेहैं ॥ ४५ ॥

दोहा—महा अंधतम नभ जलद दामिनी दमक दुरात।
हरष शोक दोऊ करत तियकों पियढिंग जात ॥ ४५॥

आसारेण न हर्म्यतः प्रियतमैर्यातुं बहिः शक्यते शीतोत्कम्पनिमित्तमायतदृशा गाढं समालिंग्यते ॥ जाताः शीतलशीकराश्च मरुतो वात्यन्तखेदच्छिदो धन्यानां बत दुर्दिनं सुदिनतां याति प्रियासंगमे ॥ ४६ ॥

सं० टी०—आसारेणेति। मेघच्छन्ने दुर्दिने दिनोदये जातेऽपि प्रियतमैः पतिभिः निद्रारसेन आसारेण पर्जन्यधारया यदा बहिर्हर्म्यतो गृहात् यातुं गन्तुं न शक्यते। तदा शीतोत्कम्पनिमित्तमायतदृशा विस्तीर्णनेत्रया स्त्रिया गाढमत्यन्तं आलिंग्यते। अथ च मरुतो वायवः शीतलाः शीकराः अम्बुकणाः येषुते खेदं छिन्दन्तिते खेदच्छिदो जाता वान्ति। एवं धन्यानां

करनेसे शिथिल होगयेहैं, जिसको तृष्णा अत्यन्तसे लगरहीहै, और जो मदमें मत्त होरहाहै, यदि उससमय संभोगके श्रमसे वह एकान्त महलकी छतपर थकी हुई स्त्रीकी भुजाओंद्वारा दिये हुए चान्दनीकेसमान स्वच्छ शीतलजलको झारीसे नहीं पीताहै वह पुरुष अवश्य मन्दभाग्य है. ॥ ४७ ॥

छप्पय——छके मदनकी छाक मुदित मदराके छाके। करत सुरत रन रंग जंग कर कछु इक थाके। पौढरहे लपटाय अंग अंगनसें उरझे। वहुत लगी जब प्यास तबहि चित चाहत सुरझे। उठ पियत रात आधी गयें सीतल जल या शरदको। नर पुण्यवन्त फल लेत हैं निज सुकृतहि की फरदको ॥ ४७ ॥

अथ हेमन्तवर्णनम्।

हेमन्ते दधिदुग्धसर्पिरशना माञ्जिष्ठवासोभृतः
काश्मीरद्रवसान्द्रदिग्धवपुषः खिन्ना विचित्रै रतैः॥
पीनोरःस्थलकामिनीजनकृताश्लेषा गृहाभ्यन्तरे
तांबूलीदलपूगपूरितमुखा धन्याः सुखं शेरते ॥ ४८ ॥

सं० टी०——हेमन्त इति । हेमन्ते ऋतौ केचित् पुरुषाः दधि च दुग्धं च सर्पिः घृतं च एतानि अशनं येषां ते । मांजिष्ठं मञ्जिष्ठया रंजितं वासो वस्त्रं बिभ्रति ते । काश्मीरं कुङ्कुमकेसरं तस्य द्रवो रसस्तेन सान्द्रं निबिडं दिग्धमुपलिप्तमेवंभूतं वपुर्येषां तैर्विचित्रैः रतैः खिन्नाः खेदं प्राप्ताः । पीनं मांसलं उरःस्थलं यस्य एवंभूतो कामिनीजनस्तेन कृताः आश्लेषा आलिङ्गनानि येषां ताम्बूलीदलैः पूगैः पुरितानि मुखानि येषां ते । एवंभूता धन्याः गृहाभ्यन्तरे गृहमध्ये सुखं शेरते निद्रां कुर्वन्ति । शार्दूलविक्रीडितंवृत्तमिदम् ॥ ४८ ॥

भा० टी०—हेमन्तऋतुमें जो दही दुग्ध और घीका भोजन करतेहैं—मजीठके रंगेहुए वस्त्र पहरतेहैं, केशर और कस्तूरीका सघन लेप अपने सब शरीरमें करतेहैं, पुष्टस्तनवाली स्त्री जिनका आलिङ्गन करती हैं, और जो पान और सुपारियोंसे अपने मुखको शोभित करतेहैं, और सुखपूर्वक अपने गृहमें शयन करते-हैं वेही धन्य हैं ॥ ४८ ॥

सोरठा——दही दूध घृतपान, बसन मजीठहि रंगके।
आलिङ्गन रतिदान, केशर चर्चि हिमन्तमें ॥ ४८ ॥

अथ शिशिरः

चुम्बन्तो गंडभित्तीरलकवति मुखे सीत्कृतान्यादधाना
वक्षःसूत्कंचुकेषु स्तनभरपुलकोद्भेदमापादयन्तः ॥ ऊरू
पर्यंतः पृथुजघनतटात्स्रंसयंतोऽशुकानि व्यक्तं कांताजन
विटचरितकृतः शैशिरा वांति वाताः ॥ ४९ ॥

सं० टी०--चुम्बन्त इति । शिशिरे कामिनो भोगकाले यथा कुर्वन्ति तथा वायवः कुर्वन्तीति शेषः । अलकवति केशवति मुखे गण्डभित्तीः प्रति प्रबला वायवः मुखे केशान् आनयन्ति तेनैव मिषेण चुम्बन्ति । पुनः कथं भूता सीत्कृतानि आदधानाः, शीतातिशयेन स्त्रियः सीत्कृतानि कुर्वन्ति तान्येव वायुभिः कृतानि । उत्कंचुकेषु वक्षःसु स्तनभरे पुलकोद्भेदमापादयन्तः ऊरूनाकम्पयन्तः । पृथुजघनतटात् अंशुकानि वस्त्राणि स्रंसयन्तः निष्कासयन्तः । एवं कान्ताजनानां विटचरितकृतः विटाः भाण्डास्तेषां चरितमिव कुर्वन्ति ते शैशिराः शिशिरे भवाः वाताः वायवः वहन्ति । स्रग्धरावृत्तमिदम् ॥ ४९ ॥

भा० टी०--कामी पुरुष भोगकालमें जो आचरण करतेहैं वही शिशिर ऋतुका पवनभी करताहै, । स्त्रियोंके केशयुक्त कपोलोंका चुम्बन करता, शीतकेकारण सीत्कारशब्द कराताहै, कंचुकीरहित स्तनोंको रोमांचित करता, जंघाओंको कंपाताहै, और पुष्टजघनोंसे वस्त्रको उडाताहै, इसप्रकार कामी पुरुषकेसमान आचरणवाला शिशिरऋतुका पवन बहरहाहै ॥ ४९ ॥

छप्पय--चुम्बन करत कपोल मुखहि सीत्कार करावत । उर माहि धस जात कुचनपर रोम बरावत । जंघनको थहरात नहू दूरकरत अंशुक । लग्यो रहत संगमांहि छारको रोक ... रुक । यह शिशिरपवन विटरूपधर गलिन २ अटकत फिरत निरखंहे नारि नर घरनमें याको भट भेरन फिरत ॥ ४९ ॥

केशानाकलयन्दृशो मुकुलयन्वासो बलादाक्षिपन्नातन्वन्पुलकोद्गमं प्रकटयन्नालिङ्ग्य कम्पं शनैः ॥ वारंवारमुदा...

ीत्कृतंकृतो दन्तच्छदान्पीडयन्प्रायः शैशिरं एष संप्रति
ित्कांतासु कांतायते ॥ ५० ॥

सं० टी०—केशानिति। अथ शैशिरो मरुत् संप्रति इदानीं कान्तासु स्त्रीषु प्रायो बाहुल्येन
ान्तायते कान्त इव आचरति । तत्कथन् । केशनाकलयन । दृशो दृशः मुकुलयन् । वासो
ं बलादाक्षिपन् निष्कासयन् । पुलकाः रोमाञ्चास्तेषामुद्गममातन्वन् विस्तारयन् । आलिंग्य शनैः
म्पं प्रकटयन् । वारम्वारमुदाराणि बहूनि सीत्कृतानि कारयन् । दन्तच्छदान् ओष्ठान् पीडयन् । एवं
ायः कान्त एव भवति। ऋतुवर्णनमिति कामिनां विषयिणां मनोरथास्तथा इति भावः । कार्यं । तेषां
र्तव्यानि ज्ञात्वा त्यक्तव्यानि चेति कारणादुक्तानि । अधुना पक्षद्वयनिरूपणम् ॥ स्रग्धराछन्दः ॥ ५० ॥

भा० टी०—बालोंको बिखेरता, आंखोंको किञ्चित् २ मूंदता, वस्त्रोंको
लपूर्वक उडाताहुआ, देहको रोमाञ्चितकरताहुआ, धीरे धीरे आलिङ्गन करके
म्पन प्रगटकरताहुआ, और वारम्वार सीसी शब्द कराकर ओष्ठोंको पीडित करता-
हुआ ये शिशिरऋतुका पवन प्रायः स्त्रियोंकेविषय पतिकासा आचरण करताहै ॥ ५० ॥

छप्पय—विलुलित करत सुकेश नयनहूं छिन २ मूंदत ।
बसनन ऐंचे लेत देह रोमाञ्चन रूंदत । करत हृदयमें कम्प
कहत मुखहूसो सीसी । पीडा करनहि ओठ बयारहु स्यार नि-
रीसी । यह सीतकालमें जानिये अद्भुत गतधारत पवन । निशि
घोस दुरे दुबके रहो निजनारीसंग निजभवन ॥ ५० ॥

असाराः सन्त्वेते विरतिविरसायासविषया जुगुप्स-
न्तांयद्वा ननु सकलदोषास्पदमिति ॥ तथाप्यन्तस्तत्त्व
प्रणिहितधियामप्यतिबलस्तदीयोऽनाख्येयः स्फुरति
हृदये कोऽपि महिमा ॥ ५१ ॥

सं० टी०—असारा इति । यद् यस्मात् कारणात् । [illegible]
इति वितर्के । इदं सकलदोषास्पद इति जुगुप्सतां निन्दां कुर्वन्तु । [illegible]
विरतौ विरामे विरसाः विगतो रसो येभ्यः [illegible]
प्रणिहितधियां [illegible]
[illegible] । ५१ ।

भा० टी०—यह सब भोगविषय असार और वैराग्यमें विरस हैं. यदि इन विषयोंको सम्पूर्णदोषोंका घर समझकर कोई मनुष्य इनकी निन्दा करे तौभी इनका महिमा अत्यन्त बलवान् है, वर्णन नहींहोसक्ता, क्योंकि विचारमें लीन तत्त्ववेत्ताओंके हृदयमेंभी ये प्रकाशित होतेहैं ॥ ५१ ॥

छप्पय—जदपि भोग निस्सार विरतिमें विघ्न करैं सबदोषनकी खान जीवकौ साधें अनहित। करैं निलज हीन ज्ञानकूं धोय बहावैं। सर्वसदेहि नसाय बुरौ जगत कहावैं। तदपि सकैको वरण भोगकी महिमा भारी। रहैं लीन करैं तिनहू कीरवारी ॥ ५१ ॥

भवन्तो वेदान्तप्रणिहितधियामाप्तगुरवो विदग्धालापानां वयमपि कवीनामनुचराः ॥ तथाप्येतद्ब्रूमो नहि परहितात्पुण्यमधिकं न चास्मिन् संसारे कुवलयदृशो रम्यमपरम् ॥ ५२ ॥

सं० टी०—भवन्त इति । भवन्तो यूयं वेदान्ते प्रकर्षेण निहिता बुद्धिर्यैस्तेषाम् गुरवश्च । वयं तु विदग्धाः आलापाः शब्दा येषां तथाभूतानां कवीनामनुचराः सेवकास्तथापि परहितात् पुण्यमधिकं । एतद्ब्रूमो चास्मिन् संसारे कुवलयदृशः अपरं रम्यं नास्तीति जानीमः शिखरिणीवृत्तमिदम् ॥ ५२ ॥

भा० टी०—तुम वेदान्तवेत्ताओंके मान्य गुरु हो, और हमभी काव्यरचयिता कवियोंके दास हैं, तथापि मैं यह जानताहूं कि इस संसारमें परोपकार करनेसे अधिक पुण्य और कुछ नहीं है और कमलनयनीस्त्रियोंसे सुन्दर दूसरी कोई वस्तु नहींहै ॥ ५२ ॥

छप्पय—पढे वेदवेदान्त भये विद्योदधिपारा। तिनहूके गुरु बुद्धबल पाय अपारा ॥ हम कछु जानत नाहि पढे विद्या भारी। रहे कविनके दास कहैं ये बात विचारी। जगतमें दो बात लगीं सबसे अधिकाई। परहित साधन एक दूसरी निकाई ॥ ५२ ॥

सिहं बहुभिरुक्तैर्युक्तिशून्यैः प्रलापैर्द्वयमिह पुरुषाणां
दा सेवनीयम् ॥ अभिनवमदलीलालालसं सुन्दरीणां
नभरपरिखिन्नं यौवनं वा वनं वा ॥ ५३ ॥

सं० टी०—पुरुषैर्द्वयं सर्वदा सेवनीयमित्याह । किमिति । इह लोके बहुभिरुक्तैर्वचनैः
योजनम्। कथंभूतैः । युक्तिशून्यैः प्रलापैरर्थविरहितैः । तर्हि मयोच्यते तच्छ्रूयताम् । इह
णां पुरुषैर्द्वयं सर्वदा सेवनीयम् । किमभिनवाः नूतनाः अपूर्वाः मदस्य लीलास्ताभिः लालसं
भरेण परिखिन्नं सुन्दरीणां यौवनं सेवनीयमथवा वनं सेवनीयम् ॥ मालिनीवृत्तमिदम् ॥५३॥

भा० टी०—इस संसारमें युक्तिशून्य वृथा प्रलापोंसे; क्या प्रयोजन है,
तो पुरुषोंको दोही वस्तु सर्वदा सेवनेयोग्य हैं, नवीनमदकी लीलाभिलाषी
कि भारसे खेदयुक्त सुन्दरीस्त्रियोंका यौवन अथवा वन ॥ ५३ ॥

दोहा—सुनी औरहू बातपै मुख्य बात ये दोय ।
कै तिय जोवनमें रमैं कै वनवासी होय ॥ ५३ ॥

सत्यं जना वच्मि न पक्षपाताल्लोकेषु सर्वेषु च तथ्य-
मेतत् ॥ नान्यन्मनोहारि नितम्बिनीभ्यो दुःखैकहे-
तुर्न च कश्चिदन्यः ॥ ५४ ॥

सं० टी०—भो जनाः । अहं सत्यं वच्मि वदामि न पक्षपातात् सर्वेषु । लोकेषु एतत्त-
थार्थं । तत् किं नितंबिनीभ्यः स्त्रीभ्यो मनोहारि मनःस्तुष्टिकरमन्यत् द्वितीयं नास्ति । विष-
परमार्थिनां तु स्त्रीभ्यो दुःखैकहेतुः दुखस्य कारणं अन्यन्नास्ति । इन्द्रवज्रावृत्तमिदम् ॥५४॥

भा० टी०—हे मनुष्यो ! यह हम सत्य कहतेहैं इसमें कुछभी पक्षपात
करते कि इस संसारमें स्त्रियोंसे वढकर न कोई मनको हरनेवाली वस्तु है
न कोई दुःखदाई वस्तु है ॥ ५४ ॥

दोहा—तीन लोक तिहुं कालमें महा मनोहर नार ।
दुखहूकी दाता यही देखौ सोच विचार ॥ ५४ ॥

अथ दुर्विरक्तप्रशंसा ।

देव कृतिनामपि स्फुरत्येष निर्मलविवेकदीपकः ॥ याव-
न्न कुरंगचक्षुषां ताड्यते चपललोचनाञ्चलैः ॥ ५५ ॥

सं० टी०—तावदिति । कृतिनां विवेकिनां अन्तःकरणे एष निर्मलः कामादिमल विवेकदीपकस्तावदेव स्फुरति यावत् कुरङ्गस्येव चक्षुषि यासां तासां स्त्रीणां चपलानि नेत्राणि तान्येवाञ्चलास्तैर्न ताड्यते । स्त्रीणां कटाक्षाः विवेकिनामपि विवेकं ध्वंसयन्ति भावः । रथोद्धतावृत्तमिदम् ॥ ५५ ॥

भा० टी०—विवेकियोंके हृदयमें यह विवेकरूपी निर्मल दीपक तक प्रकाशित रहताहै, जब तकिक मृगनयनीस्त्रियोंके चञ्चलनेत्ररूपी नहीं बुझायाजाता ॥ ५५ ॥

दोहा—दीपक वरत विवेकको तौलों या चितमांहि ।
जौलों तार कटाक्षपट पवनसु परसत नांहि ॥ ५५ ॥

वचसि भवति संगत्यागमुद्दिश्य वार्ता श्रुतिमुखरमुखानां केवलं पण्डितानाम् ॥ जघनमरुणरत्नग्रन्थिकाञ्चीकलापं कुवलयनयनानां को विहातुं समर्थः ॥ ५६ ॥

सं० टी०—स्त्रीसंगं त्युक्तं न कोऽपि समर्थ इत्याह । वचसीति । श्रुतिमुखरमुख वक्तॄणां पण्डितानां संगत्यागमुद्दिश्य वचस्येव केवलं वार्ता भवति नतु त्यागं कुर्वन्ति । कुवलयनयनानां कमलनयनानां स्त्रीणां अरुणानां रत्नानां ग्रन्थयो यस्यां तस्याः काञ्च्याः यस्मिन् तत् जघनं विहातुं त्यक्तुं कः समर्थः नकोऽपीत्यर्थः। मालिनीवृत्तमिदम् ॥ ५६ ॥

भा० टी०—पण्डितोंकी स्त्रियोंके संग त्यागनेकी बात केवल मात्रही हैं, नहींतो लालरत्नजटित कटिमेखला पहिनेभई स्त्रियोंके ज... त्यागनेमें कौन समर्थ है ॥ ५६ ॥

कुण्डलिया—पंडितजन जब कहत हैं तिय तजिवेकी ... करत वृथा वक वादवह तजी नेक नाहिं जात । तजी नेक जात गात छवि कनकवरन वर । कमलपत्रसम नैन वैन ... अमृतभर । सोहत मुख मृदु हास अंग आभूषण मण्डित । तियको तजै कौनसो है वह पण्डित ॥ ५६ ॥

स्वपरप्रतारकोऽसौ निन्दति यो ऽलीकपण्डितो युवतीः ।
यस्मात्तपसोऽपि फलं स्वर्गस्तस्यापि फलं तथाप्सरसः ॥

सं० टी०—स्वपरेति । अलीकपण्डिता यो युवतीः निन्दति असौ स्वस्यापि परस्यापि तारकः प्रतारणमात्रं अलीकं वृथा करोति । किमिति यस्मात् कारणात्तपसोऽपि फलं स्वर्गस्तस्यापि फलमप्सरसः ॥ पथ्यावृत्तमिदम् ॥ ५७ ॥

भा० टी०–जो मनुष्य स्त्रियोंकी निन्दा करताहै वह झूंठा पण्डित है, आपतौ ठगाही गया औरोंकोभी ठगाताहै, क्योंकि तपस्याका फल स्वर्ग और स्वर्गप्राप्तिका फल अप्सराओंका भोग है ॥ ५७ ॥

दोहा—नारिनकी निन्दा करत ते पण्डित मतिहीन ।
स्वर्ग गये तिनकों सुने सदां अप्सरा लीन ॥ ५७ ॥

मत्तेभकुम्भदलने भुवि सन्ति शूराः केचित्प्रचण्डमृगराजवधेऽपि दक्षाः ॥ किं तु ब्रवीमि बलिनां पुरतः प्रसह्य कन्दर्पदर्पदलने विरला मनुष्याः ॥ ५८ ॥

सं० टी०—कन्दर्पदर्पदलने समर्थाः मनुष्याः विरलाः सन्ति इत्याह । मत्तेति । मत्तो मदोन्मत्तो यो इभः हस्ती तस्य कुम्भो गण्डस्थलं तस्य दलने विदारणे भुवि शूराः सन्ति । केचित् प्रचण्डोऽत्यन्तक्रोधनो यो मृगराजः सिंहस्तस्य वधेऽपि हननेऽपि दक्षाः कुशलाः । किन्तु अहं बलिनां शूराणां पुरतोऽग्रे प्रसह्य हठात् ब्रवीमि कन्दर्पः कामस्तस्य यो दर्पो गर्वस्तस्य दलने विदारणे शूराः मनुष्याः विरलाः सन्ति । वसन्ततिलकावृत्तमिदम् ॥ ५८ ॥

भा० टी०—मस्तहाथीके मस्तकको विदारनेवाले शूर इस पृथ्वीपर अनेक हैं, और प्रचण्डसिंहके मारनेवाले दक्ष योद्धाभी कितनेही हैं, परन्तु मैं बलवानोंके आगे हठपूर्वक कहताहूं कि कामदेवके मदका नाश करनेवालातो कोई विरलाही मनुष्य होताहै ॥ ५८ ॥

छप्पय—हाथी मारन हार होत ऐसेहू सूरे । मृगपतिं वध करसके वकें नाहि नेकहु पूरे । वडे २ बलवन्त वीर सब तिनके आगे । महाबली ये काम जाहि देखत सब भागे । अभिमान भरे या मदनकों मान भार मेटें अवधि । नर धरमधुरंधर वीर वे विरले या संसारमधि ॥ ५८ ॥

सन्मार्गे तावदास्ते प्रभवति पुरुषस्तावदेवेन्द्रियाणां लज्जां तावद्विधत्ते विनयमपि समालम्बते तावदेव ॥ भ्रूचापाकृष्टमुक्ताः श्रवणपथगता नीलपक्ष्माण एते यावल्लीलावतीनां न हृदि धृतिमुषो दृष्टिबाणाः पतन्ति ॥ ५९ ॥

यह कूंची करमकपाटकी खोलनको ऊकत फिरत । जिनके न लगत मन द्दगनमें ते भवसागरको तरत ॥ ६२ ॥

कृशः काणः खंजः श्रवणरहितः पुच्छविकलो व्रणी पूयक्लिन्नः कृमिकुलशतैरावृततनुः ॥ क्षुधाक्षामो जीर्णः पिठरककपालार्पितगलः शुनीमन्वेति श्वा हतमपि निहन्त्येव मदनः ॥ ६३ ॥

सं० टी०—कृश इति । कृशः क्षीणः, काणः एकनेत्ररहितः, खञ्जः पादेन हीनः श्रवणरहितः कर्णहीनः, पुच्छेन विकलो रहितः, व्रणी सर्वाङ्गे व्रणा यस्य, पूयेन क्लिन्नः लिप्तः, कृमीणां कुलं बाहुल्यं तस्य शतैरावृता तनुः यस्य सः, क्षुधया क्षामः क्षीणः, जीर्णः वृद्धः पिठरकस्य मृण्मयघटस्य कपालं कण्ठः सोऽर्पितो गले येन एतादृशः श्वा शुनीमनुपृष्ठत एति। अतो मदनः हतमपि चादौ शरीरावस्थया मृतप्रायं निहन्ति मारयति । विवेको नास्तीत्यर्थः। शिखरिणीवृत्तमिदम् ॥ ६३ ॥

भा० टी०—जो दुवला, काना, लंगडा, कनकटा, और दुमकटा है, जिसके शरीरमें घाव होरहेहैं, जिनमेंसे राध वह रहीहै, और सहस्रोंकीडे किलबिला रहेहैं, तथा जो भूखसे पीडित है. और हांडीका मुख जिसके गलेमें अटक रहाहै, ऐसा कुत्ताभी कुत्तीके पीछे दौडता है । वडे खेदकी वात है कि यह कामदेव मरेहुओंकोभी मारताहै ॥ ६३ ॥

छपय्य—दुवरो कानो हीन श्रवणविन पूंछ नवांये । वूढौ विकल शरीर वारविन छार लगायें । झरत सीसतें राध रुधिर कृमि डारत डोलत । क्षुधाक्षीण अति दीन गले घट कण्टक लोलत । यह दशाश्वान पाई तऊ कुतियनसे उरझत गिरत । देखौ अनीति या मदनकी मृतकनको मारतफिरत ॥ ६३ ॥

स्त्रीमुद्रां झषकेतनस्य जननीं सर्वार्थसम्पत्करीं ये मूढाः प्रविहाय यांति कुधियो मिथ्याफलान्वेषिणः ॥ ते ते नैव नि

इत्थं निर्दयतरं नग्नीकृता मुण्डिताः केचित्पञ्चशिखीकृताश्च जटिलाः कापालिकाश्चापरे ॥ ६४ ॥

सं० टी०—स्त्रीति। राज्ञो मुद्रया सर्वं कार्यं भवति। अतो मकरकेतनस्य मदनस्य स्त्री मुद्रा भवति। अनया सर्वं भवति। अतस्तां स्त्रीमुद्रां विहाय त्यक्त्वा ये मूढाः कुधियः कुत्सितबुद्धयः यानि मिथ्याफलानि स्वर्गादिकानि अप्रत्यक्षाणि तानि अन्वेषयन्ति तच्छीला भवन्ति च ते मूढाः। कथंभूतां स्त्रीमुद्रां। मदनस्य जननीमुत्पादयित्रीं सर्वार्थानां सम्पादनं करोतीति तथाभूतां। यस्याधीना मुद्रा तस्य सर्वाः सम्पदो भवन्ति। यो मुद्राया उल्लंघनं करोति तस्य राजा दण्डकारो भवति मारयति च। अतो मदनेन ते मूढास्तेनैव कर्मणा निर्दयतरं यथास्यात्तथा निहत्य नग्नीकृताः मुण्डिताश्च। केचित् पञ्चशिखीकृताः। केचित् जटा येषामस्तीति जटिलाः। केचिदपरे कापालिकाः पात्रं करे धृत्वा भिक्षाटनं कारिताः। राजाप्यनयकारिणमेवमेव दण्डयतीत्यर्थः। शार्दूलविक्रीडितवृत्तमिदम् ॥ ६४ ॥

भा० टी०—यह स्त्रियां सम्पूर्ण अर्थोंको देनेवाली कामदेवकी मुद्रा हैं, जो मूढ कुबुद्धि मनुष्य इनको त्यागकर स्वर्गादिककी इच्छासे विरक्त होजाते हैं उनको विरक्त मत समझो किन्तु उनको कामदेवने बडी निर्दयताकेसाथ दण्डदिया है. अर्थात् किसीको नंगा किया, किसीका सिर मुंडवाया, किसीके पांच चोटी रखवाई, किसीको जटाधारी किया, और किसीके हाथमें ठीकरा देकर भीख मंगवाई ॥ ६४ ॥

कुण्डलिया—कामिनि मुद्रा कामकी सकलअर्थको देत। मूरख याकों तजत हैं झूंठे फलके हेत। झूंठे फलके हेत मदन तिनहींकों डांडे। गहि गहि मूंडे मूंड वसनबिन करदे छांडे। भगवा करि करि वेष जटिल व्है जागत जामिनि। भीख मांगके खात कहत हम छोडी कामिनि ॥ ६४ ॥

विश्वामित्रपराशरप्रभृतयो वाताम्बुपर्णाशनास्तेऽपि स्त्रीमुखपंकजं सुललितं दृष्ट्वैव मोहं गताः ॥ शाल्यन्नं सघृतं पयोदधियुतं भुञ्जन्ति ये मानवास्तेषामिन्द्रियनिग्रहो यदि भवेद्विन्ध्यस्तरेत्सागरे ॥ ६५ ॥

सं० टी०---इन्द्रियनिग्रहोऽतिकठिन इति विश्वामित्रादिदृष्टान्तेन वर्णयति । वातं वायुं च अम्बु उदकं च शुष्कपर्णानि च अश्नन्ति भक्षयन्ति ते वाताम्बुपर्णाशनाः । एवंभूता विश्वामित्रपराशरप्रभृतयः तेऽपि सुललितं अतिसुन्दरं स्त्रीमुखपङ्कजं दृष्ट्वैव दर्शनमात्रेणैव मोहं गताः प्राप्ताः । किमुत यतः शाल्यन्नं तंडुलौदनं तदपि सघृतं पुनः पयोदधियुतं ये मानवा मनुष्या भुञ्जन्ति तेषामिन्द्रियनिग्रहः कथं भवेत् । अत्र दृष्टान्तः । यदि विन्ध्याद्रिः सागरं तरेत् तदाऽपूर्वोऽयमिन्द्रियानिग्रहः स्यात् । शार्दूलविक्रीडितं वृत्तमिदम् ॥ ६५ ॥

भा० टी०---जब विश्वामित्र पराशर इत्यादि वडे २ ऋषिभी जो वायु जल और पत्ते खाकर रहतेथे, स्त्रीके मुखकमलको देखतेही मोहितहोगये, तो फिर जो मनुष्य घी दूध दहींसहित उत्तम अन्न खातेहैं उनकी इन्द्रियां कैसे वश होसक्तीहैं, यदि उन की इन्द्रियें वशमें होजांय तो विन्ध्याचल पर्वत समुद्र पर तरनेलगे, इन्द्रियोंका वशमें करना वडा कठिन कार्य है यह भावार्थ है ॥६५॥

छप्पय---कौशिकादि मुनि भये वातपयपर्णाहारी । तेहु तिय मुखकमल देख सव वुद्ध विसारी । दधि घृत ओदन दूध मधुर पकवान मलाई । नितप्रति सेवन करें रहें सुखमोद वढाई । ते नहिं वस करसकें मनहि नर भोगी ऐसें । जल ऊपर परवात कठिन तरिवौ है जैसें ॥ ६५ ॥

इति दुर्विरक्तप्रशंसा समाप्ता ।

संसारेऽस्मिन्नसारे कुनृपतिभुवनद्वारसेवावलम्बव्यासंगव्यस्तधैर्यं कथममलधियो मानसं संविदध्युः ॥ यद्येताः प्रोद्यदिंदुद्युतिनिचयभृतो न स्युरम्भोजनेत्राः प्रेंखत्कांचीकलापाः स्तनभरविनमन्मध्यभागास्तरुण्यः ॥ ६६ ॥

सं० टी०---संसार इति । प्रकर्षेणोद्यादिन्दोर्द्युतीनां तेजसां निचयं समुदायं बिभ्रति ताः । प्रेंखन् शब्दायमानः काञ्चीकलापो यासां ताः । स्तनानां भरेण विनमन् विनम्रः मध्यभागो यासां ताः । एवंभूता एता अम्भोजनेत्राः कमलनयनाः तरुण्य स्त्रियः यदि न स्युः न आसन् । तर्हि अमलधीर्येषां तथाभूता मानवा अस्मिन् असारे संसारे कुनृपतयः कुत्सिताः नृपतयस्तेषां भवनद्वाराणां सेवावलम्बने व्यासंगस्तेन व्यस्तं नष्टप्रायं धैर्यं यस्य तत् एवंभूतं मानसं मनः कथं विदध्युः कुर्युः ।

एतस्य भावः यदि स्त्रियो न आसन् तदा बुद्धिमन्तः सेवां न कुर्युः । स्त्रीनिमित्तं राजसेवां कुर्म इति व्यासङ्गेन मनश्चञ्चलमधैर्यं भवतीति । स्रग्धरावृत्तमिदम् ॥ ६६ ॥

भा० टी०—उदित चन्द्रमाकीसी कान्ति धारणकरनेवाली, शब्दायमान कटिमेखलाधारिणी, और स्तनोंके भारसे जिनकी कमर झुकगईहै ऐसी कमलनयनी युवती स्त्री यदि न होतीं तो इस असार संसारमें निर्मलबुद्धिवाले मनुष्य दुष्टराजाओंके द्वारोंकी सेवामें नानाप्रकारके कलंकोंसे चित्तको अधीर क्यों करते । अर्थात् यदि यह स्त्रियां न होती तो पण्डितजन राजद्वारकी सेवा कभी न करते यह भावार्थ है ॥ ६६ ॥

छप्पय—तौ असार संसार जान सन्तोष न तजते । भीर भारके भरे भूपकों भूल न भजते । बुद्धिविवेक निधान मान अपने नहि देते । हुकम विरानौ राख दुःखसम्पद्र नाहिं लेते । जो यह नाहिं होती शशिमुखी मृगनैनी के हरिकटी । छवि जटी छट निकसी छटी रस लपटी छूटी लटी ॥ ६६ ॥

सिद्धाध्यासितकन्दरे हरवृषस्कन्धावगाढद्रुमे गङ्गाधौतशिलातले हिमवतः स्थाने स्थिते श्रेयसि॥कः कुर्वीत शिरः प्रणाममलिनं म्लानं मनस्वीजनो यद्वित्रस्तकुरंगशावनयना न स्युः स्मरास्त्रं स्त्रियः ॥ ६७ ॥

सं० टी०—सिद्धेति । यदि स्मरास्त्रं स्त्रियो नस्युः नासन् तदा हिमवतो हिमालयस्य स्थाने स्थित्वा कामेन कः मनस्वीजनः शिरः प्रणाममलिनं म्लानं कुर्वीत । कथंभूताः स्त्रियः । वित्रस्ता भयचकिता ये कुरङ्गशावास्तेषां नयनानीव नयनानि यासां ताः । कथंभूते हिमवतःस्थाने । सिद्धैरध्यासिता अधिष्ठिताः कन्दरा यस्य तस्मिन् । हरवृषो नन्दी तेन स्कन्धेन अवगाढा अवरुद्धा द्रुमा यस्मिन् । पुनः गंगाधौतानि शिलातलानि यस्मिन् । श्रेयसि पुण्यरूपे । अयं भावः । प्रशस्तं शुद्धं मनो यस्य स मनस्वीजनः यस्य मनः शुद्धं तस्य तत्साधने अनपेक्षा । यदा मलिनं मनस्तदा मनसः शुद्ध्यर्थं साधनान्तराणि कर्तव्यानि । सम्प्रति मनो मलिनं स्त्रीभिरेव क्रियते । अतःस्त्रीणां प्रभावा एव यदि उत्पन्ना नस्युस्तदा मनोऽपि मलिनं नैव भवेत् । तदा मनस्वीजनो हिमवतः स्थाने गत्वा शिरःप्रणामेन मलिनं अतएव म्लानं किमर्थं करिष्यति । मलिनतायाः कारणं स्त्री एव । स्त्री मदनस्य अस्त्रं यस्याङ्गं संगच्छति स मूर्च्छितो भवति । शार्दूलविक्रीडितं वृत्तमिदम् ॥ ६७ ॥

भा० टी०—यदि भयशून्य, मृगनयनी, कामके अस्त्ररूप, यह स्त्रियां होतीं तौ कौन मनस्वी पुरुष सिद्धगण जिसकी कन्दरामें बैठेहैं, ... वृषभ जहां वृक्षोंसे कंधा रगडताहै, और जहांके पाषाण गंगाजलसे धोयेजा... ऐसे पुण्यधाम हिमालयपर्वतको त्यागकर औरोंके सन्मुख मस्तक झुका... मानको मलिनकरता ॥ ६७ ॥

कुण्डलिया—अभय हरिणशावकनयन कामबाणसमनार। जो घरमें होती नहीं तौ सहजहिं होतौ पार। सहजहिं होतौ पार ... गिरिगुहा सिद्धवन। जहां तरुनसों अंग खुजात फिरें हरवाहन। स्वच्छ फटिक हिमशैल नीच जहां वहै गंगपय। निशिदिन हरि धर ध्यान चित्तकूं राखहि निर्भय ॥ ६७ ॥

संसार तव निस्तारपदवी न दवीयसी ॥
अन्तरा दुस्तरा न स्युर्यदि रे मदिरेक्षणाः ॥ ६८ ॥

सं० टी०—संसारेति। रे इति नीचसम्बोधने! रे संसार! यदि अन्तरा तन्मध्ये मदिरेक्षणाः स्त्रियो दुस्तरा नस्युस्तदा तव निस्तारपदवी स्थितिः न दवीयसी अतिदीर्घा नैव। अनुष्टुब्वृत्तमिदम् ॥ ६८ ॥

भा० टी०—रे संसार! यदि सुन्दरनेत्रवाली दुस्तरा स्त्रियां तेरे बीचमें न होतीं, तौ तुझसे पार हौना कुछ कठीन नाहिथा ॥ ६८ ॥

सोरठा—जो नहि होती नार तौ तरिवौ जगमें सुगम।
यह लांबी तरवार मार लेत अधबीचही ॥ ६८ ॥

इति स्त्रीपरित्यागप्रकरणम्।

राजन्तृष्णांबुराशेर्नहि जगति गतः कश्चिदेवावसानं को वार्थोऽर्थैः प्रभूतैः स्ववपुषि गलिते यौवने सानुरागः॥
गच्छामः सद्म तावद्विकसितनयनेंदीवरालोकनीनां यावच्चाक्रम्य रूपं झटिति न जरया लुप्यते प्रेयसीनां ॥६९॥

सं० टी०--राजन्निति । भो राजन्! इह जगति संसारे कश्चिदपि तृष्णाम्बुराशेस्तृष्णासमुद्रस्यावसनं पारं नहि गतः । स्ववपुषि स्वशरीरे सानुरागे अतिप्रिये यौवने गलिते सति प्रभूतैः पुष्कलैरर्थैः द्रव्यैः कोवार्थः प्रयोजनम् । तावत् विकसितानि नयनान्येव इन्दीवराणि कमलानि तैरालोकितुं द्रष्टुं शीलं यासां तासां प्रेयसीनां प्रियाणां सद्मगृहं प्रति गच्छामः । यावत् जरया वृद्धावस्थया तासां रूपं सौंदर्यमाक्रम्य झटिति शीघ्रं न लुप्यते । स्रग्धरावृत्तमिदम् ॥ ६९ ॥

भा० टी०--हे राजन्! इस तृष्णारूपी समुद्रके पार कोई नहींगया, और जब हमारी अनुरागभरी युवावस्था देहमेंही नष्टहोगई तब अधिकद्रव्योपार्जन करनेसे हमको क्या प्रयोजन है । हम उससे पहिलेही प्रफुल्लितकमलसमान नेत्रोंवाली स्त्रियोंके घर जातेहैं, जबतककि वृद्धावस्था उनके रूपको जल्दीसे न बिगाडे ॥६९॥

कुण्डलिया--राजन् ! तृष्णासिन्धुके पार न कोई जाय । कहा अर्थसंचय किये कालसर्प वय खाय । कालसर्प वय खाय नेह अरु प्रेम नसावै । कहा होय घर गये तबै कछु हाथ न आवै ॥ तासौं तबलों वेग भाग चलिये घरद्वारै । कमलनयन तियरूप जरा जबलों न बिगारै ॥ ६९ ॥

रागस्यागारमेकं नरकशतमहादुःखसंप्राप्तिहेतुर्मोहस्योत्पत्तिबीजं जलधरपटलं ज्ञानताराधिपस्य ॥ कन्दर्पस्यैकमित्रं प्रकटितविविधस्पष्टदोषप्रबन्धं लोकेऽस्मिन्नह्यनर्थं निजकुलदहनं यौवनादन्यदस्ति ॥ ७० ॥

सं० टी०--यौवनं हि सर्वानर्थानां मूलमित्याह । अस्मिन् लोके यौवनात्तारुण्यात् द्वितीयमनर्थमनर्थकरं नास्ति । कथंभूतं यौवनं । रागस्य इच्छाया एकमागारं गृहं । नरकाणां शतानि तेषु महादुःखानि तेषां सम्प्राप्तिस्तस्या हेतुः कारणं । मोहस्योत्पत्तिस्तस्या बीजम् । ज्ञानलक्षणस्य ताराधिपस्य चन्द्रस्य जलधरपटलं मेघपटलमाच्छादकम् । कन्दर्पो मदनस्तस्य एकं मित्रं । प्रकटिताः विविधा नानाप्रकाराः स्पष्टा दोषास्तेषां प्रबन्धो रचना येन । निजं स्वकीयं कुलं तस्य दहनं दाहकम् । एवं यौवनं निन्द्यमिति भावः ॥ स्रग्धरावृत्तमिदम् ॥ ७० ॥

भा० टी०--अनुरागका एक मात्र गृह, सैंकडों नरकोंके दुःख प्राप्तहोनेका हेतु, मोहकी उत्पत्तिका बीज, ज्ञानरूपीचन्द्रमाके ढकनेको मेघरूप, कामदेवका एक मात्र प्रियमित्र, नानाप्रकारके दोषोंको प्रकटकरनेवाला, और अपने कुलको दग्धकरनेवाला जो यौवन है इससे बढकर संसारमें कोई दूसरा अनर्थ नहीं है ॥७०॥

छप्पय—इन्द्रिनको हित धाम कामको मित्र महावर । नरक दुःखको हेतु मोहको बीज मनोहर । ज्ञानसुधाकर सीस सजल साँवनको बादर । नानाविधि बकवाद करनकों बडौ बहादुर । सबहि अघकौ है मूल यह यौवन अकृताहिकौ कवच । याबिना औरको करसकै सुन्दर सुखपर श्यामकच ॥ ७० ॥

शृंगारद्रुमनीरदे प्रचुरतेःक्रीडारसस्रोतसि प्रद्युम्नप्रियबान्धवे चतुरतामुक्ताफलोदन्वति ॥ तन्वीनेत्रचकोरपारणविधौ सौभाग्यलक्ष्मीनिधौ धन्यः कोऽपि न विक्रियां कलयति प्राप्ते नवे यौवने ॥ ७१ ॥

सं० टी०—यौवनं प्राप्य यो विकारं न व्रजति स एव धन्य इत्याह । शृङ्गारेति । नवे नूतने यौवने तारुण्ये प्राप्ते सति यो विक्रियां विकारं न कलयति न करोति स धन्यः । कथंभूते यौवने । शृंगारा एव द्रुमा वृक्षास्तेषां नीरं ददातीति नीरदो मेघस्तस्मिन् । यथा जलप्राप्तौ वृक्षाः शोभन्ते तथा यौवनेन शृङ्गाराः शोभन्ते । प्रचुरतो बाहुल्येन क्रीडानां रसस्तेषां स्रोतसि । प्रद्युम्नो मदनस्तस्य प्रियबान्धवे बन्धौ । चतुरतालक्षणानि मुक्ताफलानि तेषामुदन्वति समुद्रे । तन्वी सुन्दरी स्त्री तस्या नेत्रे ते एव चकोरौ तयोः पारणं तस्य विधौ चन्द्रे । सौभाग्यलक्ष्मीनिधौ स्थापनागारे । शार्दूलविक्रीडितं वृत्तमिदम् ॥ ७१ ॥

भा० टी०—शृङ्गाररूपी वृक्षोंके सींचनेवाला मेघ, विस्तारित क्रीडारसका प्रवाह, कामदेवका प्रियबन्धु, चतुरतारूपी मोतियोंका समुद्र, स्त्रियोंके नेत्ररूपी चकोरोंको पूर्णचन्द्र, और सौभाग्यलक्ष्मीका भण्डार, जो यह नवयौवन है इसको पाकर जो पुरुष विकारको नहीं प्राप्त होता वही धन्य है ॥ ७१ ॥

छप्पय—यह यौवन घनश्याम सदां सींचत शृंगारतरु । क्रीडा रसको स्रोत चतुरतारत्नन ऐन सर । नारीनयनचकोर चौपको चन्द विराजत । कुसुमायुधको बन्धु सिन्धु शोभाको भ्राजत । ऐसो यह यौवन पायके जे नहिं भजत विकार मन । ते परम धुरंधर [illegible] धन्य जन ॥ ७२ ॥

॥ इति यौवनवर्णनप्रकरणम् ॥

अथ कामिनीगर्हणप्रशंसा ॥

कान्तेत्युत्पललोचनेति विपुलश्रोणीभरेत्युत्सुकः पीनोत्तुंगपयोधरेति सुमुखाम्भोजेति सुभ्रूरिति ॥ दृष्ट्वा माद्यति मोदतेऽभिरमते प्रस्तौति जानन्नपि प्रत्यक्षाशुचिपुत्तिकां स्त्रियमहो मोहस्य दुश्चेष्टितं ॥ ७२ ॥

सं० टी०—विद्वानपि स्त्रियं दृष्ट्वा मोहं प्राप्नोतीत्याह । पुरुषः स्त्रियं प्रत्यक्षमशुचीनां पुत्तिकां जानन्नपि उत्सुको विमर्यादो भवति, मोदते च हर्षं प्राप्नोति, अत्यतिशयेन रमते रमणं करोति चेति स्तौति । इतीति कथं । तस्या अभिधानं गृह्णाति सा कान्ता सुन्दरी उत्पललोचना कमललोचना । विपुलो विस्तृतः श्रोणीभरः कटिप्रदेशो यस्याः सा तथाभूता । पीनौ मांसलौ उत्तुङ्गौ ऊर्ध्वौ पयोधरौ स्तनौ यस्याः सा । सुष्टु मुखाम्भोजं यस्याः सा । शोभनौ भ्रुवौ यस्याः सा । एवमभिधानानि गृहीत्वा स्तौति माद्यति च । अहो इति आश्चर्यमिदं । मोहस्य दुश्चेष्टितं दुर्व्यापारोऽस्ति । शार्दूलविक्रीडितं वृत्तमिदम् ॥ ७२ ॥

भा० टी०—विद्वान्मनुष्यभी प्रत्यक्षही अपवित्रताकी पुतलीरूपी स्त्रीको देख उत्कण्ठित होकर "यह स्त्री कैसी सुन्दर है, यह कमलनयनी है, इसके नितम्ब बहुत बडे हैं, इसके स्तन बडे स्थूल और दृढ हैं, इसका मुखकमल बहुत सुन्दर, इसकी भौंह अच्छी हैं" ऐसा कहकर मोहित होजाताहै, हर्षको प्राप्त होताहै, रमण करताहै, और उनकी स्तुति करताहै । देखो ! यह मोहकी कैसी बुरी चेष्टा है ॥ ७२ ॥

कुण्डलिया—कान्ता उत्पल लोचना प्रिया कृशोदरि बाल । घटस्तनी पंकजमुखी कामिनि अधर प्रवाल । कामिनि अधर प्रवाल सुभ्रु कहि कहिके बोलें । आनंद अधिक उछाह मत्तवन पण्डित डोलें । अशुचपूतरी नारि ताहि मन जानै शान्ता । महानरककी खान मोहवस मानै कान्ता ॥ ७२ ॥

स्मृता भवति तापाय दृष्टा चोन्मादवर्द्धिनी ॥
स्पृष्टा भवति मोहाय सा नाम दयिता कथम् ॥७३॥

सं० टी०—स्मृतेति या स्त्री स्मृता सती तापाय भवति स्मरणमात्रेण तापं करोति। तथाच दृष्टा उन्मादवर्द्धनं करोति तच्छीला एवंविधा भवति दर्शनमात्रेण उन्मादं वर्धयति । तथा स्पृष्टा सती मोहाय भवति स्पर्शमात्रेण मोहमुत्पादयति । सा दयिता प्रिया कथं नामेति सम्भावना। अनुष्टुब्वृत्तमिदम् ॥ ७३ ॥

भा० टी०—जो स्मरणमात्रसे सन्ताप करतीहै, देखतेही उन्मादको बढाती है, और स्पर्श करतेही मोह उत्पन्नकरतीहै, ऐसी स्त्रीको प्रिया कैसे कह सक्ते हैं॥७३॥

दोहा—सुधि आये सुधि बुधि हरत दरसत करत अचेत ।
परसत मन मोहित करत यह प्यारी किंहि हेत ॥७३॥

तावदेवामृतमयी यावल्लोचनगोचरा ॥
चक्षुःपथादपगता विषादप्यतिरिच्यते ॥ ७४ ॥

सं० टी०—तावदिति । यावत् स्त्री लोचनगोचरा नेत्रप्रत्यक्षभूता तावदेव अमृतमयी अमृतप्रचुरा भवति । चक्षुःपथात् नेत्रमार्गात् अपगता दूरीभूता सती विषादतिरिच्यते अधिका भवति । अनुष्टुब्वृत्तमिदम् ॥ ७४ ॥

भा० टी०—जबतक स्त्री नेत्रोंकेसन्मुख रहतीहै तभीतक वह अमृतमयी है, नेत्रोंके सामनेसे हटतेही वह विषसेभी अधिक होजातीहै ॥ ७४ ॥

दोहा—जौलों नारिनयन ढिग तौ तौं अमृत बेल ॥
दूरभये ते जहरसम लगत विरहकी सेल ॥ ७४ ॥

नामृतं न विषं किंचिदेकां मुक्त्वा नितम्बिनीम् ॥
सैवामृतलता रक्ता विरक्ता विषवल्लरी ॥ ७५ ॥

सं० टी०—नेति । एकां नितम्बिनीं कामिनीं मुक्त्वा त्यक्त्वा किञ्चिदपि अमृतं नास्ति । तथाविधं विषं नास्ति । किन्तु सैव स्त्री रक्ता अनुरागवती सती अमृतलता अमृतवल्ली भवति । तद्वत् विरक्ता अननुरक्ता सती विषवल्ली विषलता भवति । पूर्वोक्तं वृत्तमिदम् ॥ ७५ ॥

भा० टी०—स्त्रीके अतिरिक्त इस संसारमें न कोई अमृत है और न कोई विष है, क्योंकि यदि वही स्त्री प्रेम करे तो वही अमृतरूपा है, और यदि प्रीतिसे रहित है तो वही अमृतरूपा विषकी बेल होजातीहै ॥ ७५ ॥

दोहा—नारि बिन नहिं अमृत कहुं एक विषा न जान ।
मिलनमें अमृत नारी बिछुरे विषकी खान ७५ ॥

आवर्तः संशयानामविनयभवनं पत्तनं साहसानां दोषाणां सन्निधानं कपटशतमयं क्षेत्रमप्रत्ययानाम्॥ स्वर्गद्वारस्य विघ्नो नरकपुरमुखं सर्वमायाकरण्डं स्त्रीयन्त्रं केन सृष्टं विषममृतमयं प्राणिनां मोहपाशः॥ ७६॥

सं॰ टी॰—आवर्त इति। लोके यंत्राणि सन्ति तैर्मारणोच्चाटनवशीकरणादिक्रियाः क्रियन्ते। अतः स्त्रीयंत्रं केन सृष्टं निर्मितं। कथंभूतं स्त्रीयंत्रं। संशयानामावर्तः भ्रमरः जलभ्रमणवदविरतसंशयजनकमित्यर्थः। पुनः अविनयभवनं। साहसानां पत्तनं नगरम्। दोषाणां सन्निधानं सर्वे दोषास्तत्सान्निधाने भवन्ति। कपटशतमयं कपटशतप्रचुरमित्यर्थः। अप्रत्ययानामविश्वासानां क्षेत्रमुत्पत्तिस्थानम्। स्वर्गद्वारस्य विघ्नोऽन्तरायभूतं। नरकपुरस्य मुखं द्वारम्। सर्वासां मायानामलीकानां करण्डं स्थापनपात्रम्। विषम्। प्रचुरममृतं यस्मिन् तदमृतमयं। पुनः कथंभूतं प्राणिनां मोहपाशः॥ पाशवन्मोहेन बन्धकमित्यर्थः। स्रग्धरावृत्तमिदम्॥ ७६॥

भा॰ टी॰—सन्देहोंका भंवर, अविनयका घर, साहसका नगर, दोषोंका पात्र, सैंकडोंप्रकारके कपटोंसे भराहुआ, अविश्वासकी भूमि, स्वर्गद्वारका विघ्नकारक, नरकनगरका द्वार, सम्पूर्णमायाओंका पिटारा, विषरूप, अमृतमय, और मनुष्योंको मोहके फन्देमें फसानेवाला यह स्त्रीरूप यंत्र किसने निर्माण किया है॥ ७६॥

छप्पय—परम भरमको भौंर, भवन है गूढ गरवको। अनुचित कृतकौं सिंधु कोष है दोष अरवको। प्रगट कपटको कोट खेत अप्रतीति करनको। सुरपुरको बटमार नरकपुरद्वार करनको। यह युवतियंत्र कौने रच्यो महा अमृत विषसों भर्यो। थिरचर नर किन्नर सुर असुर सबके गल बंधन कर्यो॥ ७६॥

सत्यत्वे न शशांक एष वदनीभूतो नचेन्दीवरद्वन्द्वं लोचनतां गतं न कनकैरप्यंगयष्टिः कृता॥ किन्त्वेवं कविभिः प्रतारितमनास्तत्त्वं विजानन्नपि त्वङ्मांसास्थिमयं वपुर्मृगदृशां मंदो जनः सेवते॥ ७७॥

सं० टी०—सत्येति । एषः शशांकश्चन्द्रः सत्यत्वे याथार्थ्येन विचारिते वदनं नैव । नच इन्दीवरद्वन्द्वं नीलोत्पलयुग्मं सत्यत्वेन लोचनतां गतं । कनकैः सुवर्णैरपि सत्वे [illegible] यष्टिर्न कृता । किन्तु एवमुक्तप्रकारेण कविभिः उपमा दत्ताऽतः प्रतारितं मनो यस्य तथाभूतो [illegible] जनस्तत्वं जानन्नपि मृगदृशांत्वङ्मांसास्थिप्रचुरं वपुः शरीरं सेवते । शार्दूलविक्रीडितं वृत्तमिदम् ॥ [illegible]

भा० टी०—सच पूंछो तौ न चन्द्रमा स्त्रीका मुख है, न कमलही दोनें नेत्र हैं, और न सुवर्णसेही उसका देह बनाहै, परन्तु कवियोंद्वारा बहकायेहु अंध अर्थात् विवेकरहित मनुष्य इस बातको जानतेहुएभी कमलनयनी स्त्रियोंके चर्म, अस्थि और मांसमय शरीरका सेवन करतेहैं ॥ ७७ ॥

कुण्डलिया—नहिं शशांकसम वदन तिय नील जलजसम नैन । अंग कनकसम है नहीं कोकिलसम नहि बैन ॥ कोकिल सम नहिं बैन झूंठ कवि उपमा दीनि । जानत हैं सब भेद त ऊपट आंखिन कीनी । हाड चाममय नार मन्दमति निसदिन सं वहिं । करें उपाय अनेक ग्लानि चित नेकन आनहिं ॥ ७७ ॥

लीलावतीनां सहजा विलासास्तएव मूढस्य हृदि स्फुरन्ति ॥ रागो नलिन्या हि निसर्गसिद्धस्तत्र भ्रमत्येव मुधा षडंघ्रिः ॥ ७८ ॥

सं० टी०—स्त्रीणां सहजविलासान् दृष्ट्वा मूढपुरुषो मोहितो भवतीति दृष्टान्तेनाह । लीलावतीनामिति । लीलावतीनां स्त्रीणां विलासा हावभावाः सहजाः स्वाभाविका[illegible] ते विलासा मूढस्य तस्य एव हृदि चेतसि स्फुरन्ति प्रकाशन्ते । अत्र दृष्टान्तः । हि यस्मात् [illegible] रागो रक्तत्वं निसर्गसिद्धः निसर्गेण स्वभावेन सिद्धोऽस्ति तत्र नलिन्यां षट्पदो मुधा [illegible] भ्रमति । इन्द्रवज्रावृत्तमिदम् ॥ ७८ ॥

भा० टी०—लीलावतीस्त्रियोंके जो विलास हैं वे स्वाभाविक हैं, वे [illegible] मूढ़नके हृदयमेंही प्रकाशित होतेहैं अर्थात् मूर्खही उनको देखकर मुग्ध होजातेहैं। [illegible] कमलिनीमें ललाई स्वाभाविकहीहै परन्तु भ्रमर उसपर व्यर्थही आसक्त होकर घूमता है अर्थात् [illegible] ॥ ७८ ॥

दोहा—कामिनी कलकल सहजसें मूरख मानत प्यार ।
सहज सुगंधित कुमुदिनी भौंरा भ्रमत गंवार ॥ ७८ ॥

यदेतत्पूर्णेन्दुद्युतिहरमुदाराकृति वरं मुखाब्जं तन्वंग्याः किलैकं वसति तत्राधरमधु ॥ इदं तावत्पाकद्रुमफलमिवातीव विरसं व्यतीतेऽस्मिन्काले विषमिव भविष्यत्यसुखदम् ॥७९॥

सं० टी०—तन्वंग्या अमृतमयं मुखाब्जं परिणामे विषमिव भवतीति पक्वफलदृष्टान्तेनाह । यदेतदिति । यत् यस्मात् कारणात् पूर्णेन्दुस्तस्य द्युतिस्तेजस्तां हरतीति उदारा श्रेष्ठा आकृतिर्यस्य तत् वरं श्रेष्ठं एवं तन्वङ्ग्याः कृशाङ्ग्या मुखाब्जं मुखकमलम् । तत्र अधरमधु वसतीति किल श्रूयते । तर्हि इदं तावत् पाकद्रुमस्य महाकालद्रुमस्य फलं अस्मिन् काले यौवनेऽतीते अतिक्रमिते सति अतीव विरसं विषमिवासुखदं भविष्यति । यथा पाकद्रुमस्य फलं पक्त्वा कालोपभुक्तं चेत् रसवत् । नो चेत् तत्कालातिक्रमेण तत्र नश्यति विषमिव भवति तरुण्या मुखमपि तथैव भवतीत्यर्थः । शिखरिणीवृत्तमिदम् ॥ ७९ ॥

भा० टी०—पूर्णिमाके चन्द्रकी छविको हरनेवाला सुन्दर आकारवान् और श्रेष्ठ जो यह स्त्रियोंका मुखकमल है इसमें अधरामृत रहताहै, यह मुख मन्दारके फलकेसदृश अज्ञात वा युवावस्थामेंही अच्छालगताहै, किन्तु वह काल व्यतीतहोनेपर अर्थात् ज्ञान अथवा वृद्धावस्था प्राप्तहोनेपर विषकेसमान दुःखदाई होजाताहै ॥ ७९ ॥

दोहा—अधर मधुर मधु सहित मुख हुतो सबन सिर मौर ।
सो अब बिगरे फलनसम भयो औरसों और ॥७९॥

उन्मीलत्त्रिवलीतरंगनिलया प्रोत्तुंगपीनस्तनद्वन्द्वेनोद्यतचक्रवाकमिथुना वक्त्राम्बुजोद्भासिनी ॥ कान्ताकारधरा नदीयमभितः क्रूराशया नेष्यते संसारार्णवमज्जनं यदि ततो दूरेण संत्यज्यताम् ॥ ८० ॥

सं० टी०—उन्मीलदिति । कान्ता नाम नदीं कृत्वा उभयोः सादृश्यं वर्ण्यते । उन्मीलन्त्यो यास्त्रिवल्यस्ता एव तरङ्गास्तेषां निलयं स्थानं यस्यां सा । प्रकर्षेण उत्तुङ्गं उच्चं पीनं मांसलं स्तनद्वयं

कुचद्वयं तेन उद्यतं चक्रवाकमिथुनं यस्यां सा कुचद्वयमेव चक्रवाकमिथुनमित्यर्थः । अम्बुजं कमलं तेनोद्भासिता शोभायमाना । एवंभूता कान्ताकारधरा नदी इत्यमभितः क्रूरः आशयोऽभिप्रायो यस्याः सा । नदीपक्षे आशयः आवर्त्तः । हे जनाः । यदि भवतां मज्जनं नेष्यते इच्छा नास्ति तर्हि भवद्भिरियं दूरेण सन्त्यज्यताम् । शार्दूलविक्रीडितं वृत्तमिदम् ॥८

भा० टी०--शोभित उदरकी त्रिवलीही तरङ्गोंका समूह है, उन्नत पुष्ट दोनों स्तनही चक्रवाकके जोडे हैं, और मुखरूपी कमलसे शोभायमान है जो यह स्त्रीरूपी नदी है सो चारोंऔरसे क्रूराशय (नदीपक्षमें कच्छप युक्त और स्त्रीपक्षमें कठिनाशय) है, इसमें यदि मग्न होना नही चाहतेहो हे मनुष्यो ? इसको दूरसेही त्याग दो ॥ ८० ॥

छपय्य--त्रिवली तरल तरंग लसत कुच चक्रवाकसम
प्रफुलित आनन कंज नार यह नदी मनोरम । ९०
चाल चलत भवसागर सन्मुख । हाथ धरतही ऐंच जात
कों अपनी रुख । संसारसिंधु चाहत तर्यौ तौ तू यासों दूर
जाकौ प्रवाह अतिही प्रवल नैक न्हातही जात वह ॥ ८०

जल्पन्ति सार्द्धमन्येन पश्यन्त्यन्यं सविभ्रमाः ॥
हृदये चिन्तयन्त्यन्यं प्रियः को नाम योषिताम् ॥८१

सं० टी०—योषितां प्रियः कोऽपि नास्तीत्याह । जल्पन्तीति । स्त्रियः अन्येन सार्द्धं साकं जल्पन्ति भाषणं कुर्वन्ति । सविभ्रमाः विलासादिचेष्टायुक्ताः सत्यः अन्यं पश्य तथा हृदयेऽन्तःकरणेऽन्यं पुरुषं चिन्तयन्ति । तस्मात् योषितां स्त्रीणां प्रियः को नाम । न कोऽपि नेत्यर्थः ॥ अनुष्टुब्वृत्तमिदम् ॥ ८१ ॥

भा० टी०--स्त्री बातें किसी पुरुषसे करती है, विलाससहित किसी औरको देखती है, और हृदयमें किसी औरकीही चिन्ता करतीहै, [illegible] स्त्रियोंका प्यारा कौन है ? ॥ ८१ ॥

दोहा--मनमें कछु बातन कछु नैननमें कछु और ।
चितकी गति कछु औरही यह प्यारी किहि ठौर ॥८

मधु तिष्ठति वाचि योषितां हृदि हालाहलमेव केवल
अतएव निपीयतेऽधरो हृदयं मुष्टिभिरेव ताड्यते॥८

सं० टी०—योषितां स्त्रीणां वाचि वाण्यां मधु तिष्ठति । हृदि अन्तःकरणे केवलं हालाहलं विषमेव तिष्ठति । अतएव पुरुषेण तासामधरो निपीयते किन्तु हृदयं मुष्टिभिरेव ताड्यते वैतालीयं वृत्तमिदम् ॥ ८२ ॥

भा० टी०—स्त्रियोंकी वाणीमें मधु होताहै किन्तु हृदयमें केवल हलाहल विष होताहै; इसलिये पुरुष उनके अधरामृतका पानकरतेहैं और हृदयको मुष्टिसे ताडनकरतेहैं ॥ ८२ ॥

दोहा—अधरनमें अमृत वसत कुच कठोरता वास ।
याते इनको लेत रस उनकों मर्दन त्रास ॥ ८२ ॥

अपसर सखे दूरादस्मात्कटाक्षविषानलात्प्रकृतिविषमाद्योषित्सर्पाद्विलासफणाभृतः ॥ इतरफणिना दष्टाः शक्याश्चिकित्सितुमौषधैश्चतुरवनिताभोगिग्रस्तं त्यजन्ति हि मन्त्रिणः ॥ ८३ ॥

सं० टी०—अपसरेति । हे सखे ! अस्मात् योषित्सर्पात् दूरादपसर गच्छ । कथंभूतात् । कटाक्षा एव विषानलोऽग्निर्यस्मिन् तस्मात् । पुनःकथंभूतात् । प्रकृत्या स्वभावेन विषमात् कुटिलात् । विलासा एव फणास्ता बिभर्ति तस्मात् । किमित्युच्यते । इतरफणिना सर्पेण दष्टा औषधैश्चिकित्सितुं शक्यन्ते । चतुरवनिताभोगिना ग्रस्तं मंत्रिणो हि निश्चयेन त्यजन्ति । अतो दूरादेवापसर । हरिणीवृत्तमिदम् ॥ ८३ ॥

भा० टी०—हे सखे! कटाक्षकोणानल धारणकरनेवाले, स्वभावसेही विषम और विलासरूपीफणाधारी इस स्त्रीरूपीसर्पसे दूर भागो; क्योंकि अन्यसर्पोंसे डसाहुआ मनुष्य औषधियोंसे अच्छा होसक्ताहै, परन्तु चतुरस्त्रीरूपी सर्पसे डसेहुएको मांत्रिकभी त्यागदेतेहैं ॥ ८३ ॥

दोहा—मंत्र यंत्र औषधनते तजत सर्पविष लाग ।
यह क्यों हूं उतरत नही नारिनयनको नाग ॥८३॥

विस्तारितं मकरकेतनधीवरेण स्त्रीसंज्ञितं बडिशमत्र भवाम्बुराशौ ॥ येनाचिरात्तदधरामिषलोलमर्त्यमत्स्यान् विकृष्य पचतीत्यनुरागवह्नौ ॥ ८४ ॥

छप्पय--कान निरन्तर गान तान सुनवौही चाहत लोचन चाहत रूप रैनदिन रहत सराहत । नासा अतर चहत फूलनकी माला । त्वचा चहत सुखसेज संग कोमल बाला । रसनाहू चाहत रहत नित खाटे मीठे चरपरे । पंचन या परपञ्चसों भूपनकों भिक्षुक करै ॥ ८७ ॥

न गम्यो मन्त्राणां न च भवति भैषज्यविषयो न चापि प्रध्वंसं व्रजति विविधैः शान्तिकशतैः ॥ किमपि विदधद्भव्यमसमं स्मरापस्मारोऽयं भ्रमयति घूर्णयति च ॥ ८८ ॥

सं० टी०--नेति । अयं स्मरो मदनोऽपस्मारो वर्तते । [illegible] स्मारनिवारणार्थमुपा ते कर्तव्या इति चेत्तर्हि अयं तथा न भवति । अयं कथंभूतः । मंत्राणां न गम्योऽत्र मंत्रेण कर्तुं कोऽपि न समर्थ इत्यर्थः । भैषज्यविषयो न भवति । न च विविधैरनेकप्रकारैः शान्ति[illegible] प्रध्वंसं नाशं व्रजति प्राप्नोति । अथ च भ्रमास्यावेशात् अङ्गे किमपि भव्यं कर्तव्यमसमं यत्किञ्चित् करोति दृशं दृष्टिं भ्रमयति घूर्णयति च ॥ ८८ ॥

भा० टी०--यह कामदेवरूपी अपस्मार रोग भ्रमके आवेशसे दुःखदाई कर्मकरता हुआ मनको भ्रमाताहै और नेत्रोंको घुमाता है । इस रो[illegible] तो मंत्रोंकी कुछ गति है, न औषध कुछ काम करसक्ता है, और न न[illegible] शान्तिकर्म पाठपूजा आदिसे यह नाशको प्राप्तहोताहै ॥ ८८ ॥

दोहा--मंत्र दवा और आपसों वेदन मिटै न वेद ।
कामबानसों भ्रमत मन कैसे मिट है कैद ॥ ८८ ॥

जात्यन्धाय च दुर्मुखाय च जराजीर्णाखिलाङ्गाय च ग्रामीणाय च दुष्कुलाय च गलत्कुष्ठाभिभूताय च ॥ [illegible]न्तीषु मनोहरं निजवपुर्लक्ष्मीलवश्रद्धया पण्यस्त्रीषु वि[illegible] कल्पलतिकाशस्त्रीषु रज्येत कः ॥ ८९ ॥

सं० टी०—जात्यन्धायेति । पण्यस्त्रीषु वेश्यासु को रज्येत इच्छां करोति । कथंभूतासु । जात्यन्धाय जन्मान्धाय, दुर्मुखाय कुरूपाय, च जरया जीर्णानि अखिलानि सर्वाणि अङ्गानि यस्य तस्मै, ग्रामीणाय अचतुराय, दुष्कुलं नीचकुलं तत्रोत्पन्नाय च, गलत्कुष्ठेन अभिभूताय पीडिताय च, एवमादये लक्ष्मीलवश्रद्धयाऽल्पद्रव्यप्राप्त्यर्थं मनोहरं सुन्दरं निजं स्वकीयं वपुः शरीरं प्रयच्छन्तीषु । पुनः कथंभूतासु । विवेक एव कल्पलतिका कल्पवल्ली तस्याः शस्त्रीषु शस्त्रभूतासु छेत्रीषु । शार्दूलविक्रीडितं वृत्तमिदम् ॥ ८९ ॥

भा० टी०—जो जन्मान्ध, कुरूप, वृद्धावस्थासे शिथिल, गवाँर, नीचजाती और कोढीकोभी अल्पद्रव्यकी आशासे अपना सुन्दर शरीर समर्पण करदेतीहैं, और जो विवेकरूपी कल्पलताकेलिये छुरीके समान हैं ऐसी वेश्याओंसे रमण करनेकी कौन बुद्धिमान् इच्छा करेगा ॥ ८९ ॥

छप्पय—जातिहीन, कुलहीन, अंध, कुत्सित, कुरूपनर, । जराग्रसित कृशगात गलितकुष्ठी अरु पांडर । ऐसौहू धनवान होय तौ आदर वाकौ । अपनौ गात विछाय लेत रस सर्वस ताकौ । गनिका विवेककी वेलकौं कदन करनवारी निरख । वचरहे वडे कुलवन्त नर रचत पचत मूरख हरख ॥ ८९ ॥

वेश्यासौ मदनज्वाला रूपेन्धनसमेधिता ॥ कामिभिर्यत्र हूयन्ते यौवनानि धनानि च ॥ ९० ॥

सं० टी०—वेश्येति । असौ वेश्या पण्यस्त्री रूपमेवेन्धनं काष्टं तेन समेधिता वर्द्धिता मदनज्वाला कामाग्निरस्ति । यत्र यस्मिन् कामिभिः कामुकैः यौवनानि तारुण्यानि धनानि च हूयन्ते । अनुष्टुब्वृत्तमिदम् ॥ ९० ॥

भा० टी०—यह वेश्यातौ सुन्दरतारूपी इन्धनसे प्रचण्डरूपसे जलताहुवा कामाग्नि है । और कामीपुरुष इसमें अपने यौवन और धनकी आहुति देतेहैं ॥ ९० ॥

दोहा—गनिका कनिका अगिनकी रूपसमिध मजबूत ।
होम करत कामीपुरुष धन यौवन आहूत ॥ ९० ॥

कश्चुम्बति कुलपुरुषो वेश्याधरपल्लवं मनोज्ञमपि ॥
चारभटचौरचेटकनटविटनिष्ठीवनशरावम् ॥ ९१ ॥

सं० टी०—क इति । चारो दूतः भटो योद्धा चौरश्चोरः चेटकं करोति स चे[illegible] नटः नर्तकः विटः भाण्डः इत्यादीनां निष्ठीवनस्य लालोदकस्य शरावं पात्रं एवंविधं मनोज्ञ[illegible] सुन्दरमपि वेश्याया अधरपल्लवं कः कुलपुरुषः कुलीनश्चुम्बति । अकुलीन एव चुम्बति कुली[illegible] नेतिभावः ॥ आर्यावृत्तमिदम् ॥ ९१ ॥

भा० टी०—वेश्याका अधरपल्लव यदि सुन्दर है तौभी उसको कुली[illegible] पुरुष नहिं चुम्बता है क्यों कि वह तौ ठग, योद्धा, चोर, दास, नट और जा[illegible] थूकनेका पात्र है ॥ ९१ ॥

सोरठा—गनिकाके मृदु ओठको कुलीन चुम्बन करैं ।
नट, भट, विट, ठग गोठ पीकपात्र है सबनको ॥९१॥

इति कामिनीनिगर्हणम् ।

धन्यास्त एव तरलायतलोचनानां तारुण्यरूपघनपीनपयो-धराणाम् ॥ क्षामोदरोपरिलसत्त्रिवलीलतानां दृष्ट्वाकृतिं विकृतिमेति मनो न येषाम् ॥ ९२ ॥

भा० टी०--जो मनुष्य रसखेदसे खिन्न होकर मत्तहाथीके कुम्भोंके समान विस्तीर्ण तथा कुङ्कुमसे भीजेहुए स्त्रीके स्तनोंपर अपने वक्षःस्थलको रखकर स्त्रीके भुजारूपी पंजरके मध्यस्थ होकर क्षणमात्रभी निद्रालु होकर रात्रि व्यतीत करताहै वह धन्य है ॥ ९६ ॥

छपय्य—मत्तगयन्दके कुम्भसे राजत केसरकर्दम साने । तिन पीनपयोधरमें विलसैं रसरीति सयाने। रसखेदहि दूर बहाय करैं कौतुक मनमाने । डार प्रियाभुजकण्ठ रहैं सुखसौं लपटाने॥ सोवत अस गल लाग उरोजन ऊपर करधर । तेही जगमें धन्य धन्य वे धन्य सुभगनर ॥ ९६ ॥

सुधामयोऽपि क्षयरोगशान्त्यै नासाग्रमुक्ताफलकच्छलेन।
अनङ्गसंजीवनदृष्टिशक्तिर्मुखामृतं ते पिबतीव चन्द्रः ॥९७॥

सं० टी०---प्रियाया नासाग्रमौक्तिकं चन्द्रत्वेनोत्प्रेक्ष्य वर्णयति । सुधामय इति । हे नायिके! सुधामयोऽमृतमयः अतएव अनङ्गस्य कामस्य संजीवने दृष्टिशक्तिर्दृष्टिसामर्थ्यं यस्य सः। कामोद्दीपक इत्यर्थः । एवंविधोऽपि चन्द्रः क्षयरोगस्य शान्त्यै शमाय नासाया नासिकाया यदग्रं तत्सम्बन्धि यन्मुक्ताफलकं तस्य छलेन मिषेण ते मुखामृतं पिबतीवेत्यहं मन्य इति शेषः ॥ उपजातिर्वृत्तमिदम् ॥ ९७ ॥

भा० टी०--हे सुन्दरि! अमृतमय अतएव कामदेवके चैतन्यकरनेकी दृष्टिसामर्थ्य रखनेवाला चन्द्रमा क्षयरोगकी शान्तिकेलिये नाकमोतीके मिषसे तेरे अधरामृतका पान करताहै ॥ ९७ ॥

सवैया—होय अनंग सतनु सरसावत देखतही जाकूं दृग भरकै। सोई निजरोगक्षयनाशन हित करत उपाय छहरकै॥ जदपि सुधामय आप तदपि नकवेसररूप सुधरकै॥ अधरसुधारस सुंदरि तेरौ पीवतहै चन्दा मिस करकै ॥ ९७ ॥

दिशं वनहरिणीभ्यो वंशकाण्डच्छवीनां कवलमुपलकोटिच्छिन्नमूलं कुशानाम् । शुकयुवतिकपोलापाण्डु ताम्बूलवल्लीदलमरुणनखाग्रैः पाटितं वा वधूभ्यः ॥ ९८ ॥

संग कहा सुख वातन द्वै है। कहा अधर मधुपान कहा लोचन
छवि छ्वै है। मुखकमलश्वाससौगन्ध कहा कठिनकुचकौ परस।
पररम्भन चुम्बन कहा जोगी जन मन एकरस ॥ ९४ ॥

अजितात्मसु सम्बद्धः समाधिकृतचापलः ॥
भुजङ्गकुटिलः स्तब्धो भ्रूविक्षेपः खलायते ॥ ९५ ॥

सं० टी०--अजितात्मस्विति। स्त्रिया भ्रूविक्षेपः कटाक्षचालनं खलायते खल इवाचरति। कीदृशो भ्रूविक्षेपः खलश्च। न जितः आत्मा चित्तं यैस्तेष्वजितेन्द्रियेषु संबद्धः। तथा समाधौ चित्तैकाग्र्ये पक्षे सम्यगाधौ मनःपीडायां विषये कृतं चापलं येन सः। तथा भुजङ्गो जारस्तद्वत् पक्षे भुजङ्गवत् सर्पवत् कुटिलः। तथा स्तब्धः स्थिरः पक्षे गर्विष्ठः एवंविधः। अनुष्टुब्वृत्तमिदम् ॥ ९५ ॥

भा० टी०--अजितेन्द्रिय मनुष्योंसे सम्बन्धरखनेवाला, समाधि (चित्तैकाग्रता अथवा मानसिक पीडाओं)में अत्यन्त चञ्चलता करनेवाला, भुजङ्ग (सर्प अथवा जार) के समान कुटिल, और स्तब्ध यह स्त्रियोंका कटाक्ष खलकेसमान आचरण करताहै ॥ ९५ ॥

दोहा--तिय कटाक्ष खल सरस है करत समाधहि भंग ॥
प्राकृत जन संसर्गरत शठ इव कुटिल भुजंग॥९५॥

मत्तेभकुम्भपरिणाहिनि कुङ्कुमार्द्रे कान्तापयोधरतटे रसखेदखिन्नः ॥ वक्षो निधाय भुजपञ्जरमध्यवर्ती धन्यः क्षपां क्षपयति क्षणलब्धनिद्रः ॥ ९६ ॥

सं० टी०--[illegible] रात्रौ शेते स धन्य इत्याह। मत्तेभेति। [illegible] निद्रया [illegible] सन् मत्तो मदोन्मत्तो य इभो गजस्तस्य [illegible] [illegible] कान्तायाः पयोधरतटे स्तनतटे [illegible] [illegible] क्षपां क्षणमात्रं लब्धा निद्रा येन [illegible] [illegible] स धन्यः। अतिशयं [illegible] शयनं [illegible] [illegible] ॥ ९६ ॥

भा० टी०--जो मनुष्य रसखेदसे खिन्न होकर मत्तहाथीके कुम्भोंके समान विस्तीर्ण तथा कुङ्कुमसे भीजेहुए स्त्रीके स्तनोंपर अपने वक्षःस्थलको रखकर स्त्रीके भुजारूपी पंजरके मध्यस्थ होकर क्षणमात्रभी निद्रालु होकर रात्रि व्यतीत करताहै वह धन्य है ॥ ९६ ॥

छप्पय—मत्तगयन्दके कुम्भसे राजत केसरकर्दम साने । तिन पीनपयोधरमें विलसें रसरीति सयाने। रसखेदहि दूर वहाय करैं कौतुक मनमाने । डार प्रियाभुजकण्ठ रहैं सुखसौं लपटाने॥ सोवत अस गल लाग उरोजन ऊपर करधर । तेही जगमें धन्य धन्य वे धन्य सुभगनर ॥ ९६ ॥

सुधामयोऽपि क्षयरोगशान्त्यै नासाग्रमुक्ताफलकच्छलेन। अनङ्गसंजीवनदृष्टिशक्तिर्मुखामृतं ते पिबतीव चन्द्रः ॥९७॥

सं० टी०---प्रियाया नासाग्रमौक्तिकं चन्द्रत्वेनोत्प्रेक्ष्य वर्णयति । सुधामय इति । हे नायिके! सुधामयोऽमृतमयः अतएव अनङ्गस्य कामस्य संजीवने दृष्टिशक्तिर्दृष्टिसामर्थ्यं यस्य सः। कामोद्दीपक इत्यर्थः। एवंविधोऽपि चन्द्रः क्षयरोगस्य शान्त्यै शमाय नासाया नासिकाया यदग्रं तत्सम्बन्धि यन्मुक्ताफलकं तस्य छलेन मिषेण ते मुखामृतं पिवतीवेत्यहं मन्य इति शेषः ॥ उपजातिर्वृत्तमिदम् ॥ ९७ ॥

भा० टी०--हे सुन्दरि! अमृतमय अतएव कामदेवके चैतन्यकरनेकी दृष्टिसामर्थ्य रखनेवाला चन्द्रमा क्षयरोगकी शान्तिकेलिये नाकमोतीके मिषसे तेरे अधरामृतका पान करताहै ॥ ९७ ॥

सवैया—होय अनंग सतनु सरसावत देखतही जाकूं दृग भरकै। सोई निजरोगक्षयनाशन हित करत उपाय छहरकै॥ जदपि सुधामय आप तदपि नकवेसररूप सुधरकै॥ अधरसुधारस सुंदरि तेरौ पीवतहै चन्दा मिस करकै ॥ ९७ ॥

दिशि वनहरिणीभ्यो वंशकाण्डच्छवीनां कवलमुपलकोटिच्छिन्नमूलं कुशानाम् । शुकयुवतिकपोलापाण्डुताम्बूलवल्लीदलमरुणनखाग्रैः पाटितं वा वधूभ्यः ॥ ९८ ॥

सं० टी०—दिशेति । हे जन! त्वं वनेऽरण्ये या हरिण्यो मृग्यस्ताभ्यो वंशस्य वेणोः काण्डो दण्डः "काण्डोऽस्त्री दण्डबाणार्ववर्गावसरवारिपु" इत्यमरः । तस्येव छविः कान्तिर्येषां कुशानां दर्भाणां उपलस्य पाषाणस्य कोटिरग्रभागस्तेन छिन्नं मूलं यस्यैवंविधं कवलं ग्रासं "ग्रासस्तु कवलः पुमान्" इत्यमरः । दिश देहि । वाऽथवा वधूभ्यः स्त्रीभ्योऽरुणानि कृष्णलोहितानि "अरुणः कृष्णलोहितः" । ईषद्रक्तानीतियावत् । यानि नखानि तेषामग्राणि तैः परिछिन्नं एवंविधं शुकयुवत्याः कीरस्त्रियाः "गृध्रौ कीरशुकौ समौ" इत्यमरः । कपोलो गण्डतलं तद्वत् आ ईषत् पाण्डुः पीतमिश्रश्वेतवर्णो "पाण्डुस्तुपीतभागार्धः केतकीधूलिसन्निभः" इतिशब्दार्णवः । या ताम्बूलवल्ली तस्या दलं पर्णं दिशेत्यर्थः । मालिनीवृत्तमिदम् ॥ ९८ ॥

भा० टी०—हे मनुष्यो! तुम याताै वनमृगियोंकेलिये वांसके दण्डकी समान छविवाली पत्थरके अग्रभागसे कटीहुई जडवाली कुशाओंके ग्रास दो अथवा उत्तमस्त्रियोंकेलिये अरुणनखोंसे तोडेहुए शुकयुवती (सुई) के कपोलके समान किञ्चित पाण्डुवर्णवाले ताम्बूल दो ॥ ९८ ॥

दोहा—वनमृगीनके दैनकौं हरे हरे तृण लेहु ।
अथवा पीरे पानकौ वीरा वधुवन देहु ॥ ९८ ॥

वैराग्ये संचरत्येको नीतौ भ्रमति चापरः ॥ शृङ्गारे रमते कश्चिद्भुवि भेदाः परस्परम् ॥ ९९ ॥

सं० टी०—वैराग्य इति । एकः पुरुषो वैराग्ये संचरति । चापरोऽन्यो नीतौ भ्रमणं करोति । कश्चित्पुरुषः शृंगारे रमते । एवं भुवि पृथिव्यां पुरुषाः परस्परं भेदविशिष्टा इत्यर्थः । अनुष्टुब्वृत्तमिदम् ॥ ९९ ॥

भा० टी०—कोई पुरुष वैराग्यमें संचार करताहै, कोई मनुष्य नीतिमें भ्रमणकरताहै, और कोई शृंगारमें रमताहै, इसप्रकार मनुष्योंकी इच्छा परस्पर एकदूसरेसे भिन्न है! नीति, शृंगार और वैराग्य तीनोंशतकोंके निर्माणकरनेमें भर्तृहरिजीका यह प्रयोजन है कि जिसकी जिसमें रुचि हो वह उसीको विचारे ॥ ९९ ॥

दोहा—काहूके वैराग्यरुचि काहूके रुचि नीति ।
काहूके शृंगाररुचि जुदी जुदी परतीति ॥ ९९ ॥

वैचन्त्यं नास्ति नाचेयं नास्मिन्नन्यास्पृहा मनोज्ञेऽपि ॥ स्वर्णादिरपि मुक्ताद्या न मनःकामसंगिन्याः ॥ १०० ॥

सं० टी०—यदिति । यस्य यत् रुचिरं नास्ति तस्मिन् मनोज्ञेऽपि सुन्दरेऽप्यस्य स्पृहा न भवति । अत्र दृष्टान्तः । चन्द्रस्तु सर्वेषां प्रियकरो रमणीयः । तस्मिन् सूर्यविकासिन्याः सरोजिन्या मनसः कापि प्रीतिर्न भवति । एवं यस्य यत्र प्रीतिस्तस्य तत् रुचिकरं । अतो नीतिः शृङ्गारश्च वैराग्यं च ज्ञातम् । एवं यत्र यस्य प्रीतिस्तेन तदभ्यस्तम् । इदं शृंगारशतकं भर्तृहरिणा कृतम् । तत् कामबुद्ध्या न कृतं । अतएव " समस्तभावैः खलु बन्धनं स्त्रियः " इत्युक्तम् । अन्येऽपि " दुःखैकहेतुरिति कामिनीति " इत्यादीनि वचनानि स्थले स्थले स्थितानि । तासां कामिनीनां प्रशंसा कामिभिः क्रियते नाविरक्तैः । प्रान्ते सर्वं विवेकदृष्ट्या निन्दितम् ॥ आर्यावृत्तमिदम् ॥१००॥

भा० टी०—जो वस्तु जिसको प्रिय नहीं वह चाहे जैसी सुन्दर क्यों न हो परन्तु उसको अच्छी नहीं लगती; जैसे चन्द्रमा सबको प्रिय है परन्तु सूर्य-विकासिनी कमलिनियोंकी प्रीति उसपर नहीं होती; अर्थात् कमलिनियोंको चन्द्रमा अच्छा नहीं लगता है ॥ १०० ॥

दोहा—जो जाके मन भावतो ताकों तासों काम ।
कमलन चाहत चांदनी विकसत परसत घाम ॥१००॥

इति श्रीमद्भर्तृहरिकृतं भाषाटीकोपेतं द्वितीयं शृंगारशतकं सम्पूर्णम् ॥ २ ॥

ओम् ।

श्रीहरिम्वन्दे ।

श्रीवृन्दावनविहारिणे नमः

अथ भर्तृहरिकृतं ।

तृतीयं वैराग्यशतकं प्रारभ्यते ।

मङ्गलाचरणम् ।

चूडोत्तंसितचारुचन्द्रकलिकाचञ्चच्छिखाभास्वरो
लीलादग्धविलोलकामशलभः श्रेयोदशाग्रे स्फुरन् ।

अन्तःस्फूर्जदपारमोहतिमिरप्राग्भारमुच्चाटयन्
चेतःसद्मनि योगिनां विजयते ज्ञानप्रदीपो हरः ॥ १ ॥

सं० टी०—विश्वेशं मोक्षदातारं भैरवं भीतिनाशनं। बुद्धिप्रदं बुद्धिराजं सर्वः सादरम् ॥ १ ॥ लम्बोदरमुखं ध्यात्वा नत्वा कृष्णं सदाशिवम्। वैराग्यशतकव्याख्यां यथाप्रज्ञं ... हम् ॥ २ ॥ दिक्कालाद्यनवच्छिन्ना मूर्तिर्यस्य महात्मनः। तस्मै कृष्णाय महते तेजोरूपाय वै नमः ॥

इह खलु सकलवसुधेशशिखामणी राजर्षिप्रवरः श्रीमद्भर्तृहरिर्वैराग्यशतकमेवारभ... राजकुलोत्पन्नत्वात् राज्ञो नीतिशृंगारावश्यमपेक्षितावतः प्रथमं नीतिशृंगारशतके वैराग्यशत... नतरणरूपे निर्मायेदानीं वैराग्यशतकमेवारभमाणः स्वेष्टदेवं सदाशिवं विशेषयन्नमति। चूडोत्तं... चूडायां केशपाशे उत्तंसिता भूषणभूता चारु रमणीया या चन्द्रकलिका चन्द्रकला तस्याः... दैदीप्यमाना या शिखाः किरणास्ताभिर्भास्वरः शोभायमानः। लीलया दग्धो विलोलश्चञ्चलः कामरू... मदनपतङ्गो येन सः। श्रेयः कल्याणं तस्य दशा अवस्था तदर्थं अग्रे स्फुरन् प्रकाशमानः लोक... कल्याणं कर्तुं प्रकटीभूत इतिभावः। अन्तरभ्यन्तरे स्फूर्जत् प्रकाशमानोऽपारः पाररहितो यो मो... स एव तिमिरमन्धकारोऽज्ञानं यावत्तस्य प्राग्भारोऽतिशयस्तमुच्चाटयन् समूलं नाशयन्। एवंवि... भक्तान्तःकरणे ज्ञानं प्रदीपयति प्रकाशयतीति ज्ञानप्रदीपः। हरः शिवः योगिनां चेत... सद्म गृहं तस्मिन् विजयते सर्वोत्कर्षेण वर्तते। शार्दूलविक्रीडीतं वृत्तमिदम् ॥ १ ॥

भा० टी०—राजर्षिप्रवर श्रीभर्तृहरिजी अपने इष्टदेव सदाशिवको ... स्कार करतेहैं। जिनकी जटाओंमें चञ्चल और दैदीप्यमान चन्द्रकला विरा... है, और लीलाहीसे जिन्होंने कामदेवरूपी पतङ्गको भस्म करदियाहै ऐसे महादेवजी हैं सो कल्याणकी स्फूर्ती करतेहुए और पहिले भयेहुए ... अंधकारका नाश करतेहुए योगिजनोंके हृदयरूपीगृहमें दीपककेसमान ... शमान हैं ॥ १ ॥

छपय्य—चन्द्रकलामय भान्ति कान्ति बहु भांतिन ... जार्यो कामपतंग अंग विन भयौ जु परसत। महामोह ... हृदयकौ तिमिर नसावत। अपनौ आतमरूप प्रकट कर दिखावत। द्युति दिपत अखंडित एकरस अद्भुत अतुलित ... कवर। जगमगत संत चितसदनमें ज्ञानदीप जय जयति हर

बोद्धारो मत्सरग्रस्ताः प्रभवः स्मयदूषिताः ॥
अबोधोपहताश्चान्ये जीर्णमङ्गे सुभाषितम् ॥ २ ॥

सं० टी०—वेत्ता मात्सर्यसंयुक्तः प्रभुर्गर्वेण दूषितः । लीनं सुभाषितं सर्वं देह एव तु नो वहिः ॥ महतां गुणान् महत्स्वेव लीनानालोक्य शोचयन्नाह । बोद्धार इति । बोद्धारः सदसद्विवेककर्तारोऽहमेव बहुज्ञोऽल्पज्ञं किमन्यं पृच्छेयमित्यन्यस्मिन्नल्पज्ञत्वदोषदर्शनरूपेण मात्सर्येण ग्रस्ताः सर्पेण भेका इव निगीर्णाः । प्रभवः सर्वगुणग्रहणसमर्थाः मां धनादिसम्पन्नमालोक्य सर्वे पण्डिताः सन्यासिनश्च जीविकार्थमागमिष्यन्तीति स्मयेन गर्वेण दूषिताः दुष्टान्तःकरणाः । अन्ये तु प्रभुपण्डितेभ्योऽतिरिक्ता अबोधेन पदपदार्थाज्ञानेनोपहता हतप्राया इत्यधिकार्यभावात् सुभाषितं सच्छास्त्रमंगे शरीर एव जीर्णं विगलितमहो भाग्यं लोकस्येति भावः ॥२॥

भा० टी०—विद्वान् मनुष्य तौ अपनी विद्याके अभिमानसें ग्रस्तहैं, धनीलोग अपने द्रव्यके गर्वसे किसीविद्वान्का आदरही नहीं करते, और शेष अन्य मनुष्य जो हैं वे अल्पज्ञ हैं कुछ समझही नहीं, इत्यादि कारणोंसे सुभाषित शरीरमेंही नष्ट होजाताहै ॥ २ ॥

कुण्डलिया—पण्डित मत्सरता भरे भूप भरे अभिमान। और जीव या जगतके मूरख महाअजान । मूरख महा अजान देखके संकट सहियै । छन्द प्रबन्ध कवित्त काव्यरस कासों कहिये । वृद्ध भई मनमांहि मधुरवाणी गुणमण्डित । अपने मनकों मार मौनधर बैठत पण्डित ॥ २ ॥

न संसारोत्पन्नं चरितमनुपश्यामि कुशलं विपाकः पुण्यानां जनयति भयं मे विमृशतः ॥ महद्भिः पुण्यौघैश्चिरपरिगृहीताश्च विषया महान्तो जायन्ते व्यसनमिव दातुं विषयिणाम् ॥ ३ ॥

सं० टी०—संसारजनितं वृत्तं सुखदं न कदाचन । सुखरूपं भजेत्कृष्णं [illegible] मात्मनः ॥ १ ॥ संसारचरितं सुखरूपं न भवतीति तत्र लुब्धान् जनान् शिक्षयन्नाह । नेति । [illegible] संसारादुत्पन्नं चरितं व्यवहाररूपं चरित्रमैहिकं च कुशलं कल्याणकरं नानुपश्यामि । [illegible] कपटप्रायकत्वेन दुरितजनकत्वात् पारलौकिकस्य यज्ञदानहोमादेः फलदोषेण [illegible] पुण्यानां विपाकः फलं 'क्षीणे पुण्ये मर्त्यलोकं विशन्तीति, विमृशतो मे मम भयं जनयति । [illegible] भेवाह । महद्भिः पुण्यानां यज्ञदानादीनामोघैः [illegible] मृतपानोर्वशीविहारादिलक्षणा विषया [illegible] वृत्तमिदम् ॥ ३ ॥

भा० टी०—संसारसे उत्पन्न चरित्रोंको हम कल्याणकरनेवाले नहीं देखतेहैं, और पुनीतकर्मोंका फल स्वर्गादिकभी मुझको भयरूप दीखताहै, क्योंकि पुण्योंके नाशहोनेपर स्वर्गसे पतनहोजाताहै; बडे बडे पुण्योंके समूहसे चिरकालसे संचितकियेहुये विषयभी अन्तमें विषयीपुरुषोंको दुःखरूपही होजातेहैं ॥ ३ ॥

छप्पय—या जगसों उत्पन्नभये जे चरित मनोहर। ते सबही क्षणभंग प्रगट यह पूर रह्यौ डर। यज्ञादिकतें स्वर्ग भये तेहू डर मानत। इन्द्र आदि सब देव अवधि अपनीकों जानत। फलभोग करत जे पुण्यकौ तिनकों रोगवियोगभय। दुखरूप सकल सुख देखकै भये सन्तजन ज्ञानमय ॥ ३ ॥

उत्खातं[3] निधिशंकया[2] क्षितितलं[1] ध्माता[6] गिरेर्[4] धातवो[5]
निस्तीर्णः[8] सरितां[7] पतिर्नृपतयो[10] यत्नेन[11] संतोषिताः[12] ॥
मन्त्राराधनतत्परेण[13] मनसा[14] नीताः[17] श्मशाने[15] निशाः[16]
प्राप्तः[22] काणवराटकोऽपि[19] [20] न[21] मया[18] तृष्णेऽधुना[23] मुञ्च[24] माम्[25] ॥ ४ ॥

सं० टी०—धनलिप्सया नानाक्रियाः कुर्वन् फलमलभमानोऽत्युद्विग्नस्तृष्णे मां मुञ्चेति प्रार्थयति । उत्खातमिति । हे तृष्णे ! तव प्रभावान्निधिशंकयाऽत्र निधिर्भविष्यतीति या शङ्का तया क्षितितलं मयोत्खातमुत्खनितम् । तथा गिरेः पर्वतस्य धातवो हरतालादयो मया ध्मातास्ताम्रं सुवर्णं भविष्यतीत्याशयाऽग्निना संयोजिताः । सरितां पतिः सागरोऽपि निस्तीर्णः धनलिप्सया पोतेनाक्रान्तः । नृपतयो राजानो यत्नेन सन्तोषिताः प्रसादिताः । तथा मंत्राराधने तत्परं यन्मनस्तेन मनसा रात्र्यः श्मशाने नीताः । कश्चित्प्रेतः प्रसन्नो भूत्वा धनं दद्यादिति निर्गमितास्तथापि मया काणवराटकोऽपि न प्राप्तः भग्नकपर्दिकापि न लब्धा । हे तृष्णेऽधुना मां मुञ्च परित्यजेत्यर्थः । तृष्णापरवशो नरो महद्यत्नं करोति फलं तु भाग्यानुसारेण लभतेऽतः सर्वथा तृष्णा परित्याज्येति भावः । निखनेद्वसुधां ध्मायाद्गिरेर्धातुं सदोदधेः । निस्तरेदुदधिं यत्नात् यद्वा शान्तिर्विचारतः । शार्दूलविक्रीडितं वृत्तमिदम् ॥ ४ ॥

भा० टी०—द्रव्य मिलनेकी आशासे मैंने पृथ्वीको खोदी, रसायन सिद्ध होनेके निमित्त पर्वतकी अनेक धातुओंको फूंक डाली, रत्नप्राप्तिकी आशासे नदियोंके पति समुद्रकेभी पार गया, राजाओंको अनेकप्रकारके यत्नोंसे प्रसन्न किये, और मंत्र सिद्धकरनेकेलिये मन लगाकर निरन्तर रातोंको महाश्मशानमें

...किया, परन्तु मन भर भूख ... एक कानी कौड़ीभी मेरे हाथ नहीं आई इसके हे तृष्णे ! अब तो मेरा पिण्ड छोड़ ॥ ४ ॥

छप्पय—खोदत डोल्यो भूमि गढीहू न पाई सम्पति । धौंकत रस्यो पखान धनकके लोभ लगी मति । गयो सिन्धुके पार तहां मुक्ताहू न पायो । कौड़ी कर नहीं लगी नृपनकों सीस नवायो । साधे प्रयोग श्मशानमें भूत प्रेत वेताल सजि । कितहू भयो न वांछित कछू अबतो तृष्णा मोहि तज ॥ ४ ॥

भ्रान्तं देशमनेकदुर्गविषमं प्राप्तं न किंचित्फलं त्यक्त्वा जातिकुलाभिमानमुचितं सेवा कृता निष्फला ॥ भुक्तं मानविवर्जितं परगृहे साशंकया काकवत्तृष्णे जृम्भसि पापकर्मनिरते नाद्यापि संतुष्यसि ॥ ५ ॥

सं० टी०—एवमनुभूय वैराग्याद्यन्तविरोधत्वात्तावत्तृष्णां दूषयति । भ्रान्त्वेति । हे तृष्णे ! त्वमद्यापि न सन्तुष्यसि तृप्ता न भवसि । तव प्रभावाद्यदयोग्यं मया कृतं तच्छृणु । अनेकैः दुर्गैः कठिनस्थानैर्विषमो दुर्गमो यो देशस्तं भ्रान्त्वा किञ्चिदपि फलं द्रव्यं मया न प्राप्तम् । किंच जातिश्च कुलं च तयोरनुचितं योग्यमभिमानं त्यक्त्वा नीचानां सेवा कृता साऽपि निष्फला जाता । किंच मानेन विवर्जितं निमंत्रणेन विना परगृहे मया भुक्तं तदपि दुर्वचनं मा ब्रूयादिति काकवत् साशङ्कया भयेन सहैत्येवं मम दुर्दशां कृत्वाऽपि जृम्भसि वर्द्धसे । हे पापकर्मनिरते दुष्टकर्मकारयित्रि हे निर्दये ! अद्यापि तव सन्तोषो न जायते इत्यर्थः । लोभादनेकदेशेषु मनो भ्रमसि लोलुप । शिवस्मरणसन्देशं संभ्रमश्रममहारिणम् ॥ वृत्तं पूर्वोक्तम् ॥ ५ ॥

भा० टी०—मैंने अनेक दुर्गमदेशोंमें भ्रमणकिया तथापि कुछ फल नहीं प्राप्तहुआ, यथार्थ जाति और कुलका अभिमान त्यागकर पराई सेवा की सोभी निष्फल हुई; और मानको त्यागकर कौएकेसमान सशंकित पराये घरपर भोजन किया । तृष्णे ! (यह सब तेरेहीकारण हुआ) हे पापकर्ममें प्रवृत्त सदैव वर्द्धमान तृष्णे ? तुझको अबभी सन्तोष नहींहोताहै ॥ ५ ॥

छप्पय—भटकौ देश विदेश तहां फल कछुव न पायौ । निज-कुलकौ अभिमान छाँड सेवा चित लायौ । सहि गारी और खीझ-

हाथ झारत घर आयौ। दूर करतहू दौरि स्वान जों परगृह खायौ। इहि भाँति नचायौ मोहितें वहकायौ दै लोभलत। अजहूं न तोहि सन्तोष कहुं तृष्णा तू पापिन प्रवल ॥ ५ ॥

खलोल्लापाः सोढाः कथमपि तदाराधनपरैर्निगृह्यान्तर्बाष्पं हसितमपि शून्येन मनसा ॥ कृतश्चित्तस्तंभः प्रहसितधियामञ्जलिरपि त्वमाशे मोघाशे किमपरमतो नर्तयसि माम् ॥ ६ ॥

सं० टी०--तृष्णायामनेकानि दुःखानि प्रदर्श्य तद्भेदाशायामपि तानि दर्शयंस्तां खलाश्रितां प्रार्थयते। खलोल्लापा इति। तदाराधनपरैः खलसेवनपरैरस्माभिः खलोल्लापाः खलानां दुष्टानामुल्लापाः दुर्वाक्यानि सोढा मर्षिताः तद्दुर्वचनैर्जातं यद्बाष्पमश्रुजलं तत्कथमप्याशाप्रभावेनान्तर्निगृह्य संतत शून्येनोत्साहरहितेन मनसा हसितमप्ययं दुष्टो न जानीयान्मद्वाक्यात् खिन्नोऽयमिति हास्यमपि कृतमित्यर्थः। दुष्टवचनात् चेतस्युद्वेगे जातेऽप्येनं दुष्टं विहाय गच्छेयमिति तथापि हे आशे! चित्तस्तम्भः कृतः। एवं विहाय गमने किमपि न मिलिष्यतीति मनसो निरोधः कृतः तव प्रभावात्प्रहताधियां धनमदेन प्रतिहता नष्टा धीर्बुद्धिर्येषां तेषामग्रे अञ्जलिः करसंपुटोऽपि कृतो न जानीयादयं मद्वचनादुद्विग्न इति। मोघाशे मोघा निष्फला आशा अभिप्रायो यस्यास्तथाभूते हे आशेऽतःपरमन्यं मां किमु कस्मान्नर्तयस्यधुना तु मां मुञ्चेतिभावः। खलवाग्बाणविद्धोऽपि तत्सेवानिरतो भवेत्। शिवसेवारतो न स्याद् यत्रानन्दो निराश्रयः। शिखरिणीवृत्तमिदम् ॥ ६ ॥

भा० टी०--दुर्जनोंकी सेवा करनेमें हमने उनके कुवाक्य सहनकिये नेत्रोंके आसुओंको रोक उदासमनसे उनके सन्मुख हंसाकिये, और चित्तको स्थिरकर उन हतबुद्धिमनुष्योंकेसन्मुख हातभी जोडे, अब हे व्यर्थआशाकरनेवाली आशे! क्यों मुझको वृथा नचातीहै ॥ ६ ॥

छप्पय--सहे खलनके बैन इतेपर तिनहिं रिझाये। नैननको जल रोक शून्यमन मुख मुसक्याये। देत नहीं कछु वित्त तऊ कर जोरि दिखाये। कर कर चाव करोर भोरही दौरत आये। सुनि आस नटी प्रबल तू अति अद्भुतगत गहत। इह भांति मोहि अब और कहा करियो चहत ॥ ६ ॥

आदित्यस्य[1] गतागतैरहरहः[2][4] संक्षीयते[3] जीवितं व्यापा-रैर्बहुकार्यभारगुरुभिः[6] कालो न विज्ञायते[10] ॥ दृष्ट्वा[12] जन्म जराविपत्तिमरणं[11] त्रासश्च[13][14] नोत्पद्यते[15][16] पीत्वा[19] मोहमयीं[17] प्रमादमदिरामुन्मत्तभूतं[18][21] जगत्[20] ॥ ७ ॥

सं० टी०—गमनागमनं कुर्वन् रविर्हरति जीवितम् । सेवितं यैर्हरेः पादकंजं तेषां सुजीवितम् ॥ १ ॥ जगदुन्मादं दुःखसहिष्णुतां कालाज्ञानं च दर्शयति । आदित्यस्य गतागतैर्गमनागमनैरुदयाचलादस्ताचलं प्रति गमनमागमनं तु ततः पुनरुदयाचलं प्रति । एवंप्रकारकैर्गतागतैरहरहः प्रतिदिनं जीवितमायुः क्षीयते नश्यति । व्यापारैर्जगदनेकव्यवहारैः । कथंभूतैः । वहुकर्तव्यभारगुरुभिः वहूनि कार्याण्येव भारा वोढुमशक्यास्तैर्गुरुभिर्महद्भिः । कालो मरणं कियदायुर्गो कियदवशिष्टमिति तु कैश्चिदपि नविज्ञायते न विशेषेणानुभूयते । जन्मादिमरणान्तकर्म सर्वेषामात्मनोऽपि दृष्ट्वा स्वनेत्रगोचरीकृत्वाऽपि त्रासो भयं नोत्पद्यते । अनिष्टकरणात् काश्चिदपि न निवर्तेत इति भावः । तत्र हेतुमाह । पीत्वेति । मोहमयीं मोहप्रचुरां प्रमादरूपां मदिरां पीत्वा जगत् उन्मत्तभूतं कर्तव्याकर्तव्यविचारशून्यं जातमिति शेषः । शार्दूलविक्रीडितं वृत्तमिदम् ॥ ७ ॥

भा० टी०—प्रतिदिन सूर्यके उदय अस्त होनेके संग जीवन क्षीण होता जाताहै, और वहुत वडे २ कार्य व्यापारोंकेकारण समय जाताहुआ नहीं जानाजाताहै; और जन्म, वृद्धावस्था, विपत्ति और मरण देखकरभी भय उत्पन्न नहींहोताहै; इससे ज्ञातहोताहै जगत् मोहमयी प्रमादरूपी मदिरा-को पीकर उन्मत्त होरहाहै ॥ ७ ॥

छप्पय—उदै अस्त रवि होत आयुकों क्षीरण करत नित। गृहधन्देके मांहि समय वीतत अजान चित। आंखिन देखत जन्म जरा अरु विपत्ति मरन नित। तउ डरत नहिं नेक शंकहू नांहि करत चित। जग जीव मोहमदिरा पिये छाके फिरत प्रमादमें। गिर-परत उठत फिर फिर गिरत विषयवासनास्वादमें ॥ ७ ॥

दीनां दीनमुखैः सदैव शिशुकैराकृष्टजीर्णाम्बरां क्रोशद्भिः क्षुधितैर्नरैर्न[10][11] विधुरा दृश्येत[12] चेद्गेहिनी[13] ॥ याच्ञा-

भंगभयेन गद्गदलसत्त्रुट्यद्विलीनाक्षरं "को देही" ति वदेत्स्वदग्धजठरस्यार्थे मनस्वीजनः ॥ ८ ॥

सं० टी०—अतिदीनमुखैःपुत्रैर्युक्ता पत्नी कदम्बरा । न भवेद्देहिनी गेही देहीति न कथं वदेत् ॥ १ ॥ पुत्रादिसंग्रहो विवेकिनामपि दुःखद इत्याह । दीनेति । दीनानि मुखानि येषां तैः शिशुकैर्बालैराकृष्टं जीर्णमम्बरं यस्याः सा अतएव दीना । कथंभूतैः क्रोशद्भिरन्नार्थं रुदद्भिरेवं गृहजनैः क्षुधितैर्विधुराऽतिदुःखवती एतादृशी गेहिनी भार्या चेत् यदि न दृश्येत मनस्विना जने नेतिशेषः । याच्ञाभङ्गभयेन याच्ञा देहीति प्रार्थना तस्या भंगो नाशः न दास्यामीति दातुर्वाक्यं तद्भयेन गद्गदं सबाष्पं गलत् पतत् पदतो वर्णतो वा त्रुट्यत् विलीनानि अस्पष्टानि अक्षराणि यस्मिन् वाक्ये तत् क्रियाविशेषणं वा को मनस्वीजनः धीरः वदेत् देहीति कः कथयेत् । स्वज ठरानलेन दग्धस्य जठरस्यार्थे स्वोदरपूरणायेत्यर्थः । अत्र आकारप्रश्लेषः कार्योऽन्यथार्थभ्रंशः स्यात् । शार्दूलविक्रीडितं वृत्तमिदम् ॥ ८ ॥

भा० टी०--अत्यन्त दीनमुखवाले बालक सदैव जिसका फटाहुआ वस्त्र खींचतेहैं और अन्नकेलिये चिन्तातेहुए क्षुधितमनुष्योंसे जो दुःखित ऐसी गेहिनी यदि न होती तौ ऐसा कौन धीर मनुष्य है जो अपने पेटभरनेकेलिये याचनाभंग होनेके भयके कारण गद्गदकंण्ठसे टूटे फुटे अक्षरोंमे "मुझको कुछ दीजिये" ऐसी वाणी बोलता, अर्थात् स्त्री सब अनर्थोंका मूल है ॥ ८ ॥

छपय्य--फट्यौ पुरानौ चीर ताहि खेंचत अरु फारत। छोटे २ बाल भूखही भूख पुकारत। घरमांही नहिं अन्न नारिहू निर्दय यातें। भई महाजडरूप कढत मुखसों नहिं बातें। यह दशा देख अरवरत चित्त जीव थरथरत रुकत सुख। अपने सुजरे या उदरहित "देहु" कहै को सतपुरुष ॥ ८ ॥

निवृत्ता भोगेच्छा पुरुषबहुमानो विगलितः समानाः स्वर्याताः सपदि सुहृदो जीवितसमाः ॥ शनैर्यष्ट्योत्थानं घनतिमिररुद्धे च नयने अहो धृष्टः कायस्तदपि मरणापायचकितः ॥ ९ ॥

सं० टी०—भोगशक्त्यायभावेऽपि भोगाशया मरणं नेच्छति पुमानित्याह । निवृत्तेति । इन्द्रियाणां शिथिलत्वात् भोगेच्छा निवृत्ता गता । पुरुषेषु बहुमानः आदरोऽपि विगलितो नष्टः ।

समानाः स्ववयसः स्वर्याताः मृता इत्यर्थः । सपदीदानीं येऽवशिष्टाः सुहृदः स्वभावेनोपकारकास्ते जीवितसमाः जीवितं समं पूर्णं येषामथवा मम जीवनतुल्या असमर्थास्तिष्ठन्तु म्रियतां वा तैर्न किमपि सिध्यतीत्यर्थः । अधुना शनैर्यष्ट्युत्थानं लकुटं धृत्वाऽऽसनादुत्थानं तदपि न शीघ्रं भवति । निबिडेन तिमिरेणान्धकारेण रुद्धे आवृते नयने अंधत्वमपि जातं तदपि तथाविधदशायामप्यहो धृष्टो निर्लज्जः कायो देहो मरणरूपो योऽपायस्तेनचकितः भोगतृष्णाया पतितुं नेच्छतीति भावः । अशक्ततामिन्द्रियाणां दृष्ट्वा त्यक्त्वा भयं मृतेः । भवसागरपाराय भोगेच्छां च परित्यजेत् ॥ शिखरिणीवृत्तमिदम् ॥ ९ ॥

भा० टी०—इन्द्रियोंके शिथिल होनेसे भोगोंकी इच्छा निवृत्तहोगईहै, मनुष्योंमेंसे अपना आदरभी घटगयाहै, समानअवस्थावालेभी मरगयेहैं, जो इष्ट मित्र हैं वेभी समाप्तहोनेवाले हैं, अथवा अपनेसमान हैं, आपभी लकडीके सहारे उठनेलगेहैं, और नेत्रोंमें घोर अंधकार छागयाहै, तथापि यह काया ऐसी निर्लज्ज है कि अपना मरण सुन चकित होजातीहै ॥ ९ ॥

छप्पय—भगी भोगकी चाह गयौ गौरव गुमान सब । मित्र गये सुरलोक अकेले आप रहे अब । उठत जु लकरी टेक तिमिर आंखनमें छायौ । शब्द सुनत नहिं कान वचन बोलत बहकायौ । यह दशा वृद्धतनकी तऊ चकित होत मरिबो सुनत । देखौ विचित्र गति जगतकी दुखहूकों सुखसों सुनत ॥९॥

हिंसाशून्यमयत्नलभ्यमशनं धात्रा मरुत्कल्पितं व्यालानां पशवस्तृणांकुरभुजः सृष्टाः स्थलीशायिनः ॥ संसारार्णवलंघनक्षमधियां वृत्तिः कृता सा नृणां यामन्वेषयतां प्रयान्ति सततं सर्वे समाप्तिं गुणाः ॥ १० ॥

सं० टी०—विधिकृतविषमां वृत्तिमालोक्य शोचन्नाह । हिंसेति । [illegible] पालयति पोषयतीति धाता तेन हिंसाशून्यं जीवव्यापारहित[illegible] [illegible] व्यालानां सर्पाणां मरुदाहुरूपं कल्पितं रचितम् । पशवः [illegible] भुजः स्थलपृष्ठभूमिः भूमिशायिनः [illegible] संसार[illegible]लंघने क्षमा समर्था [illegible] सम्पादयितुं सर्वे [illegible]

चितं कृतमितिभावः। धात्रा तु निर्मिता वृत्तिर्जीविका न यथोचिता। कृतातःसर्वजीवानां जीविकादं शिवं भजेत् ॥ १ ॥ शार्दूलविक्रीडितं वृत्तमिदम् ॥ १० ॥

भा० टी०—विधातानें सर्पोंकेलिये हिंसारहित स्वयंप्राप्त वायुका भोजन जीविका बनाई, और पशु ऐसे बनाये जो घास पात खातेहैं, और पृथ्वीपर सोतेहैं, परन्तु जिनकी बुद्धि संसाररूपीसमुद्रके पारकरनेमें समर्थ हैं ऐसे जो मनुष्य हैं उनकी वृत्ति ऐसी बनाईहै कि जिसकी खोजमें सम्पूर्ण गुण समाप्त होजांय पर वह न प्राप्तहोय ॥ १० ॥

छपय्य—विन उद्यम विन पाप पवन सर्पनकों दीन्हों। तैसेंही सबठौर घास पशुअनकों कीन्हों। जिनकी निर्मलबुद्धि तरन भवसागर समरथ। तिनकी दूवर वृत्ति हरत गुन ज्ञान ग्रंथ गथ। विधि अवधि करीं तें अतिअधिक याते नर परघर फिरत। निशि द्यौस पचत तनमन तचत लचत रचत उरझत गिरत ॥ १० ॥

न[५] ध्यातं[६] पद[३]मीश्वरस्य[२] विधिवत्[४] संसारविच्छित्तये[१] स्वर्गद्वारकपाटपाटनपटु[७]र्धर्मो[८]ऽपि[९] [१०]नोपार्जितः[११] ॥ नारीपीनपयोधरोरुयुगलं[१२] स्वप्ने[१३]ऽपि[१४] ना[१५]लिङ्गितं[१६] मातुः[१७] केवलमेव[१८] यौवनवनच्छेदे[१९] कुठारा[२१] वयम्[२०] ॥ ११ ॥

सं० टी०—अधुनोत्तममध्यमनिकृष्टमिति जन्मनस्त्रिविधं फलं क्रमेण दर्शयंस्तत्रास्माभिः किमपि न प्राप्तमित्यनुतपति। न ध्यातमिति। संसारस्य जन्ममरणरूपस्य विच्छित्तये विनाशायेश्वरस्य पदं पादकमलं यथोत्तमैर्ध्यायते तथाऽस्माभिर्विधिवच्चित्तैकाग्र्येण न ध्यातं नैव चिन्तितम्। तथा स्वर्गद्वारस्य कपाटमावरकं यत्पापं तस्य पाटने उच्चाटने पटुःसमर्थो धर्मो यो मध्यमैः स्वर्गकामैः क्रियते सोऽप्यस्माभिर्नोपार्जितः। अथ च नार्याः पीनौ यौ पयोधरौ स्तनौ ऊरू च तयोर्युगलं द्वयं यथा पामरैः विषयभोग एव पुरुषार्थ इतिमतिभिरालिंग्यते तथाऽस्माभिः स्वप्नेऽपि नालिङ्गितम्। अतः केवलं मातुर्यौवनमेव वनं तस्य छेदे कुठारा एव वयं जाताः वृथैव जन्म गतं किमपि न कृतमिति भावः। शिवध्यानं सदा कार्यमेनसो नाशहेतवे। रागादिविषयासक्तो न नयेत्कालमात्मनः ॥ १ ॥ वृत्तम पूर्वोक्तम् ॥ ११ ॥

भा० टी०—संसारके छेदनकरनेकेलिये ईश्वरके चरणकमलका विधिवत् हमने ध्यान नहीं किया, स्वर्गद्वारके कपाट खोलनेमें निपुण धर्मका संचय नहीं

किया, और नारीके दृढकुचोंका स्वप्नमेंभी आलिङ्गन नहींकिया, हमतो केवल माताके यौवनरूपी वनके काटनेकेलिये कुठारही उत्पन्नहुए ॥ ११ ॥

छप्पय—विधिसों पूजे नाहिं पांय प्रभुके सुखकारी । प्रभुकौ धरौ न ध्यान सकल भवदुखकौ हारी ॥ खोलें स्वर्गकपाट धर्महू कर्यौ न ऐसौ । कामिनिकुचके संग रंग भर रह्यौ न तैसौ । हरि हाय हाय कीन्हों कहा पाय पदारथ नरजनम । जननी-जोवन वन दहन अग्निरूप प्रगटे सु हम ॥ ११ ॥

भोगा न भुक्ता वयमेव भुक्तास्तपो न तप्तं वयमेव तप्ताः॥ कालो न यातो वयमेव यातास्तृष्णा न जीर्णा वयमेव जीर्णाः ॥ १२ ॥

सं० टी०—भोगाशक्तौ वृद्धावस्थायामनुतपति । भोगा इति । अस्माभिर्भोगा न भुक्ताः किन्तु वयमेव भोगैर्भुक्तास्तच्छक्तिशून्या जाताः । तथाऽस्माभिस्तपो न तप्तं किन्तु वयमेव तप्ताः सन्तापं प्राप्ताः । तथा कालो न यातो गतः किन्तु कालस्य विद्यमानत्वे वयमेव गताः । एवं तृष्णा न जीर्णा जर्जरीभूता अद्यापि तरुणैव वर्तते किन्तु वयमेव जीर्णाः दुर्बला जाता इत्यर्थः । भोगाद-यस्तु नैवाप्तास्तैः प्राप्तं निधनं खलु ॥ भजे न जीर्णा तृष्णा मेऽहन्तु जीर्णः कथं शिवम् ॥ उपजातिर्वृ-त्तमिदम् ॥ १२ ॥

भा० टी०—विषयोंको हमने नहीं भोगा किन्तु विषयोंहीने हमको भोग-लिया अर्थात् विषयोंके भोगनेमें हमही असमर्थ होगये; हमने तप नहीं किया किन्तु तपनेही हमको तपाडाला; काल व्यतीत नहीं हुआ किन्तु हमही व्यतीत होगये अर्थात् हमारीही अवस्था समाप्त होगई; और तृष्णा जीर्ण नहीं हुई किन्तु हमही जीर्ण होगये ॥ १२ ॥

छप्पय—भोग रहे भरपूर आयु यह भुगत गई सब । तप्यौ नाहिं तप मूढ अवस्था तपत भई अब । काल न कितहू जात वैस यह चलीजात नित । वृद्ध भई नाहि आस वृद्ध वय भई छांड हित । अजहूं अचेत चित चेतकर देहगेहसों नेह तज । दुखदोष हरन मंगलकरन श्रीहरिहरके चरण भज ॥ १२ ॥

क्षान्तं न क्षमया गृहोचितसुखं त्यक्तं न संतोषतः सोढा
दुःसहशीतवाततपनाः क्लेशान्न तप्तं तपः ॥ ध्यातं वित्तम-
हर्निशं नियमितप्राणैर्न शंभोः पदं तत्तत्कर्म कृतं यदेव
मुनिभिस्तैस्तैः फलैरंचितम् ॥ १३ ॥

सं० टी०—मुनिकर्मसदृशं तप आदि कर्मास्माभिरपि कृतं परंत्वाशया दग्धक-
तेन फलं किमपि न लब्धमित्याह । क्षान्तमिति । अस्माभिः खलानां दुर्वचनताडनादि क्षान्तं तं
परन्तु क्षमया न किन्त्वशक्ततया । तथा गृहोचितं यत्सुखं तत्तदिच्छासत्वेऽपि अदृष्टवशादलाभा-
त्त्यक्तं न सन्तोषतः यथालंबुध्या मुनिभिस्त्यज्यते तथा नेत्यर्थः । तथा शीतं वातश्च तपनश्च सूर्य-
र्जन्या ये क्लेशाः दुःखविशेषास्तेऽप्यस्माभिः सोढास्तथापि यथा मुनिभिः स्वरुचिवशात्तपस्या क्रिय-
तथा तपो न तप्तं किन्तु विपत्त्या दुःखसहनं कृतम् । तथाहर्निशं वित्तं धनमेव ध्यातं चिन्ति-
तमतो नियमितप्राणैः प्राणायामैः शम्भोः पदं स्वरूपं न ध्यातं । एवं मुनिभिस्तत्तत्फलैस्तेषां तै-
कर्मणां तैस्तैः फलैरञ्चितं पूजितमादरेण कृतमित्यर्थः । क्षमादिसाधनैर्युक्तैस्त्यक्ता न गृहसम्प-
सोढा मुनिसमाः क्लेशा आशया विफलीकृताः ॥ १ ॥ शार्दूलविक्रीडितं वृत्तमिदम् ॥ १ ॥

भा० टी०—क्षमा तौ हमने की परन्तु धर्मविचार कर नहींकी अर्थात् अश-
क्ततासेही की, घरके सुखोंका त्याग तौ किया परन्तु सन्तोषसे त्याग नहीं किया
शीतोष्णवायुका दुःसह दुःख तौ सहनकिया परन्तु तप नहीं किया, और दिनरात
हमने धनका ध्यान तौ किया परन्तु प्राणायामद्वारा शिवचरणारविन्दका ध्यान
नहींकिया, इसप्रकार जो जो कर्म मुनि करतेहैं वह सब हमने किये परन्तु उनके
मुनिलभ्यफलोंसें वंचित रहे अर्थात् उनकर्मोंके करनेसे जो फल मुनियोंको प्राप्तहुए
वह हमको नहीं हुए कारण इसका यही है कि चित्तसें दुष्ट आशा दूर नहीं हुई ॥१३॥

छप्पय—क्षमा क्षमा विन कीन विना संतोष तजे सुख। सहे
सीत तप घाम विना तप पाय महादुख। धर्यौ विषैकौ ध्यान चन्द्र
शेखर नाहि ध्यायौ। तज्यौ सकल संसार प्यार जब उन विस-
रायौ। मुनि करत काज सोई करें फल दीसत विपरीत अति। अब
होत कहा चिन्ता कियें अजहूं कर हरचरणरति ॥ १३ ॥

वलिभिर्मुखमाक्रान्तं पलितैरंकितं शिरः ॥
गात्राणि शिथिलायन्ते तृष्णैका तरुणायते ॥ १४ ॥

सं० टी०—वार्द्धक्येऽपि तृष्णा नित्यं भवतीति दर्शयति । वलीति । वलिभिः शिथिलचर्मरेखाभिर्मुखमाक्रान्तं व्याप्तं तथा पलितैः शुक्लकेशैः शिरोऽङ्कितं चिन्हितम् । गात्राणि तु हस्तपादादीनि शिथिलायन्ते शिथिलमिवाचरन्ति अशक्तानि भवन्तीत्यर्थः । परन्त्वेका तृष्णा विषयभोगाशा तरुणायते तरुणमिवाचरति । दुर्वर्णं वदनं वल्या केशैः शुक्लैः शिरोऽङ्कितम् । गात्रं तु शिथिलं सर्वमाशा तारुण्यमीयते । अनुष्टुब्वृत्तमिदम् ॥ १४ ॥

भा० टी०—वृद्धावस्थामें मुखपर झुर्री पडगई, सिरके बाल श्वेत होगये, और सब अंग शिथिल होगये, परन्तु केवल एक तृष्णाही बढतीजातीहै ॥ १४ ॥

दोहा—सेत चिकुर तन दशन विन वदन भयौ ज्यौं कूप ।
गात सबै शिथिलत भये तृष्णा तरुणस्वरूप ॥ १४ ॥

येनैवाम्बरखंडेन संवीतो निशि चन्द्रमाः ॥
तेनैव च दिवा भानुरहो दौर्गत्यमेतयोः ॥ १५ ॥

सं० टी०—सूर्यचन्द्रादीनां कारकाणामपि भृत्यानामिव नियतप्रवृत्तिरूपक्लेशदर्शनात्तत्पदादपि विरज्य संसारनिवृत्तये यतितव्यमिति सूचयति । येनेति । येनैवाम्बरस्याकाशस्य खण्डेनैकदेशेन पक्षे वस्त्रखंडेन निशि रात्रौ चन्द्रमाः संवीतो वेष्टितस्तेनैवं चाम्बरखण्डेन दिवा दिवसे भानुः सूर्योऽपि संवेष्ट्यते । अहो कष्टमेतयोरपि दौर्गत्यं यदि तदा क्षुद्राधिकारस्थितानां किं वक्तव्यमिति भावः । पराधीनतया दुःखं दृष्ट्वा सूर्यादिकेष्वपि ॥ ऐन्द्रान्तं तत्पदं त्यक्त्वा मुक्तये प्रयतेत्सुधीः । अनुष्टुब्वृत्तमिदम् ॥ १५ ॥

भा० टी०—जिस आकाशके एक खण्डको ओढकर रात्रिको चन्द्रमा व्यतीत करताहै दिनमें उसीको ओढकर सूर्य व्यतीत करताहै, अहो जब इन्हींकी ऐसी दुर्गति है तौ हम क्षुद्रजनोंका क्या कहना ॥ १५ ॥

दोहा—इक अम्बरके टूककों निशिमें ओढत चन्द ।
दिनमें ओढत ताहि रवि तूकत करत छछन्द ॥ १५ ॥

अवश्यं यातारश्चिरतरमुषित्वापि विषया वियोगे को भेदस्त्यजति न जनो यत्स्वयममून् ॥ व्रजन्तः स्वातन्त्र्यादतुलपरितापाय मनसः स्वयं त्यक्ता ह्येते शमसुखमनन्तं विदधति ॥ १६ ॥

सं० टी०—विषयवियोगस्यावश्यं भवितव्यत्वान्महत्फलत्वेन स्वेच्छयैव स कर्तव्य इति शिक्षयन्नाह । अवश्यमिति । एते विषयाश्चिरतरं बहुकालमुषित्वा निवासं कृत्वाऽवश्यं यातारः स्वेच्छाभावेऽपि गमिष्यन्ति । स्वेच्छया वा स्वेच्छाभावे वा वियोगे को भेदो न कश्चिद्भेदोऽस्ति तथापि स्वयं त्यागेन वियोगस्य सम्यक्फलत्वादयं जनो यद्यस्मान् स्वयममून् विषयान्न त्यजति तत्तस्य मौढ्यमेव । स्वेच्छाभावे वियोगस्य फलं दर्शयन्स्वेच्छया वियोगस्यापि फलमाह। व्रजन्त इति । एते विषयाः स्वातन्त्र्यात् व्रजन्तः पुरुषस्य त्यागेच्छाभावे गच्छन्तो मनसोऽतुल्यः परितापस्तस्मै भवन्ति । हीति प्रसिद्धं स्वयं त्यक्ताश्चैतेऽनन्तमपारं यच्छमसुखमनर्थनिवृत्त्युपलक्षितमोक्षानन्दं विदधति करिष्यन्तीत्यर्थः । भोगा नरं त्यजेयुश्चेद्दुस्तापोऽस्यातुलो भवेत् । स्वयं त्यक्तास्तु विषयाः कुर्युः सुखमनुत्तमम् । शिखरिणीवृत्तमिदम् ॥ १६ ॥

भा० टी०—बहुतकालपर्यंत भोगेहुए विषय अन्तमें अवश्य तुमको छोड़ देंगे तौ फिर उनके वियोग होनेमें संशयही क्या रहा; इससे मनुष्यको उचित है कि इनको पहिले स्वयंही त्यागदे, क्योंकि जब वे आपसे छोड़ेंगे तो मनको बडा सन्ताप देंगे और जो मनुष्य स्वयं उनको त्याग देगा तौ अपारसुखका भागी होगा ॥ १६ ॥

छप्पयः—जे वे वारे भोग कहा जो बहुविध विलसे । सदा सर्वदा संग रहत नहि काहू मिलसे । तू तौ तजिहै नाहि आपही ये उठजैहैं । तव व्है है सन्ताप अधिक चिताचिन्ता छैहै । जो तजैं आप यह विषयसुख तौ सुख होय अनन्त अति । दुस्तर अपार भवसिन्धुके पार होत वह विमलमति ॥ १६ ॥

विवेकव्याकोशे विदधति शमे शाम्यति तृषा परिष्वंगे तुंगे प्रसरतितरां सा परिणतिः ॥ जराजीर्णैश्वर्यग्रसनगहनाक्षेपकृपणस्तृषापात्रं यस्यां भवति मरुतामप्यधिपतिः ॥१७॥

सं० टी०—तृष्णाधिकारमाह । विवेकेति । तृषा तृष्णा शमे उपशमे सति शाम्यति उपशमं गच्छति । पुनःकस्मिन् सति । विवेकस्य व्याकोशे विकाशे सति । सा परिणतिः तृष्णापरिणामः तुङ्गे उन्नते परिष्वङ्गे आश्लेषे सति प्रसरति । युक्तोऽयमर्थः । अपरापि या विलासिनी भवति सा तुङ्गे परिष्वङ्गे सति नितरां प्रसरति न तु व्याप्तिं भजते लब्धावकाशत्वात् तथा सा तृष्णाऽपि। मरुतां देवानामप्यधिपतिरिन्द्रः यस्यां तृष्णायां तृपापात्रं भवति तुङ्गे परिष्वङ्गे छेत्तुमशक्तो भवतीत्यर्थः । मनुजानां तु का कथा । किंविशिष्टो मरुतामधिपतिः जराजीर्णैश्वर्यग्रसनगहनाक्षेपकृपणः जराजीर्णमैश्वर्यं तस्य ग्रसनेन यद्गहनं तस्याक्षेपे कृपणः विध्वंसेऽसमर्थः । अतःकारणात् तृष्णा गौरवर्णातिमात्रः । शिखरिणीवृत्तमिदम् ॥ १७ ॥

भा० टी०—जब तृष्णाकी शांति (निवृत्ति) होतीहै तब विवेक (ज्ञान) सूर्यके प्रकाश होनेपर जिस तृष्णाकी निवृत्तिके होनेसें पुरुष शांतिको प्राप्तहोताहै, और जैसे २ तृष्णाका परिपाक अंगमें अतिशय आलिंगितहोताहै वैसे वैसेही वो तृष्णा आलिंगनकियी नायिकातरह शरीरमें फैलतीहै, और जब तृष्णाका अनादर होताहै तब तिरस्कृतनायिकाकीतरह तृष्णाभी निवृत्त होतीहै; देखो जिस तृष्णाके विद्यमानहोनेसें जराजीर्ण ऐश्वर्यके ग्रसनेसे (नाशसें) जो दुःख है उसके दूरकरनेको असमर्थ जो मरुद्गणोंका पति इंद्र है वोभी उस तृष्णाका पात्र (आधार) होताहै इस्सें जानतेहैंकि तृष्णा बडी प्रबलहै ॥ १७ ॥

छप्पय—तृष्णा मूल नसाय होय जब ज्ञान उदय मन। भये विषयमें लीन बढे दिनपर दिन चौगुन । जैसे मुग्धा नार कठिन- कुच हाथ लगावत । बढत कामसद अधिक अधिक तनमे सरसावत । जराजीर्ण ऐश्वर्यत्यागमें लगे कृपण अति । होय तृषाकौ पात्र रंक पति बन्यौ देवपति ॥ १७ ॥

भिक्षाशनं तदपि नीरसमेकवारं शय्या च भूः परिजनो निजदेहमात्रम् ॥ वस्त्रं च जीर्णशतखण्डमलीनकन्था हा हा तथापि विषया न परित्यजंति ॥ १८ ॥

सं० टी०—कामादिविषयप्राबल्यं दर्शयति । भिक्षाशनमिति । अनेकगृहेभ्य[illegible]- या भिक्षयाऽशनं भोजनं तदपि नीरसं मधुरादिरसवर्जितं सूक्ष्ममेकवारं च । शय्या च भूः शयनो- पकरणहीना पृथ्वी । परिजनः परिवारो निजदेहमात्रं न तु पुत्रकलत्रादयः । वस्त्रं तु जीर्णानि शतानि खण्डानि प्रचुराणि यस्यां सा कन्था । हा हाऽहो कष्टं तथापि सर्वप्रकारैर्हीनमपि जन विषया न परित्यजन्ति वैराग्यं विना पुरुषं न जहतीत्यर्थः । अशनादिविहीनं च परिवारेण वर्जि- तम् ॥ देहमात्रावशिष्टं हा विषया न त्यजन्ति माम् ॥ १ ॥ वसन्ततिलकावृत्तम् ॥ १८ ॥

भा० टी०—जो भिक्षा मांगकर खातेहैं सोभी नीरस और एकवार ही मिलतीहै, भूमिही जिनकी शय्या है, स्वदेहमात्रही जिनका परिवार है, और जो सैकडों टुकडोंसे बनीहुई जीर्णकन्थाको धारणकरतेहैं, हाय! विषयवास- ना उनकाभी त्याग नहीकरतीहै ॥ १८ ॥

छप्पय--भीख अन्न एकवार लौन विन खाय रहतहूं। फटी गुदडी ओढ वृक्षकी छाँह गहतहूं। घास पात कछु डांसि भूमि पर नितप्रति सोवत। राख्यो तन परिवार भार यह ताको ढोवत। इह भांति रहत चाहत न कछु तऊ विषय वाधा करत। हरि हाय तेरी सरन आय पर्यो इनसों डरत॥ १८ ॥

रूपतिरस्कारमाह।

स्तनौ मांसग्रंथी कनककलशावित्युपमितौ मुखं श्लेष्मागारं तदपि च शशांकेन तुलितम्॥ स्रवन्मूत्रक्लिन्नं करिवरकरस्पर्धि जघनमहो निंद्यं रूपं कविजनविशेषैर्गुरु कृतम्॥ १९॥

सं० टी०—स्त्रीणां रूपं कविजनविशेषैः कविश्रेष्ठैर्गुरु महत् रमणीयमितिभावः। कृतं कल्पितं वस्तुतस्तदतिनिंद्यमित्याह। स्तनाविति। अहो इति दुःखे निंद्यरूपं कविजनविशेषैर्गुरु कृतं कल्पितम्। कथं निंद्यम्। स्तनौ कुचौ मांसस्य ग्रन्थी। परमित्युपमितौ उपमानितौ। इति किं। कनककलशौ सुवर्णकलशौ। चान्यत् मुखं श्लेष्मागारं तदपि च शशाङ्केन तुलितं चन्द्रमसा समानं कृतम्। जघनं स्रवन्मूत्रेण क्लिन्नमार्द्रं तदपि करिवरकरस्पर्धि गजेन्द्रशुण्डादण्डेन स्पर्धाकारकं तत्सादृश्येनवर्णितमिति भावः। कविभिरतिरमणीयत्वेन वर्णितमपि स्त्रीरूपमतिनिन्द्यम तस्तद्विषयोऽस्यन्ताभिलाषो न स्वीकरणीय इतिभावः। शिखरिणीवृत्तमिदम्॥ १९॥

भा० टी०—स्त्रियोंके स्तन हैं तौ मांसके लोथडे परन्तु उनको उपमा दी गईहै सुवर्णकलशकी अर्थात् उनको ऐसे सुन्दर बतातेहैं जैसे सुवर्णके कलश, मुख है तौ कफका स्थान परन्तु उसकी तुलना करतेहैं चन्द्रमासे अर्थात् मुखको चन्द्रमाकेसमान कान्तिमान् बतातेहैं, स्त्रीके जघन हैं तौ मूत्रसे भीगेहुए परन्तु उनको उपमा देतेहैं गजेन्द्रके शुण्डकी, इसप्रकार निन्दितरूपको कविजनोंने देखो कैसा वे परिमाण बढादियाहै॥ १९॥

छप्पय--कुच आमिषकी गांठ कनकके कलश कहत कवि। मुखहू कफको धाम कहत शशिके समान छवि। झरत मूत्र अरु धातु भरी दुर्गंध ठौर सब। ताकौं चम्पकवेल कहत रस रेल ठेल दव। यह नारी निहारी निन्दतन वहके विषयी वावरे। याकों बढाय वांको विरद बोले बहुत उतावरे॥ १९॥

अजानन्माहात्म्यं पततु शलभो तीव्रदहने स मीनोऽप्यज्ञानोद्बडिशयुतमश्नातु पिशितम्॥ विजानन्तोऽप्येते वयमिह विपज्जालजटिलान्न मुञ्चामः कामानहह गहनो मोहमहिमा ॥ २० ॥

सं० टी०—अधुना मोहमाहात्म्यं चिन्तयन्ननुतपति । अजानन्निति । शलभः कीटविशेषस्तीव्रदहनस्य प्रज्वलिताग्नेर्माहात्म्यं भस्मीकरणरूपमजानंस्तस्मिन्नेव पततु । स मीनो मत्स्योऽप्यज्ञानान्मारकत्वज्ञानाभावाद्बडिशेन लोहकण्टकेन युतं पिशितं मांसमश्नातु खादतु । वयं त्वेते संसारिणो विपदांजालैः समूहैर्जटिलानुद्ग्रथितान् कामान् विषयभोगान् इह संसारे जानन्तोऽपि न मुञ्चामोऽहहाहो कष्टं मोहस्य महिमा गहनोऽतर्क्य इत्यर्थः । नश्यतो विषयाक्रान्तानज्ञान् ज्ञानविशेषतः । पश्यन्तोऽपि न तत्त्यागं कुर्मो मोहप्रभावतः ॥ १ ॥ शिखरिणीवृत्तमिदम् ॥ २० ॥

भा० टी०—पतङ्ग अग्निकी शिखामें गिरताहै परन्तु वह यह नहीं जानता कि उसमें गिरनेसे भस्म होजाऊंगा, मछली वंशीमें लगेहुए मांसको खातीहै परन्तु वह यह नहीं जानती कि इसके खानेसे कांटा उसके कण्ठमे छिदेगा किन्तु हमको देखो कि हम जानतेहुएभी इन दुःखदायी विषयोंको नहीं त्यागतेहैं। अहो यह मोहमहिमा कैसी प्रबलहै! ॥ २० ॥

छप्पय—जानत नांहि पतंग अग्निको तेजमयी तन। गिरत रूपकों देखि जरत अपने अविवेकन। तैसेही यह मीन मांसको लोभ लुभायो। कण्टक जानत नांहि न्याय वह कण्ठ छिदायो। हम जान बूझ संकट सहत छांड सकत नहि जगतसुख। यह महा मोहमहिमा प्रवल देत दुहुनकों दोष दुख ॥ २० ॥

अथ दुर्जनमुद्दिश्याह ।

फलमलमशनाय स्वादु पानाय तोयं शयनमवनिपृष्ठे वाससी वल्कले च ॥ धनलवमधुपानभ्रान्तसर्वेन्द्रियाणामविनयमनुमन्तुं नोत्सहे दुर्जनानाम् ॥ २१ ॥

सं० टी०—येनकेनचिन्निर्वाहे धनिनां निरादरो न सोढव्य इत्याह । फलमिति।
अशनाय भोजनाय फलमलं पर्य्याप्तमस्ति। पानाय स्वादु तोयमलम्। अवनिपृष्ठे शयनमलम्।
वल्कले द्वे वाससी अलमित्येवंविधं सतां वृत्तमेवं सति धनस्य लवो लेशः स एव मधु मादकसुरा तेन
भ्रान्तान्यस्थिराणींद्रियाणि येषां तेषां दुर्जनानामाविनयं औद्धत्यलक्षणमपमानमनुमन्तुं स्वीकर्तुं
तु नोत्सहे पामराः सहन्ति चेत्तर्हि सहन्त्वहं तु न सहामीत्यर्थः। वसनं चाशनं धात्रा तरु
निर्मितं जलम् ॥ शयनं विपुलं भूमिर्दुर्वाक्यं किं वृथा सहे ॥ १ ॥ मालिनीवृत्तमिदम् ॥ २० ॥

भा० टी०—फल भोजन करनेकेलिये, मधुर जल पीनेको, पृथ्वी शयन करनेकेलिये, और वृक्षकी छाल पहिरनेकेलिये यथेष्ट है फिर धनरूपी मदिरासे उन्मत्त दुर्जनोंके सन्मुख निरादर सहनकरनेकेलिये क्यौं उत्सुक हों ॥ २१ ॥

दोहा—भूमिशयन वल्कल वसन फल भोजन जल पान।
धनमद माते नरनकौ कौन सहत अपमान ॥ २१ ॥

मानितामुद्दिश्याह।

विपुलहृदयैर्धन्यैः कैश्चिज्जगज्जनितं पुरा विधृतमपरैर्दत्तं चान्यैर्विजित्य तृणं यथा ॥ इह हि भुवनान्यन्ये धीराश्चतुर्दश भुञ्जते कतिपयपुरस्वाम्ये पुंसां क एष मदज्वरः ॥ २२ ॥

सं० टी०—स्वल्पसाम्ये नराणां मदाविष्करणमनुचितमित्याह। विपुलहृदयैरिति। कैश्चि-
त्पुरुषैर्विपुलहृदयैः सर्वज्ञबुद्धिभिः कैश्चिदेतज्जगत्पुरा जनितमुत्पादितमपरैर्विधृतं पालितमपरैश्च
[illegible] विजित्य तृणं यथा दीयते तथा दत्तं। इह हि अधुनाऽन्ये धीराः चतुर्दश
भुवनानि भुञ्जते पालयन्ति। एवं सति कतिपयानां द्वित्रिचतुर्णां पुराणां स्वाम्ये आधिपत्ये
पुंसां क्षुद्राणामेव मदज्वरः कः विचारे सति कोऽप्यभिमानो मदेन कर्तुं नोचित इत्यर्थः।
[illegible] । येजित्वा तृणवत्तमन्ये मोक्षाभिमानिनः ॥ १ ॥
हरिणीवृत्तमिदम् ॥ २२ ॥

भा० टी०—कोईतो ऐसे सर्वज्ञ महात्मा हुए जिनने यह जगत् उत्पन्न किया, कोई ऐसे हुए जिनने इस जगत्‌को धारण किया, कोई ऐसे हुए जिन्होंने इस जगत्‌को तिनुकाके समान तुच्छ समझकर देडाला, और कोई ऐसे धीर हैं जो चौदह भुवनोंका पालन करतेहैं, (इनको तो कुछभी अभिमान न हुआ) परन्तु केवल थोडेसे ग्रामोंका अधिकार पाकर मनुष्योंको कैसा अभिमान होताहै ॥ २२ ॥

छप्पय—भये जगतमें पन्थ धीर जिन जगत रच्यो है । काहू धारी शीश अजों यह नाहिं तज्यो है । काहू दीनो दान जीत काहू वश कीनों । भुवन चतुर्दश भोग कह्यो काहू जस लीनों । एकसों एक अधिकाहि भये तुम हो तिनमें तुच्छचित । दस बीस नगरके नृपति व्है यह मदको ज्वर तोहि कित ॥ २२ ॥

निस्पृहाणामधिकारमाह ।

त्वं राजा वयमप्युपासितगुरुप्रज्ञाभिमानोन्नताः ख्यातस्त्वं विभवैर्यशांसि कवयो दिक्षु प्रतन्वन्ति नः ॥ इत्थं मानद नातिदूरमुभयोरप्यावयोरन्तरं यद्यस्मासु पराङ्मुखोऽसि वयमप्येकान्ततो निस्पृहाः ॥ २३ ॥

सं० टी०——अथ यतिराज्ञोः संवादं कथयंस्तत्र तावद्गर्वितं कञ्चिद्राजानमाह । त्वमिति द्वाभ्यां । हे मानद मानं ददातीति मानदः तत्संबुद्धौ हे मानद त्वं राजा राज्याभिमानी वयमपि उपासितः सेवितो यो गुरुस्तस्माल्लब्धा या प्रज्ञा सदसद्विवेकशालिनी बुद्धिस्तदभिमानेनोन्नता उन्नतिं प्राप्ताः । त्वं विभवैर्गजतुरगादिसम्पद्भिः ख्यातः प्रसिद्धः नोऽस्माकन्तु यशांसि कवयः परगुणवेत्तारो दिक्षु प्रतन्वन्ति विस्तारयन्ति । इत्थममुना प्रकारेण मानं द्यति खण्डयति ददाति वा तत्संबोधनं हे मानद ! आवयोरुभयोरन्तरं भेदोऽतिदूरं नास्ति तथापि यद्यस्मासु पराङ्मुखः उदासीनोऽसि तर्हि वयमप्येकान्ततो नियमेन निस्पृहास्तवेच्छाशून्या इत्यर्थः । विरक्तो गुरुतो लब्ध्वा प्रज्ञां च भवतारिकाम् । राज्याभिमानिनं तुच्छं ज्ञात्वा भूमौ समाचरेत् ॥ १ ॥ शार्दूलविक्रीडितं वृत्तमिदम् ॥ २३ ॥

भा० टी०—हे राजन् ! तूं राज्याभिमानी है तौ हमभी गुरुकी सेवा करके उत्तम बुद्धि प्राप्तकर उच्चपदको प्राप्तहुएहैं, और तूं यदि अपने धनके कारण प्रसिद्ध है तौ देख हमारे यशोंका वर्णन कविगण देश देशान्तरोंमें कररहेहैं, इस-प्रकार हे मानद ! (मानके खंडन करनेवाले अथवा मान देनेवाले) तुझमें और हममें बहुत अन्तर नहींहै इसपरभी तूं यदि हमसे मुख फेरता है तौ हम तुझसेभी अधिक निस्पृह हैं ॥ २३ ॥

छप्पय—तुम पृथ्वीपति भूप भरे अभिमान विराजत । हम पाई गुरु गेह बुद्धि बल ताके गाजत । तुम धनसों विख्यात सुकवि गावत कछु पावत । हम जससों विख्यात रहत निशि दिन पढावत । तुम हमहिं बीच अन्तर बडो देखो सोच विचार निम । एते पर जो मुख फेर हो तौ हमकों एकान्त हित ॥२३॥

अभुक्तायां यस्यां क्षणमपि न यातं नृपशतैर्भुवस्तस्या लाभे क इव बहुमानः क्षितिभुजाम् ॥ तदंशस्याप्यंशे तदवयवलेशेऽपि पतयो विषादे कर्तव्ये विदधति जडाः प्रत्युत मुदम् ॥ २४ ॥

मृत्पिण्डो जलरेखया वलयितः सर्वोऽप्ययं नन्वणुरंगी-कृत्य स एव संयुगशतै राज्ञां गणैर्भुज्यते ॥ नो दद्युर्ददते ऽथवा किमपि ते क्षुद्रा दरिद्रा भृशं धिक् धिक् तान्पुरुषाधमान्धनकणं वाञ्छन्ति तेभ्योऽपि ये ॥ २५ ॥

सं० टी०–क्षुद्रा दरिद्रास्तादृग्राजानस्तेभ्यो धनकणं ये वाञ्छन्ति तान् धिक्कारयति ! मृत्पिण्ड इति । सर्वोऽप्ययं मृत्पिण्डो भूभागो जलरेखया समुद्ररूपया वलयितो वेष्टितोऽतो विचार्यमाणे पञ्चभूतेषु गगनादारभ्य वाय्वादीनां शतगुणन्यूनतया सर्वापेक्षया पृथिव्या न्यूनत्वान्ननु निश्चयेनाणुः सूक्ष्मस्तमेव मृत्पिण्डं राज्ञां गणाः संयुगानां संग्रामाणां शतैः स्वांशीकृत्य स्वस्वभागं कृत्वा भुञ्जते । भृशमतिशयेन क्षुद्रा दरिद्रास्ते राजानः पूर्वं नो दद्युरथवेदानीं किमपि ददते तेभ्योऽपि ये मन्दा धनलवं वाञ्छन्ति तान् पुरुषेष्वधमान् धिक् धिक् । लब्धी पृथ्वीं समुद्दिश्य युद्धं कृत्वा सहस्रशः । नृपैः सा भुज्यते तेभ्यो धनं वाञ्छन्ति तांस्तु धिक् ॥ १ ॥ शार्दूलविक्रीडितं वृत्तमिदम् ॥ २५ ॥

भा० टी०—यह सम्पूर्ण पृथ्वी मिट्टीका एक बहुत छोटा पिण्ड है जो चारोंओर समुद्ररूपी पानीकी रेखासे घिराहुआ है, फिर मृत्तिकाके इसी छोटेसे पिण्डको अनेक राजागण आपसमें युद्ध कर छोटे छोटे भागोंपर अपना स्वत्व जमाकर राज करतेहैं, ऐसे क्षुद्र और दरिद्री राजाओंको दानी कहकर परीक्षा करतेहैं कि देखें अबभी दान देतेहैं वा नहीं इसतरह इन नीचोंसे धनकी आशा करनेवाले अधम पुरुषोंको धिक्कार है ॥ २५ ॥

छप्पय——एक मृत्तिकाको पिण्ड रहत जलमांहि निरन्तर । सोऊ सबही नाहि तनकसौ ताहूमें डर । करत हजारन जंग भूप तब भोग करत चित । मिटत आपनी प्यास दानकौ होत कहा चित । ऐसे दरिद्र दुखसों भरे तिनहुं सो जो चहत धन । धिक्कार जन्म वा अधमकों सदा सर्वदा लीन मन ॥ २५ ॥

दुर्भगसेवकस्य वाक्यमाह ।

न विटा न नटा न गायका न परद्रोहनिबद्धबुद्धयः ॥ तव संसदि के वयं विभो स्तनभारोन्नमिता न योषितः ॥ २६ ॥

सं० टी०—न नटा इति । हे नृप । तव संसदि सभायां ये योग्यास्तेषु वयं केऽपि न भवामः । एतदेवाह न नटा नर्तका न विटाः प्रस्तावोक्तिभिः प्रसादकरा न । नापि गायकाः गानकुशलाः । नापि परद्रोहे निबद्धा बुद्धिर्येरेतादृशाः पिशुना इत्यर्थः । न च स्तनभारेणोन्नतीभूताः स्त्रियो वयं भवामः । एते मदुक्तास्तव प्रिया भवन्ति तेषां मध्ये वयं सन्यासिनः न केऽपीत्यर्थः । अतस्तव प्रीतिरस्मासु कथं भवेदिति भावः । नटादिसक्तं राजानं कुकथाश्रवणप्रियम् । स्वात्मानं तदनर्हं च पश्यन्यतिर्व्यतर्कयत् ॥ १ ॥ वैतालीयं वृत्तमिदम् ॥ २६ ॥

भा० टी०—हे राजन्! न तो हम नट हैं, न हम विट हैं, न गवैये हैं, न परद्रोह करनेकी हमारी इच्छा है, और न हम स्तनोंके भारसे नमीहुई स्त्रियें हैं, फिर हमको तेरी सभामें कौन पूछेगा ॥ २६ ॥

दोहा—नट भट विट गायन नहीं नहिं वादिनके माहिं ।
कौन भांति भूपति मिलन तरुणीभी हम नाहिं ॥२६॥

पुरा विद्वत्तासीदुपशमवतां क्लेशहतये गता कालेनासौ विषयसुखसिद्ध्यै विषयिणाम् ॥ इदानीं सम्प्रेक्ष्य क्षितितलभुजः शास्त्रविमुखानहो कष्टं साऽपि प्रतिदिनमधोऽधः प्रविशति ॥ २७ ॥

सं० टी०—अधुना कालप्रभावात् सद्विद्याया उत्तरोत्तरं ह्रासं पश्यन्ननुतपति । पुरेति । अग्रे विदुषो भावो विद्वत्ता पाण्डित्यमनमलिनधियां न कामक्रोधादिना मलिना धीर्येषां तेषां मुमुक्षूणां क्लेशहतये देहाद्यनात्मसु आत्मभ्रान्त्यादिनिवृत्तये आसीदभवत् । असौ विद्वत्ता कालेन पश्चात् किञ्चित्समयेन विषयिणां कामिनां यद्विषयसुखं तत्सिद्ध्यै गता प्राप्ता । इदानीं वर्तमानकाले क्षितितलभुजो राज्ञः शास्त्रविमुखान् शास्त्रश्रवणरुचिवर्जितान् सम्प्रेक्ष्य दृष्ट्वा साऽपि विषयसुखसाधिकाऽपि प्रतिदिनमुत्तरोत्तरमधोऽधो नीचैर्नीचैः प्रविशति विषयसुखमपि न साधयत्यहो दौर्भाग्यं लोकस्येत्यर्थः । विद्वत्ता पुरभूदासीत् सुधियां क्लेशहारिणी । ततोऽभूद्विषयप्राप्त्यै साधुना नास्ति साऽपि वै । शिखरिणी वृत्तमिदम् ॥ २७ ॥

भा० टी०—पहिले तो विद्या पण्डितोंके क्लेश दूर करनेके निमित्त थी, फिर कुछ समय व्यतीत होनेपर वह कामीजनोंकी विषयसुखसिद्धीका हेतु हुई, और अब इससमयमें तो वह विद्याभी राजाओंको शास्त्रविमुख देखकर प्रतिदिन अधोगतिको प्राप्त होतीजातीहै ॥ २७ ॥

दोहा--विद्या दुखनाशक हती फेर विषय सुख दीन।
जात रसातलको चली देख नृपन्ह मतहीन ॥२७॥

साहंकारं पुरुषमुद्दिश्याह।

स जातः कोऽप्यासीन्मदनरिपुणा मूर्ध्नि धवलं कपालं यस्योच्चैर्विनिहितमलंकारविधये ॥ नृभिः प्राणत्राणप्रवणमतिभिः कैश्चिदधुना नमद्भिः कः पुंसामयमतुलदर्पज्वरभरः ॥ २८ ॥

सं० टी०--अधुना प्राणपोषकमूढजनकृतप्रणामेनाहं कृतार्थ इत्यभिमानो नोचित इत्याह। स जात इति। एष स प्रसिद्धो जात उत्पन्नः सन् कोऽप्यचिन्त्यमहिमाऽऽसीत्। यस्य धवलमुज्ज्वलं कपालं शिरोऽस्थि मदनरिपुणा महादेवेनालङ्कारविधये शोभार्थं मूर्ध्नि स्वमस्तके उच्चैरादरपूर्वकं यथास्यात्तथा विशेषेण निहितं स्थापितम्। अधुना प्राणानां त्राणे रक्षणे प्रवणा प्रवाहवती मतिर्येषां तैः कैश्चिन्नृभिर्नमद्भिः सद्भिः पुंसां धनविद्याभासवतामयं प्रत्यक्षोऽतुलोऽनुपमो दर्पोऽभिमानः स एव ज्वरस्तस्य भरो भारः कः वयमीश्वरा यानेते नमन्तीत्यभिमानः कर्तुमयोग्य इत्यर्थः। शिखरिणीवृत्तमिदम् ॥ २८ ॥

भा० टी०--पहिले तौ ऐसे मनुष्य उत्पन्न हुए जिनके उज्वलकपालोंकी मालाको शिवजीने शोभाकेलिये अपने मस्तकपर धारणाकिया, अब देखो अपने प्राण पोषणकरनेवाले थोडेसे मनुष्योंद्वारा प्रतिष्ठा पाकर मनुष्य अभिमानरूपी ज्वरसे कैसे भारी होरहेहैं ॥ २८ ॥

दोहा--ऐसे हू जगमें भये मुण्डमाल शिव कीन।
धनलोभी नर नवतलखि तुमको मद ज्वर लीन ॥२८॥

अर्थानामीशिषे त्वं वयमपि च गिरामीश्महे यावदित्थं शूरस्त्वं वादिदर्पज्वरशमनविधावक्षयं पाटवं नः ॥ सेवन्ते त्वां धनाढ्या मतिमलहतये मामपि श्रोतुकामा मय्यप्यास्था न चेत्त्वयि मम सुतरामेष राजन् गतोऽस्मि ॥२९॥

सं० टी०—अर्थानामिति। हे राजन्! त्वमर्थानां भोगसाधनद्रव्याणामीशिषे ईशिता भवसि वयमपि च गिरां वाणीनां इश्महे ईशितारः स्मः। त्वं शूरोऽसि नोऽस्माकमपि वादिनां यो दर्पोऽहङ्कारः स एव ज्वरस्तस्य शमनविधौ शान्तिकरणे अक्षयं पाटवं कुशलत्वमास्ति। धनान्वा धनप्राप्तये गतविवेकास्त्वां सेवन्ते मतिमलहतये बुद्धिस्थाज्ञाननाशायोपनिषद्दिशास्त्रं श्रोतुकामा मामपि सेवन्ते। यावदस्मादित्थमुक्तेन प्रकारेण समत्वेऽपि मयि चेद्यदि हे राजंस्तवास्था विश्वासो न तर्हि त्वयि मम सुतरामास्था नेत्येपस्तव प्रत्यक्षोऽहं गतोऽस्मि गच्छामीत्यर्थः। नृपस्य यतिसाम्येऽपि भवत्येका विशेषता॥ राजानो नरकं यान्ति यतिर्विष्णोः परं पदम्॥ १॥ स्रग्धरावृत्तमिदम्॥२९॥

भा० टी०—हे राजन्! यदि तूं धनके कोपका स्वामी है तो हमभी वाणीके ईश्वर हैं, तूं युद्ध करनेमें शूर है तौ हम वादियोंके अहंकाररूपी ज्वरके नाशकरनेमें कुशल हैं, तुमको धनार्थिलोग सेवनकरतेहैं तौ हमकोभी बुद्धिकी मलिनता दूर करनेकेलिये शास्त्रश्रवणकरनेकी इच्छावाले मनुष्य सेवनकरतेहैं, इसप्रकार समता होनेपरभी हे राजन्! यदि तुह्मारी श्रद्धा हममें नहींहै तौ हमारीभी तुममें कुछ आस्था नहींहै, लो अब हम जातेहैं॥ २९॥

छप्पय—तुम अवनीके ईश ईश हमहू वाणीके। तुम हौ रणमें धीर वीर गाढे अति जीके। त्यौंही विद्यावाद करत हमहू नहिं हारे। प्रतिपक्षीके मान मार अपने विस्तारे। सब लोभी नर सेवत तुह्में हमको सिव श्रोता भले। तुमकों न हमारी चाह तौ हमहू ह्यांसे उठचले॥ २९॥

निर्ममतास्वरूपमाह।

अतिक्रान्तः[३] कालो[२] लटभललनाभोगसुभगो[१] भ्रमन्तः[८] श्रान्ताः[९] स्मः सुचिरमिह[७] संसारसरणौ[६]॥ इदानीं[१०] स्वःसिन्धोस्तटभुवि[११] समाक्रन्दनगिरः[१२] सुतारैः[१३] फूत्कारैः[१४] शिव[१५] शिव[१६] शिवेति[१७] प्रतनुमः[२०]॥ ३०॥

सं० टी०—अधुना संसारे उत्पन्नग्लानिर्गङ्गातीरे सप्रेम शिवाह्वानं प्रतिजानीते। अतिक्रान्त इति। हे सखे। लटभललनाभोगसुभगः लटभाः प्राप्तलावण्या या ललनाः स्त्रियस्तासां भोगेन सुभगो मनोज्ञो यः कालः सोऽतिक्रान्तो गतः वयं तु इह संसारसरणौ जननमरणलक्षणे संसारमार्गे सुचिरं बहुकालं भ्रमन्तः सन्तः श्रान्ता ग्लानिं प्राप्तास्म तस्मादिदानीं स्वःसिन्धोः स्वर्गङ्गा

गङ्गातटभुवि तीरभूमौ मुरारैः फूत्कारैः समाक्रन्दनगिरः उच्चस्वरसहितैरूर्ध्वश्वासैः सह सप्रेमा गद्गदा गीर्येषां तादृशाः सन्तो वयं हे शिव हे शिव हे शिवेत्यमुना प्रकारेण शिवेत्युत्तमं नाम प्रतनुमो विस्तारयामो न पुनः संसारे भोगदृष्टिं कुर्म इत्यर्थः। मानुषं जन्म सम्प्राप्य भोगांस्त्यक्त्वाऽथ वृत्तः । गङ्गातीरे शिवाह्वानं कुर्यात् सप्रेमविह्वलः ॥ १ ॥ शिखरिणीवृत्तमिदम् ॥ ३० ॥

भा० टी०--हे सखे ! सुन्दर २ स्त्रियोंके संग भोग करनेमें सुभग यौवन-काल तो व्यतीत होगया और अब हम इस संसारसरणिमें भ्रमणकरतेहुए वहुत थकगयेहैं, अब तो हम श्रीगङ्गाजीके तटपर उच्चस्वरसे प्रेमपूर्वक शिव शिव ऐसा कहतेहुए जप करेंगे और पुनः संसारमें भोगदृष्टि न करेंगे ॥ ३० ॥

दोहा—रमणकाल यौवन गयौ थक्यौ भ्रमत संसार ।
देहुं गंगतट शेषवय शिव शिव जपत विसार ॥ ३० ॥

मानै म्लायिनि खण्डिते च वसुनि व्यर्थे प्रयातेऽर्थिनि क्षीणे वन्धुजने गते परिजने नष्टे शनैर्यौवने ॥ युक्तं केवलमेतदेव सुधियां यज्जन्हुकन्यापयःपूतग्रावगिरीन्द्रकन्दरदरीकुञ्जे निवासः क्वचित् ॥ ३१ ॥

सं० टी०--सर्वहानौ गङ्गातीरगिरिगुहानिवास एवोचित इत्याह । मानै इति । मानै सत्कारे म्लायिनि क्षीणे सति, वसुनि धने च खण्डिते नष्टे सति, अर्थिनि याचके व्यर्थे स्वगृहान्निराशे प्रयाते गते सति, वन्धुजने पुत्रभार्य्यादौ क्षीणे नाशं प्राप्ते सति, परिजने भृत्यवर्गे वेतनाभावेन गते निर्गते सति, यौवने शनैर्नष्टे सति, तदा सुधियां प्राज्ञानां केवलमेतदेव युक्तम् । किमेतज्जन्हुकन्या श्रीगङ्गा तस्याः पयसा पूता ग्रावाणः शिला यस्य तादृशो यो गिरीन्द्रो हिमालयस्तस्य कन्दरे महागर्ते या दरी स्वल्पो गर्तस्तस्याः कुञ्जे लतापिहितस्थाने क्वचिन्निवासः कर्तव्य इति । सन्माने गलिते नष्टे यौवने विलयं गते । परिवारे शिवः सेव्यो गङ्गातीरनिवासिना ॥ १ ॥ शार्दूलविक्रीडितं वृत्तमिदम् ॥ ३१ ॥

भा० टी०-इस समय जव मान नष्ट होगयाहै, धनका नाश होगयाहै, याचकगण विमुख होनेलगेहैं, भ्राता स्त्री पुत्रादि नष्ट होगयेहैं, और शनैः शनैः युवावस्थाभी नष्ट होतीजातीहै, तौ अब बुद्धिमान् मनुष्योंको उचित है की श्रीगङ्गाजीके जलसे पवित्रकीहुई हिमालयपर्वतकी किसी गुहामें निवास करें ॥ ३१ ॥

दोहा—गयौ मान जोवन रु धन भिक्षुक जात निरास।
अब तौ मोको उचित यह श्रीगङ्गातटवास ॥ ३१ ॥

परेषां चेतांसि प्रतिदिवसमाराध्य बहुधा प्रसादं किं नेतुं विशसि हृदय क्लेशकलिलम् ॥ प्रसन्ने त्वय्यन्तः स्वयमुदितचिन्तामणिगुणे विमुक्तः संकल्पः किमभिलषितं पुष्यति न ते ॥ ३२ ॥

सं० टी०—चित्तं प्रायो बोधयन् हे चेतः! परारायनमुत्सृज्य स्वशुद्धौ यत्नो विधेय इत्याह। परेषामिति। हे हृदय! परेषामन्येषां धनमन्दाधानां चेतांसि प्रतिदिवसं बहुधा नानाप्रकारेणाराध्य प्रसादं परेषां प्रसन्नतां नेतुं प्रापयितुं किं कस्मात् क्लेशलक्षणं कललं पंकं विशसि तत्र मग्नो भवसि। ननु परेषां प्रसादे ते ममाभिलषितं पूरयिष्यन्तीति तत्राह। प्रसन्न इति। अन्तः स्वात्मन्येव स्वयं स्वेनैव त्वयि प्रसन्ने सति ते तव विविक्तः शुद्धः सङ्कल्पस्तेऽभिलषितमीप्सितं किं न पुष्यति पुष्टं न करिष्यति। कथंभूते त्वयि उदित उत्पन्नश्चिन्तामणेर्गुणः सर्वेप्सितपूरकत्वलक्षणो यस्मिंस्तस्मिन् स्वयं त्वयि प्रसन्ने पदार्थचतुष्टयं मिलिष्यतीति भावः। यथान्येषां प्रसादाय यतते मानवोऽनिशम्। तथा स्वान्तःप्रसादाय यतते किं न मूढधीः ॥ १ ॥ शिखरिणीवृत्तमिदम् ॥ ३२ ॥

भा० टी०—हे मन! नानाप्रकारसे प्रतिदिन पराये चित्तको प्रसन्न करनेकेलिये तूं क्यों क्लेशरूपी कीचडमें फंसताहै, अपनेहीमें प्रसन्न होकर जब तूं चिन्तामणिकेसे गुण प्रगटकरेगा अर्थात् शान्ति सन्तोष आदि गुण ग्रहण करेगा तो क्या तेरे शुद्ध वाञ्छित संकल्प पूरे न होंगे ॥ ३२ ॥

दोहा—तूही रीझत क्यों नहीं कहा रिझावत और।
तेरेही आनन्दसे चिन्तामणि सबठौर ॥ ३२ ॥

अथ भोगपद्धतिः।

भोगे रोगभयं कुले च्युतिभयं वित्ते नृपालाद्भयं माने दैन्यभयं बले रिपुभयं रूपे जराया भयम् ॥ शास्त्रे वादभयं गुणे खलभयं काये कृतान्ताद्भयं सर्वं वस्तु भयान्वितं भुवि नृणां वैराग्यमेवाभयम् ॥ ३३ ॥

सं० टी०— [illegible]

वैराग्यमेवाभयं वैराग्यवतो भयं कुतोऽपि नास्तीत्यर्थः । देहाभिमानयुक्तस्य भयमस्ति तृणादपि । सर्वस्मात् किं विरक्तस्य ब्रह्मणोऽपि भयं भवेत् ॥ १ ॥ शार्दूलविक्रीडितं वृत्तमिदम् ॥ ३३ ॥

भा० टी०—भोगीको रोगका भय है, कुलीनको क्षतिका भय है, धनीको राजाका भय है, मानीको दीनताका भय है, बलवानको शत्रुका भय है, रूपको जरावस्थाका भय है, शास्त्रमें वादविवादका भय है, गुणवानको दुर्जनका भय है, शरीरको मृत्युका भय है, इसप्रकार सम्पूर्ण वस्तु भयान्वित है, अभय तो केवल एक वैराग्यही है ॥ ३३ ॥

छप्पय—बहुत भोगकौ संग तहां इन रोगनको डर । धनहूंकौ डर भूप अग्नि अरु त्यौंही तस्कर । सेवामें भय स्वामि समरमें शत्रुनको भय । कुलहूमें भय नारि देहकौ काल करत क्षय । अभिमान डरत अपमानसौं गुन डरपत सुन खलशबद । नग गिरत परत भयसौं भरे अभय एक वैराग्यपद ॥ ३३ ॥

अमीषां प्राणानां तुलितबिसिनीपत्रपयसां कृते किंना-
स्माभिर्विगलितविवेकैर्व्यवसितम् । यदाढ्यानामग्रे द्रविणम-
दनिःशंकमनसां कृतं वीतव्रीडैर्निजगुणकथापातकमपि ॥ ३४ ॥

सं० टी०—क्षणभङ्गुरप्राणपोषणार्थं मूढानामपि [illegible]
पत्राह । अमीषामिति । तुलितमुपमितं बिसिनी कमलिनी [illegible]
ममीषां प्राणानां कृते पालनार्थं विगलितो विनष्टो विवेको येषां तैरस्माभिः [illegible]
मयोग्यं तदपि कृतमित्यर्थः । तदेव दर्शयति यदिति [illegible]
पक्तव्यं न वेति शंकाशून्यं मनो येषां तेषामाढ्यानां [illegible]
र्निजाः स्वकीया ये गुणास्तेषां कथनरूपं [illegible]
पातकस्य वा वार्तेत्यर्थः । क्षणभङ्गुरप्राणानां [illegible]
किमित्याशयः ॥ १ ॥ शिखरिणीवृत्तमिदम् ॥ ३४ ॥

भा० टी०—कमलपत्रपर स्थित जलके [illegible]
विवेक त्यागकर हमने क्या क्या नहीं किया [illegible]
सबभी हमने किये । [illegible]
हमने स्वगुणकथनरूप पातक [illegible]

कुण्डलिया---जैसे पंकज पत्रपर जल चञ्चल ढुरि जात। त्यौंही चंचलप्राण हू तजि जैहैं निजगात। तजि जैहैं निजगात बात यह नीकें जानत। तौऊ छांड विवेक नृपनकी सेवा जानत। निजगुण करत बखान निलजता उघरी ऐसें। भूलगयौ सतज्ञान मूढ अज्ञानी जैसें ॥ ३४ ॥

भ्रातः कष्टमहो महान्स नृपतिः सामन्तचक्रं च तत्पार्श्वे तस्य च सापि राजपरिषत्ताश्चन्द्रबिम्बाननाः ॥ उद्रिक्तः स च राजपुत्रनिवहस्ते वन्दिनस्ताः कथाः सर्वं यस्य वशादगात्स्मृतिपदं कालाय तस्मै नमः ॥ ३५ ॥

सं० टी०—सर्वमिदं कालाधीनं बुध्वा नाशशीलनृपाणां सेवनं त्यक्त्वा केवलं भगवत्सेवनमेव कार्यमिति सूचयन्नाह। भ्रातरिति। तस्मै कालाय नमः। अहो इत्याश्चर्ये। भो भ्रातः। कष्टं विलोक्यताम्। किं कष्टं स एव महान्नृपतिः चान्यत्सामन्तचक्रं माण्डलिकराजमण्डलं चान्यत्तस्य पार्श्वे सापि राजपरिषत्सापि राजसभा चान्यत्ताश्चन्द्रबिम्बानना नार्यः। चान्यत् स राजपुत्रनिवहः नृपकुमारसमूहः। कथंभूतो राजपुत्रनिवहः उद्रिक्तः सदर्पः। चान्यत्ते वन्दिनः भद्राश्चान्यास्ताः कथाः यस्य वशात् तत्सर्वं पूर्वोक्तं स्मृतिपदमगात् कथाशेषं जगाम। कालाय तस्मै नमः। यतः सर्वं क्षीयते परन्तु कालो न क्षीयते। शार्दूलविक्रीडितं वृत्तमिदम् ॥ ३५ ॥

भा० टी०--पहिले यहां कैसा उत्तम राजा था, उसके समीप सेनाओंका समूह कैसा था, उसकी राजसभा कैसी थी, कैसी कैसी चन्द्रमुखी स्त्री थी, राजाके पुत्रोंका समूह कैसा था, कैसे वन्दीगण थे और वे कैसी अच्छी कथा कहतेथे, वे सब अब जिस कालके वशीभूत होगये उस कालको हम नमस्कार करतेहैं ॥ ३५ ॥

दोहा--नृपति, सैन सम्पति सचिव सुत कलत्र परिवार।
करत सबनको स्वप्नसम नमो काल करतार ॥ ३५ ॥

पुनः कालमुद्दिश्याह।

वयं येभ्यो जाताश्चिरपरिगता एव खलु ते समं यैः संवृद्धाः स्मृतिविषयतां तेऽपि गमिताः ॥ इदानीमेते

समैः[22] प्रतिदिवस[16]समासन्नपतना[18]द्गता[21]स्तुल्यावस्थां[20] सिकतिलनदीतीरतरुभिः[19] ॥ ३६ ॥

सं० टी०—अधुना स्वजनकान् स्वसखींश्च स्वात्मना सह शोचति। वयमिति। येभ्यः पित्रादिभ्यो वयं जाता उत्पन्नास्ते चिरं बहुकालेन परिगता नष्टा एव खलु। यैः समं सार्द्धं संवृद्धः वृद्धिं प्राप्तास्तेऽपि स्मृतिविषयतां गमिताः प्राप्ताः। इदानीमवशिष्टा एते ये वयं तेऽपि प्रतिदिवसं दिनं दिनं प्रति आसन्नं प्राप्तं पतनमायुःक्षयो येषां तथा सन्तः सिकता विद्यते यस्यां सा सिकतिला नदी तस्यास्तीरतरुभिस्तटवृक्षैस्तुल्यावस्थां पतनोन्मुखत्वेन साम्यतां गताः स्मः। यद्वा सिकताप्रधानो देशः सिकतिलस्तस्य नदीतीरतरुभिरिति सम्बन्धः। येभ्यो जनिरभूद्य गतास्ते पितरो मम। आसन्नं मरणं मेऽपि शम्भो त्वं शरणं भव ॥ १ ॥ शिखरिणीवृत्तमिदम् ॥ ३६ ॥

भा० टी०—जिनसे (मातापितासे) हम उत्पन्नहुएथे उनकोतौ गये वहुतकाल व्यतीत होगया, और जिनके संग हम बडे हुए वेभी स्मरणपदमें गये अर्थात् वेभी मृत्युको प्राप्तहोगये, और अब हम जो शेष हैं सो हमभी प्रतिदिन मृत्युके निकट पहुंचतेजातेहैं, और हमारी दशा नदीकिनारे वालूमें उत्पन्नभये वृक्षकेसमान होरहीहै ॥ ३६ ॥

छप्पय—जो जन्मे हम संग सु तौ सब स्वर्ग सिधारे। जो खेले हम संग काल तिनहूँ कँह मारे। हमहू जर जर देह निकट ही दीसत मरिवो। जैसे सरितातीरवृक्षको तुच्छ उखरिवो। हमहू नहिं छाँडत मोह मन उमग २ उरझो रहत। ऐसे अचेतके संगसों न्याय जगतकौ दुख सहत ॥ ३६ ॥

यत्रानेके[1] क्वचिदपि[2] गृहे[3] तत्र[4] तिष्ठत्यथैको[6] यत्राप्येकस्तदनु[10] बहवस्तत्र[13] नैको[15] ऽपि[20] चान्ते[18] ॥ इत्थं[21] चेमौ[22] रजनिदिवसौ[25] दोलयन्[26] द्वावि[30]वाक्षौ[27] कालः[28] काल्या[31] सह[32] बहुकलः[33] क्रीडति[34] प्राणसारैः[33] ॥ ३७ ॥

सं० टी०—अधुना कालस्याक्षक्रीडां दर्शयति। यत्रेति। यस्मिन् क्वचिदपि गृहे अनेकेः पुत्रकलत्रादयो बहव आसन्नथ तदनु एकस्तिष्ठति। यत्राप्येकस्तदनु बहवः पुत्रपौत्रादयो भवन्ति यत्र बहवस्तत्र चान्ते एकोऽपि नैव तिष्ठतीत्यमुना प्रकारेणेमौ रजनिदिवसावक्षाविव हास्तिदन्तानिर्मित-

क्रीडनकविशेषाविव दोलयन् भ्रामयन् कालो वल्ही: कला ज्वरोदरपीडादिव्याजलक्षणा विद्या यस्य स काल्या स्वमारिकशक्त्या सह प्राणिन एव साराःसारिकास्ताभिः क्रीडति सततं खेलतीत्यर्थः। यद्गेहे बहवस्तत्र चैकस्तिष्ठति देहभृत्। यत्रैको बहवस्तत्र कालस्य गतिरीदृशी ॥ १ ॥ मन्दाक्रान्तावृत्तमिदम् ॥ ३७ ॥

भा० टी०——जिस किसी घरमें अनेक पुत्रपौत्रादिक थे वहां एकही दृष्टि पडताहै और जहां एक था वहां अनेक दिखाईपडते हैं और फिर वहां अन्तमें एकभी न रहा, इसप्रकार इस संसाररूपी चौपडमें रात्रिदिनरूपी पासोंको लुढका २ रकर और प्राणियोंकी गोट बनाकर कालपुरुष अपनी कालित्वशक्तिके साथ खेल रहाहै ॥ ३७ ॥

छप्पय——बहुत रहत जिहि धाम तहां एकहिकों राखत। एक रहत जिहि ठौर तहां बहुतहि अभिलाषत। फेर एकहू नांहि करि तहां राज दुराजी। कालीके संग काल रची चौपडकी बाजी। दिनरात उभय पासालियें इह विधिसों क्रीडा करत। सब प्राणी सोवत सार ज्यौं मिलत चलत बिछुरत मरत ॥ ३७ ॥

तपस्यन्तः सन्तः किमधिनिवसामः सुरनदीं गुणोदारान् दारानुत परिचरामः सविनयम् ॥ पिबामः शास्त्रौघानुत विविधकाव्यामृतरसान्न विद्मः किं कुर्मः कतिपयनिमेषायुषि जने ॥ ३८ ॥

सं० टी०——इदानीमायुषोऽल्पत्वात् कर्तव्यानां बाहुल्यात् संशयापन्नः स्वदृष्टान्तेनाह। तपस्यन्त इति। कतिपयाः स्वल्पा निमेषा आयुर्यस्य तादृशे जने जायते इति जनो देहस्तस्मिन् सति वयं किं कुर्म इति न विद्मो न जानीमः। किं तपस्यन्तः तपः कुर्वन्तः सन्तो गङ्गामधिनिवस्य निवासं कुर्मः। उताथवा गुणैः [illegible] श्रेष्ठान् दारान् युवतीः सविनयं [illegible] परिचरामः सेवामहे। उताथवा विविधं नानाविधं काव्यं कवीनां क्रान्तदर्शिनां [illegible] न [illegible] शास्त्रौघान् शास्त्रसमूहान् [illegible] इत्यर्थः ॥ लोके कर्तव्यबहुत्वमल्पमायुः [illegible] ॥ १ ॥ शिखरिणीवृत्तमिदम् ॥ ३८ ॥

भा० टी०——हम नहीं जानते कि हम निमेषमात्र स्थिर रहनेवाले देहसे क्या करें। क्या हम सब छोडकर गंगातटपर वास करें। अथवा क्या हम

गुणवतीस्त्रियोंकी विनयपूर्वक सेवा करें ? अथवा क्या हम व्यासवसिष्ठ आदि कवियोंके अमृतरसरूपी विविध काव्यों और शास्त्रोंका अध्ययन करें ॥ ३८ ॥

दोहा—तप तीरथ तरुणीरमण विद्या वहुत प्रसंग ।
कहा कहा मन रुचि करै पायौ तन क्षणभंग ॥ ३८ ॥

गंगातीरे हिमगिरिशिलाबद्धपद्मासनस्य ब्रह्मध्याना-भ्यसनविधिना योगनिद्रां गतस्य ॥ किं तैर्भाव्यं मम सुदिवसैर्यत्र ते निर्विशंकाः कण्डूयन्ते जरठहरिणाः शृंगमङ्गे मदीये ॥ ३९ ॥

सं० टी०—इदानीं शिष्टानां कर्तव्यं सूचयन् निर्विकल्पसमाधियुक्तान् दिवसान् प्रार्थयति । गङ्गातीर इति । मम तैः सुदिवसैः किमिति सम्भावनायां भाव्यं भवितव्यं कदा ते भविष्यन्तीति भावः ॥ यत्र येषु दिवसेषु जरठहरिणा वृद्धमृगा निर्विशंका गतभयाः स्वशृंगं मदीयेऽङ्गे शरीरे कण्डूयन्ते संघर्षयन्ति शृंगघर्षणलीलां करिष्यन्तीत्यर्थः । कथंभूतस्य मम गङ्गातीरे या हिमगिरेर्हिमालयस्य शिला तस्यां बद्धं पद्मासनं येन तस्य । पुनः कथंभूतस्य ब्रह्मणो ध्यानं तत्र प्रत्ययैकतानतारूपं तस्याभ्यसनमभ्यासस्तस्य यो विधिर्गुरूपदिष्टप्रकारस्तेन योगश्चित्तवृत्तिनिरोधस्तद्रूपा या निद्रा तां गतस्य प्राप्तस्येत्यर्थः ॥ गङ्गातीरे कुटीं कृत्वा तत्रापि गिरिसन्निधौ । वसन् शिवं हृदि ध्यायेन्मृगशृंगैश्च घर्षितः ॥ मन्दाक्रान्तावृत्तमिदम् ॥ ३९ ॥

भा० टी०—मेरे वह अच्छे दिन कब आवेंगे जबकि मैं गङ्गातटपर हिमालयपर्वतकी शिलापर पद्मासन लगाकर वैठूंगा, ब्रह्मध्यानमें लीन हो विधिपूर्वक नेत्र मूंद योगनिद्राको प्राप्तहोऊंगा और निःशंक होकर वृद्धहरिण मेरे देहसे अपने सींगोको रगडकर उनकी खुजली मिटावेंगे ॥ ३९ ॥

दोहा—ब्रह्मध्यान धर गङ्गातट वैठुंगो तज संग ।
कबहु वह दिन होयगो हिरन खुजावत अंग ॥ ३९ ॥

स्फुरत्स्फारज्योत्स्नाधवलिततले क्वापि पुलिने सुखासीनाः शान्तध्वानेषु रजनीषु द्युसरितः ॥ भवाभोगोद्विग्नाः शिव शिव शिवेत्यार्तवचसा कदा स्यामो हर्षोद्गतबहुलबाष्पप्लुतदृशः ॥ ४० ॥

स० टी०--शोभनं स्वमनोरथं दर्शयति। स्फुरदिति। स्फुरन्ती प्रकाशमाना या स्फारा बहुला ज्योत्स्ना चन्द्रिका तया धवलितं तलं यस्य तस्मिन् द्युसरितः दिवः सरित् गङ्गा तस्याः क्वापि पुलिने कस्मिंश्चिदपि तटे शान्तो निवृत्तो ध्वनिः शब्दो यासु तासु रजनीषु सुखासीना वयमीदृशाः कदा स्यामो भवेम इत्यन्वयः। कीदृशाः भवस्य संसारस्याभोगो विषयसुखं तस्मादुद्विग्ना विरक्ताः सन्तः हे शिव हे शिव हे शिवेत्यार्तं पीडितं वचो येषामेतादृशास्तया हर्षेणोद्गतं निःसृतं यद्बहुलं वाष्पमश्रुजलं तेन प्लुते व्याप्ते दृशौ येषां तादृशा इति। संस्फुरत्कौमुदीयुक्ते गङ्गातीरे वसन् शिवम्। संस्मरन्सर्वशान्तात्मा कालं निन्यात्पुमान्सुखी॥ १॥ शिखरिणीवृत्तमिदम्॥ ४०॥

भा० टी०-प्रकाशित चांदनीसे जिसकी तलहटी श्वेत होरहीहै ऐसी गङ्गाजीके किसी पुलिनमें हम सुखपूर्वक कब बैठेंगे. रात्रिमें जिससमय सम्पूर्ण ध्वनि शान्त होजातीहै उससमय संसारदुःखसे कातर हो शिव शिव ऐसे आर्त स्वरसे कहतेहुए हमारे नेत्र आनन्दाश्रुओंसे कब पूर्ण होंगे॥ ४०॥

दोहा--जगके सुखसों दुखित ह्वै भरिहैं ढरिहैं नैन।
कब रटिहौं तट गंगके शिव शिव आरत बैन॥४०॥

महादेवो देवः सरिदपि च सैषा सुरसरिद्गुहा एवागारं वसनमपि ता एव हरितः॥ सुहृद्वा कालोऽयं व्रतमिदमदैन्यव्रतमहो कियद्वा वक्ष्यामो वटविटप एवास्तु दयिता॥४१॥

सं० टी०--अधुना विरक्तानां सम्पत्तिं वर्णयंस्तां प्रार्थयति। महादेव इति। पूज्यो देवो महादेवः शिव एव। स्नानाद्यर्थं सरिन्नद्यपेक्षिता साऽपि चामरसरिन्न्छ्रीगङ्गैव। आगारं गृहं च गुहा कन्दरैव। वसनं वस्त्रमपि ताः प्रसिद्धा हरितो दिश एव। अयं काल एव शुभकरत्वात्सुहृन्मित्रमस्ति। व्रतं त्विदं यददैन्यं तदेवाहो आश्चर्यरूपं व्रतमन्यत्तत्सदृशं व्रतं नास्तीत्यर्थः। वटविटपः वटवृक्ष एव दयिता कलत्रमस्तु। निवासात्सदा सुखकरत्वात् अतोऽन्यैश्वर्यं विरक्तानां कियत्परिमाणं वा वयं वक्ष्यामो भूयः एतावतैव विरक्ताः सन्तुष्टा इत्यर्थः। महादेवो हि देवोऽस्ति सरिदास्ति च जान्हवी। वासो गिरिगुहावासो धन्यस्तत्र शिवं स्मरेत्॥ १॥ शिखरिणीवृत्तमिदम्॥ ४१॥

भा० टी०--महादेवही एक पूज्य देव है, गंगाही एक नदी है, गुहाही घर है, दिशाही वस्त्र है, यह कालही मित्र है, किसीके सन्मुख दीन न होना यही व्रत है, और कहांतक कहें एक वटकावृक्षही कुटुम्ब है, अर्थात् विरक्त इन्हीं सबसे सन्तुष्ट है॥ ४१॥

दोहा—देव ईश सुरसरि सरित दिशा वसन गिरि गेह।
सुहृत्काल वट कामिनी व्रत अदैन्य सुख येह ॥४१॥

आशा नाम नदी मनोरथजला तृष्णातरङ्गाकुला रागग्राहवती वितर्कविहगा धैर्यद्रुमध्वंसिनी ॥ मोहावर्तसुदुस्तराऽतिगहना प्रोत्तुङ्गचिन्तातटी तस्याः पारगता विशुद्धमनसो नन्दन्ति योगीश्वराः ॥ ४२ ॥

सं० टी०—इदानीमाशां नदीरूपेण वर्णयंस्तस्याः पारगतानां परमानन्दप्राप्तिमाह। आशानामेति। आशानाम्नी नदी वर्तते सा मनोरथो मनोराज्यं जलं यस्यां सा। तृष्णा धनगर्द्धैव तरङ्गास्तैराकुला व्याप्ता। रागो विषयस्नेह एव ग्राहो मकरो विद्यते यस्यां सा रागग्राहवती। वितर्काः कुतर्का एव विहगाश्चक्रवाकादयः पक्षिणो यस्यां सा। तथा धैर्यमेव द्रुमो वृक्षस्तस्य ध्वंसिनी नाशकर्त्री। मोह एवावर्त्तो भ्रमस्तेन सुदुस्तरा अतिगहना गम्भीरा। प्रकर्षेणोत्तुङ्गमुन्नतं चिन्तालक्षणं तटं यस्याः सा। तस्या नद्याः पारं गता विशुद्धा मतिर्येषां ते निर्मलज्ञानवन्तो योगीश्वरा नन्दन्ति परमानन्दमनुभवन्तीत्यर्थः॥ आशापाशवतो लोको विशोको न भवेत् क्वचित्। यस्तु तत्पाशमुन्मुच्य वैरयात्मान स शोकजित् ॥ १ ॥ शार्दूलविक्रीडितं वृत्तमिमम् ॥ ४२ ॥

भा० टी०—आशानामकी एक नदी है, जिसमें मनोरथरूपी जल भराहै, जिसमें तृष्णारूपी तरङ्ग उठतेहैं, विषयरूपी ग्राह जिसमें रहतेहैं, नानाप्रकारके कुतर्करूपी पक्षी उसमें विचरतेहैं, तथा यह नदी धैर्यरूपीवृक्षका नाश करनेवाली है, और इसमें मोहरूपी भ्रमर हैं, इन भ्रमरोंसे यह नदी अत्यन्त दुस्तर और गम्भीर होरहीहै, तथा उन्नतिको प्राप्त चिन्ताही इस नदीका तटस्थल है। इस नदीके पारजानेवाले शुद्धचित्त योगीश्वर अत्यन्त आनन्दको प्राप्त होते हैं॥४२॥

छप्पय—नदीरूप यह आश मनोरथ पूर रह्यौ जल। तृष्णा तरल तरंग राग है ग्राह महाबल। नानातर्क विहंग संग धीरज तरु तोरत। भ्रमर भयानक मोह सवनकों गहि गहि बोरत। नित वहत रहत चित भूमिमें चिन्तातट अतिहि विकट। कढि गये पार जोगी पुरुष उन पायो सुख तट निकट ॥ ४२ ॥

आसंसारं त्रिभुवनमिदं चिन्वतां तात तादृङ्नैवास्माकं नयनपदवीं श्रोत्रवर्त्मागतो वा ॥ योऽयं धत्ते विषयकरिणीगाढगूढाभिमानक्षीबस्यान्तःकरणकरिणः संयमालानलीलाम् ॥ ४३ ॥

सं० टी०-अथ संयमिनो दुर्लभत्वं सूचयति । आसंसारमिति । हे तात ! आसंसारं प्रलयपर्यन्तमिदं त्रिभुवनं चिन्वतामन्वेषणं कुर्वतामस्माकं नयनपदवीं दृङ्मार्गं वाऽथवा श्रोत्रवर्त्म श्रवणमार्गं न गतः न दृष्टो न श्रुत इत्यर्थः । स कः योऽयं विषय एव करिणी हस्तिनी तस्यां गाढो दृढः गूढः पूर्णो योऽभिमानस्तेन क्षीबस्य मत्तस्यान्तःकरणकरिणश्चित्तगजस्य संयमो नियमनं तदेवालानं बन्धनं तस्य लीलां निरोधचेष्टां धत्ते दधातीत्यर्थः ॥ मानुषं जन्म सम्प्राप्य मनो रोद्धुं च शक्नुते । दुर्लभोऽस्ति त्रिलोक्यां स पूज्यो वन्द्योऽप्यसौ ध्रुवम् ॥ १ ॥ मन्दाक्रान्तावृत्तमिदम् ॥४३॥

भा० टी०—हे तात ! जबसे यह संसार प्रवृत्त हुआहै तबसे हम त्रिभुवनमें खोजते फिरतेहैं, परन्तु ऐसा दृढ मनुष्य न तौ देखनेहीमें आया है और न सुननेहीमें आया है जो विषयरूपी हस्तिनीके गूढ अभिमानसे उन्मत्त अन्तःकरणरूपी हस्तीको संयमरूपी बन्धनसे बांधकर रोके ॥ ४३ ॥

दोहा—ऐसौ मैं संसारमें सुन्यौ न देख्यौ धीर ।
विषया हथिनी संग लग्यौ मनगज बांधै वीर॥४३॥

ये वर्तन्ते धनपतिपुरः प्रार्थनादुःखभाजो ये चाल्पत्वं दधति विषयाक्षेपपर्यस्तबुद्धेः ॥ तेषामन्तःस्फुरितहसितं वासराणां स्मरेयं ध्यानच्छेदे शिखरिकुहरग्रावशय्यानिषण्णः॥४४

सं० टी०—साम्प्रतं निर्वेदतायाः स्वरूपमाह । ये वर्तन्त इति । अहं तेषां वासराणां अन्तरभ्यन्तरे स्फुरितं हसितं यस्मिन् कर्मणि यथा भवति तथा स्मरेयं चिन्तयामि । ये वासरा धनपतिपुरो धनाढ्यानां पुरस्तात्प्रार्थना याचना तस्या यद्दुःखं तद्भजंतीति ते प्रार्थनादुःखभाजो वर्तन्ते । चान्यये वासरा विषयाक्षेपपर्यस्ता बुद्धिर्यस्य स विषयाक्षेपपर्यस्तबुद्धिस्तस्य । किम्भूतोऽहं शिखरिकुहरे या ग्रावशय्या तस्यां निषण्णः । वा शिखरिकुहरस्य पर्वतविवरस्य या ग्रावशय्या तत्र निषण्णः निविष्टः । मन्दाक्रान्तावृत्तमिदम् ॥ ४४ ॥

भा० टी०—जे दिन धनवानोंके अगाडी प्रार्थना (याचना) रूप दुःखके भागी होनेमें बडे मालुम पडतेहैं अर्थात् उनकी खुशामद करते २ बीतनेमें नहीं

होते, और वे दिन अत्यंत विषयासक्त बुद्धिवाले मनुष्योंको छोटे होते हैं अर्थात् जानेभी नहीं मालुम पडते हैं सो वो कौनसा दिन होगा। जिस दिन पर्वतोंकी खोहोंके पाषणोंकी शय्यापर बैठाहुआ मैं ध्यानमें विश्राम पाकर अपने अन्तःकरणमें हंसी करताहुआ उन दिनोंको स्मरण (याद) करूंगा ॥ ४४ ॥

कुण्डलिया—छोटे दिन लागत तिन्है जिनके बहुविध भोग। बीत जात बिलसत हसत करत सुरतसंजोग। करत सुरत संजोग तनकसे लागत तिनकों। जे हैं सेवक दीन निपट दीरघ व्है बिनकों। हम बैठ गिरिशृंग अंग याही ते मोटे। सदा एकरस घोस लगत है बडे न छोटे ॥ ४४ ॥

विद्या नाधिगता कलंकरहिता वित्तं च नोपार्जितं शुश्रूषापि समाहितेन मनसा पित्रोर्न सम्पादिता ॥ आलोलायतलोचना युवतयः स्वप्नेऽपि नालिङ्गिताः कालोऽयं परपिण्डलोलुपतया काकैरिव प्रेरितः ॥ ४५ ॥

सं० टी०—अधुना जन्मन ऐहिकं पारलौकिकं च किंचिदपि फलमदृष्ट्वाऽनुतपन्नाह। विद्येति। अभिमानादिकलंकेन रहिता विद्या नाधिगता न प्राप्ता। वित्तं धनं च नोपार्जितं न सम्पादितम्। समाहितेन निश्चलेन मनसा पित्रोर्मातापित्रोः शुश्रूषा सेवाऽपि न सम्पादिता न कृता। आलोलानि चञ्चलानि आयतानि विस्तीर्णानि लोचनानि यासां ता युवतयः स्वप्नेऽपि नालिङ्गिताः। किंत्वस्माभिः केवलं परपिण्डेपु परान्नेपु लोलुपतया लुब्धतया काकैरिव कालः प्रेरितो गमितः व्यर्थमेव जन्माभूदिति भावः। विद्याधनादिचिन्तां च स्त्रीभोगस्यापि चिन्तनम्। हित्वा तुष्टमनाः कालं नयेच्छंकरचिन्तया ॥ १ शार्दूलविक्रीडितं वृत्तमिदम् ॥ ४५ ॥

भा० टी०—अभिमानादिकलंकसे रहित विद्याभी नहीं पढी, धन उपार्जन नहीं किया, एकाग्रचित्त होकर मातापिताकी सेवाभी नहीं की, और चञ्चल और विस्तीर्ण नेत्रवाली स्त्रियोंका स्वप्नमेंभी आलिङ्गन नहीं किया, हमने तो केवल पराये अन्नका लोभ करते करते काकके समान सब जीवन यौंही व्यतीत करादिया ॥४५॥

छप्पय—विद्यारहित कलंक ताहीं चितमें नाहिं धारी। धन उपजायौ नाहिं सदा संगी सुखकारी। मातपिताकी सेव शुश्रूषा

नेक न कीन्हीं । मृगनैनी नवनारि अंक भर कबहु न लीन्ही । योंही व्यतीत कीन्हौ समय ताकत डोल्यौ काक ज्यों । ले भज्यौ टूक परहाथतें चंचल चोर चलाक ज्यौं ॥ ४५ ॥

विशीर्णे सर्वस्वे तरुणकरुणापूर्णहृदयाः स्मरन्तः संसारं विगुणपरिणामावधिगतिम् ॥ वयं पुण्यारण्ये परिणतशरच्चन्द्रकिरणैस्त्रियामां नेष्यामो हरचरणचित्तैकशरणाः ॥४६॥

सं० टी०—सर्वस्वहानौ जनानामीश्वरशरणं शिक्षयति । विशीर्ण इति । सर्वस्वे सर्वधने विशीर्णे नष्टे सति हरचरणमेव चित्ते एकं शरणं येषामेतादृशा वयं परिणता वृद्धाः शरच्चन्द्रकिरणा यस्मिंस्तस्मिन् पुण्यारण्ये त्रियामां रात्रिं कदा कस्मिन् समये नेष्यामोऽतिक्रमिष्यामः । कथंभूता वयं तरुणा या करुणा पराऽहिंसा निश्चयरूपा तया परिपूर्णं हृदयं येषां ते । पुनः कथंभूता वयं विगुणो दोषः परिणामः प्रतिक्षणविनाशित्वं तयोरवधिं मर्यादां गतं प्राप्तं संसारं स्मरन्तः । सर्वस्वार्थे विनष्टेऽपि करुणापूर्णमानसाः । धन्ये वने स्थिताः शम्भुं स्मरन्ति प्रेमतोऽनिशम् ॥ १ ॥ शिखरिणीवृत्तमिदम् ॥ ४६ ॥

भा० टी०—सर्वस्वके नष्टहोजानेपर शिवपादपंकजको केवल अपना रक्षक समझकर अत्यन्त करुणासे पूर्ण हो और प्रतिक्षण संसारकी असारता स्मरण करतेहुए हम शरदऋतुकी चांदनीमें किसी पवित्रवनमें बैठकर कब रात्रिको व्यतीत करेंगे ॥ ४६ ॥

छप्पय—बीतगयो सर्वस्व तरुण करुणा छाई हिय । विनाशवान संसार अन्त परिणाम जान जिय । अति पवित्र आरण्य सरदके चन्द सहित निशि । करिहौं तहां वितीति प्रीति जुत निरख दशों-दिशि । शिव शिव शंकर गवरिवर गंगाधर हर हर कहत । भवतारन शम्भुचरण एक शरण यह चित चहत ॥ ४६ ॥

वयमिह परितुष्टा वल्कलैस्त्वं दुकूलैः सम इह परितो-षो निर्विशेषाविशेषः ॥ स तु भवतु दरिद्रो यस्य तृष्णा विशाला मनसि च परितुष्टे कोऽर्थवान् को दरिद्रः ॥४७॥

शास्त्रोंका सुनना, चिरकालसे विचारकरनेपरभी मैं नहीं जानसकाहुं कि यह सब प्राप्तहोना किस प्राचीन श्रेष्ठतपका फल है ॥ ४८ ॥

दोहा—सत्संगति, स्वच्छन्दता, विना कृपणता भक्ष ।
जान्यौ नहिं किहि तप किये यह फल होत प्रतक्ष ॥४८॥

पाणिः पात्रं पवित्रं भ्रमणपरिगतं भैक्षमक्षय्यमन्नं विस्तीर्णं वस्त्रमाशा उत गगनमलं तल्पमस्वल्पमुर्वी ॥ येषां निःसंगतान्तःकरणपरिणतिः स्वात्मसन्तोषिणस्ते धन्याः संन्यस्तदैन्यव्यतिकरनिकराः कर्म निर्मूलयन्ति ॥ ४९ ॥

सं० टी०—अधुना विरक्ता ये ज्ञानिनस्तान् स्तौति । पाणिरिति । येषां पाणिर्हस्त एवान्नजलादिग्रहणार्थं पवित्रं पात्रमस्ति, तथा भ्रमणेन परिगतं प्राप्तं भैक्ष्यं भिक्षालभ्याद्यमक्षय्यं परिपूर्णमन्नं वर्तते । तथाऽऽशा दिश उताथवा गगनमाकाशमलमतिशयेन विस्तीर्णं वस्त्रमस्ति । येषामुर्वी पृथिवी अस्वल्पं बहुविस्तारयुक्तं तल्पं शय्या वर्तते । येषामन्तःकरणस्य परिणतिर्वृत्तिर्निःसंगता सर्वसंसर्गशून्याऽस्ति, । ये च सर्वविषयभोगतृष्णां परित्यज्य स्वात्मनि सन्तोषवन्तोऽतएव न्यस्तस्त्यक्तो दैन्यव्यतिकराणां याञ्चादुःखानां निकरः समूहो यैस्तादृशाः सन्तः कर्म निर्मूलयन्ति तत्वज्ञानेनाज्ञानं विनाश्य त्रिविधं कर्म नाशयन्ति ते धन्याः कृतकृत्या इत्यर्थः । परांविरक्तिमाश्रित्य तत्वज्ञानमुपागताः । ते धन्याः सन्ति लोकेऽस्मिन्नेतरे योनिपूरकाः ॥ १ ॥ स्रग्धरावृत्तमिदम् ॥ ४९ ॥

भा० टी०—हाथही जिनका पवित्र बरतन है, भिक्षाजही जिनका उत्तम भोजन है, निर्मल आकाशही जिनका वस्त्र है, पृथ्वीही जिनकी शय्या है, जिनके अन्तःकरणकी वृत्ति सबप्रकारके संसर्गोंसे शून्य है, जो सम्पूर्ण विषयभोगतृष्णाओंका परित्याग कर अपने आत्माहीमें सन्तुष्ट हैं, दीनताके समूहको जिनने सर्वा-नशन त्यागदियाहै, और कर्मको जिनने समूल नष्ट करदियाहै, ऐसे उत्तम पुरुषोंको धन्यहै ॥ ४९ ॥

छप्पय—भोजनको कर पट्ट दशों दिश वसन बनाये। भरवें भी स्वर्हे अन्न पलंग पृथ्वीपर छाये। छांडि सबनको संग अकेले रहत रैन दिन। निज आतमसों लीन पीन सन्तोष छिनहि छिन। मनके विकार द्वन्द्वनिको डारे तोर मरोर जिन। ते धन्य २ सन्यासधन कर्म किये निर्मूल तिन ॥ ४९ ॥

दुराराध्यः स्वामी तुरगचलचित्ताः क्षितिभुजो वयं तु स्थूलेच्छा महति च पदे बद्धमनसः ॥ जरा देहं मृत्युर्हरति सकलं जीवितमिदं सखे नान्यच्छ्रेयो जगति विदुषोऽन्यत्र तपसः ॥ ५० ॥

सं॰ टी॰—चलचित्तराजाज्ञाधारणापेक्षया तप एवेहामुत्र श्रेयस्करमित्याह । दुराराध्य इति । हे सखे ! जगति संसारे विदुषः पण्डितस्य तपसः अन्यत्रान्यत् श्रेयः कल्याणं न । कथं स्वामी अधिपतिः दुराराध्यः । क्षितिभुजो राजानस्तुरगचलचित्ताः अश्ववच्चलचेतसः । तु पुनः वयं स्थूलेच्छाः महाशयाः । चान्यत् महति पदे मुक्तिलक्षणे बद्धमनसः । जरा देहं हरति । मृत्युरिदं सकलं जीवितं हरति । ततस्तपसा विना श्रेयो नास्ति ॥ शिखरिणीवृत्तमिदम् ॥ ५० ॥

भा॰ टी॰—स्वामीकी सेवा करना अत्यन्त कठिन है, और राजागण अश्वकेसमान चंचलचित्त होते हैं, हम तो स्थूलेच्छावाले मनुष्य हैं, हमारा मन तो महत्पदमें बंधाहुआ है, वृद्धावस्था इस देहको हरलेतीहै, और मृत्यु इस सम्पूर्ण जीवनको शेष करदेताहै, इसकारणसे हे सखे ! इस संसारमें ज्ञानवान्के लिये तपसे अधिक कुछभी श्रेयस्कर नहीं है ॥ ५० ॥

दोहा—नृपसेवामें तुच्छ फल बुरी कालकी व्याधि ।
अपनो हित चाहत कियौ तौ तू तप आराधि ॥ ५० ॥

भोगा मेघवितानमध्यविलसत्सौदामिनीचञ्चला आयुर्वायुविघट्टिताभ्रपटलीलीनाम्बुवद्भङ्गुरम् ॥ लोला यौवनलालना तनुभृतामित्याकलय्य द्रुतं योगे धैर्यसमाधिसिद्धिसुलभे बुद्धिं विधद्ध्वं बुधाः ॥ ५१ ॥

सं॰ टी॰—भोगादि सर्वमस्थिरं ज्ञात्वा योगे चित्तं निदध्यादित्याह । भोगा इति । मेघानां वितानं समुदायस्तन्मध्ये विलसन्ती या सौदामिनी विद्युल्लता तद्वच्चञ्चला भोगाः । आयुस्तु वायुना विघट्टिता विद्राविता याऽभ्रपटली मेघमाला तस्यां लीनं यदम्बु जलं तद्वद्भंगुरमस्थिरं, तनुभृतां देहधारिणां यौवनस्य लालना स्नेहादादरविशेषो लोला । तस्य क्षणभङ्गुरत्वेन तस्यापि क्षणभङ्गुरत्वादित्येवं भोगादीनां चंचलत्वमाकलय्य विचार्य द्रुतं शीघ्रं हे बुधाः ! धैर्येण या समाधिसिद्धिश्चित्तैकाग्रता तया सुलभे योगे बुद्धिं विदध्वं कुरुध्वमित्यर्थः ॥ न भोगा न च तारुण्यं नाप्यायुः सुस्थिरं नृणाम् । इति ज्ञात्वा मनो धार्यं योगाधीशे हरे नृभिः ॥ १ ॥ शार्दूलविक्रीडितं वृत्तमिदम् ॥ ५१ ॥

भा० टी०—मनुष्योंके भोग मेघोंके समूहमें चमकतीहुई बिजुलीकेसदृश चंचल हैं, आयु वायुसे छिन्न भिन्न मेघमालामें लीन जलके समान क्षणभङ्गुर है, और यौवनकी उमंगभी स्थिर नहींहै, इसलिये हे पण्डितो ! ऐसा समझकर धैर्यसे प्राप्त चित्तकी एकाग्रताद्वारा सुलभ जो योग है उसमें बुद्धिको लगाओ ॥ ५१ ॥

कुण्डलिया—जैसे चंचल चंचला त्यौंही चंचल भोग। तैसेही यह आयु है ज्यौं घट पवनप्रयोग । ज्यौं घट पवनप्रयोग तरल त्यौंही जोबन तन। बिनसत लगत न वार गात ज्हे जात ओसकन । देख्यौ दुःसह दुःख देहधारिनकौ ऐसे । साधत सन्त समाधि व्याधिसों छूटत जैसे ॥ ५१ ॥

पुण्ये ग्रामे वने वा महति सितपटच्छन्नपालीं कपालीमादाय न्यायगर्भद्विजमुखहुतभुग्धूमधूम्रोपकण्ठम् ॥
द्वारं द्वारं प्रवृत्तो वरमुदरदरीपूरणाय क्षुधार्तो मानी प्राणी स धन्यो न पुनरनुदिनं तुल्यकुल्येषु दीनः ॥ ५२ ॥

सं० टी०—यो हि मानी जनोऽकर्तव्यमपि करोति परन्तु तुल्यजातिषु दीनो न भवति स धन्यो नेतर इत्याह । पुण्य इति । यो मानी प्राणी क्षुधार्तः सन्नुदरदरीपूरणाय कुक्षिकन्दराभरणाय पुण्ये पुण्योत्पादके तीर्थविशिष्टे ग्रामे महति विस्तीर्णे वने वा सितेन शुक्लेन पटेन वस्त्रेण छन्नाच्छादिता पाली मुखं यस्यास्तां कपालीं घटादिखण्डरूपामादाय गृहीत्वा न्यायो नीतिर्गर्भे मनस्यन्तर्येषां तैर्द्विजैर्यो हुतो हुतभुगग्निस्तस्य धूमेन धूम्रो धूमचिन्हित उपकण्ठोऽन्तरं यस्य तादृशं द्वारं द्वारं प्रवृत्तस्तस्य तत्प्रवर्तनं वरं स धन्यश्च तुल्यकुल्येषु सजातीयेषु पुनर्दीनो न वरं ॥ कपालधारको भूत्वा नरो ग्रामे वनेऽपि वा । भिक्षया जीवनं कुर्यान्न समेषु हि याचनम् ॥ १ ॥ स्रग्धरावृत्तमिदम् ॥ ५२ ॥

भा० टी०—यदि कोई मानी (प्रतिष्ठित) मनुष्य क्षुधासे व्याकुल होकर उदररूपी कन्दराके पूर्ण करनेकेलिये किसी पवित्र ग्राम अथवा किसी विस्तीर्ण वनमें उज्ज्वलवस्त्रसे ढकाहुआ ठीकरा लेकर उन मनुष्योंके द्वारपर कि जिनकी चौखट न्यायपूर्वक ब्राह्मणोंकी होमीहुई अग्निके धूमसे मलिन है भ्रमणकरे तो श्रेष्ठ है, परन्तु समानकुलवालोंके सन्मुख दीन होना उत्तम नहीं है ॥ ५२ ॥

सोरठा—विप्रनके घर जाय भीख मांगिवौ है भलौ ।
बंधुनसों सिर नाय भोजनहू करिवौ बुरौ ॥५२॥

चाण्डालः किमयं द्विजातिरथवा शूद्रोऽथ किं तापसः
किंवा तत्वनिवेशपेशलमतिर्योगीश्वरः कोऽपि किम् ॥
इत्युत्पन्नविकल्पजल्पमुखरैः सम्भाष्यमाणा जनै- र्न क्रुद्धाः
पथि नैव तुष्टमनसो यान्ति स्वयं योगिनः ॥ ५३ ॥

सं० टी०—स्वात्मनि लीनानां योगिनां गतिं दर्शयति । चाण्डाल इति । अयं जनः किमिति वितर्के चाण्डालोऽथवा द्विजातिः ब्रह्मक्षत्रविशां मध्ये कोप्यस्ति अथवा शूद्र एव किं वा तापसस्तपस्वी किं वा तत्वनिवेशे आत्मनिश्चये पेशला निपुणा मतिर्यस्यैतादृशःकोऽपि योगीश्वरः किम् । इत्यमुना प्रकारेणोत्पन्नो यो विकल्पःसंशयस्तेन जल्पो नानाविधो वादस्तेन मुखरैर्वाचालैर्जनैः सम्भाष्यमाणाःसन्तोऽसत्कुर्वते न क्रुद्धा नैव तुष्टमनसो हर्षितहृदया योगिनः सावधानमनसः स्वयं स्वेच्छयैव पथि मार्गे यान्ति विचरन्तीत्यर्थः । अलक्षिता मजन्तीह स्वीयैरन्यैश्च योगिनः । नानातर्कवचोभिस्ते न हृष्टाः कुपिता न च ॥ १ ॥ शार्दूलविक्रीडितं वृत्तमिदम् ॥ ५३ ॥

भा० टी०—यह चाण्डाल है, अथवा ब्राह्मण है, शूद्र, तपस्वी अथवा तत्वविवेकमें चतुर कोई योगीश्वर है, ऐसे अनेकप्रकारके संशयोंपर तर्क वितर्क करते हुए मनुष्योंसे सम्भाषण करनेपरभी योगीजन न क्रुद्ध होतेहैं, और न हर्षित होते हैं, किन्तु सावधानचित्त होकर स्वच्छन्द अपने मार्गमें विचरण करतेहैं ॥५३॥

दोहा—विप्र शूद्र योगी तपी सुपच कहत कर टोक ।
सबकी बातें सुनत हों मोकों हर्ष न शोक ॥ ५३ ॥

सखे धन्याः केचित् त्रुटितभवबन्धव्यतिकरा वनान्ते
चित्तान्तर्विषमविषयाशीविषगताः ॥ शरच्चन्द्रज्योत्स्ना-
धवल गगनाभोगसुभगां नयन्ते ये रात्रिं सुकृतचय-
चित्तैकशरणाः ॥ ५४ ॥

सं० टी०—पापहेतुभूत [illegible] [illegible] इत्याह । हे सखे प्रियमित्र ये केचित्सुकृत [illegible] शरच्चन्द्र [illegible]

पांडुरो यो गगनाभोग आकाशमण्डलं तेन सुभगां मनोज्ञां रात्रिं नयन्तेऽतिक्रमन्ति ते धन्याः। कथंभूताः त्रुटितश्छिन्नो भवबन्धस्य संसारबन्धनस्य व्यतिकरः सम्बन्धो येषां ते। तथा वनान्ते वनमध्ये चित्तस्यान्तःकरणस्यान्तर्मध्ये ये विषमाः कठिना विषयास्त एव आशीविषा भुजङ्गा गता येषांते, "वाहिताग्न्यादिषु" इति गतशब्दस्य पूर्वनिपातः। तथा सुकृतानां पुण्यानां निचयो निवहस्तस्मिन्यच्चित्तमन्तःकरणं तदेवैकं शरणं येषां तथाविधाः पुण्यसम्पादनैकतत्परा इत्यर्थः। शिखरिणीवृत्तमिदम् ॥ ५४ ॥

भा० टी०—हे सखे धन्य है उन पुरुषोंको कि जो वनमे बैठेहुये शरद ऋतुकी चांदनीसे शुभ्र हुए आकाशमंडळसे अति मनोहर ऐसी रात्रिको वितीत करतेहैं। फिर वे कैसेहैं की जिन्होंने संसारबंधनका संबंध तोडदियाहै और अन्तःकरणमेंसें महाभयानक विषयरूपी सर्प निकस गयेहैं जिनके और जिनका चित्त केवल पुण्यसमूहके संपादन करनेमेंही लगरहाहै. ॥ ५४ ॥

दोहा—जे नर जगमे धन्य है शरदशुभ्र निशि मांहिं।
तोडे बंधन जगतके मनतें विषयन सोहि ॥

सोरठा—विषयसर्पकों मारि चित लगाय शुभकर्ममें
पुण्यकर्म शुभ धारि तजि सकल मनवासना ॥ ५४ ॥

एतस्माद्विरमेन्द्रियार्थगहनादायासदादाश्रय श्रेयोमार्गमशेषदुःखशमनव्यापारदक्षं क्षणात् ॥ शान्तं भावमुपेहि संत्यज निजां कल्लोललोलां गतिं मा भूयो भज भङ्गुरां भवरतिं चेतः प्रसीदाधुना ॥ ५५ ॥

सं० टी०—इदानीं चित्तस्य दुर्मार्गप्रवृत्तिं वारयन् सन्मार्गप्रवृत्तिमुपदिशति। एतस्मादिति। हे चेतः ? इन्द्रियाणामर्थाः शब्दादिविषयास्त एव गहनं निबिडं वनं तस्मादेतस्मादायासदादायासेन परिश्रमेण साध्यात्त्वं निवृत्तिं भज। क्षणात् शीघ्रमेव शेषाणां दोषाणां दुःखानां शमनस्य नाशनस्य व्यापारे दक्षं कुशलं श्रेयसो मार्गं वैराग्यादिज्ञानान्तमाश्रयाङ्गीकुरु। हे चित्त ! शान्तं भावं स्थिरतामुपेहि प्राप्नुहि। निजां स्वकीयां कल्लोलवत्तरङ्गवल्लोलां चञ्चलां गतिं संत्यज। भंगुरामस्थिरां भवस्य रतिं प्रीतिं त्वं भूयः पुनर्बाहुल्येन वा मा भजाधुना प्रसीद प्रसादं भजेत्यर्थः ॥ इन्द्रियार्थान्परित्यज्य शान्तभावं भजे रतिम्। अनेकभवदुःखानां भंजनं ज्ञानमाश्रयेत् ॥ १ ॥ शार्दूलविक्रीडितं वृत्तमिदम् ॥ ५५ ॥

भा० टी०—हे चित्त ! बडे परिश्रमसे प्राप्त दुःखदाई इन्द्रियोंके विषयरूपी सघनवनसे विश्राम ले, सम्पूर्णदुःखोंके नाशकरनेमें समर्थ कल्याणमार्गका शीघ्रही आश्रय ले, शान्तभावको अङ्गिकार कर, तरङ्गकेसमान अपनी चञ्चल गतिको त्याग, अब फिर इस नाशवान् संसारीइच्छाका सेवन मतकरे, और आपही तूं प्रसन्नरूप हो ॥ ५५ ॥

छप्पय—एरे चित कर कृपा त्याग तू अपनी चालहि। सिर पर नाचत खड्यौ जान तू ऐसें कालहि। ये इन्द्रीगण निठुर मान मत इनकौ कहिवौ। शान्त भाव कर ग्रहण सीख कठिनाई सहिवौ। मिथ्या जगकी आस त्याग तू अबही दैरे। सार यही एक जान नाम शिव शिव तू लैरे ॥ ५५ ॥

पुण्यैर्मूलफलैः प्रिये प्रणयिनि प्रीतिं कुरुष्वाधुना भूशय्यानववल्कलैरकरणैरुत्तिष्ठ यामो वनम् ॥ क्षुद्राणामविवेकमूढमनसां यत्रेश्वराणां सदा चित्तव्याध्यविवेकविह्वलगिरां नामापि न श्रूयते ॥ ५६ ॥

सं० टी०—धनिकानां संगेनोद्विग्नचित्तो वनवासेच्छया चित्तवृत्तिमुपदिशति [illegible] रिति । हे प्रिये चित्तवृत्ते ! त्वमुत्तिष्ठोत्थिता भव वयमधुना वनं यामो गच्छामः । यत्र [illegible] मूढं मनो येषामतएव क्षुद्राणां तुच्छानीश्वराणां श्रीमतां नामाऽपि न श्रूयते । [illegible] सदासर्वदा वित्तं धनमेव व्याधी रोगस्तेन योऽविवेकोऽविचारस्तस्मा[illegible] प्रियशरीरनिर्वाहः कथं भविष्यतीति तत्राह । पुण्यैः पावनैः मूलानि च फलानि च [illegible] वृत्तिं जीविकां हे प्रिये ! त्वं कुरुष्व । नवानि यानि वल्कलानि [illegible] च कुरुष्वेत्येवं तत्र निर्वाहः कर्तव्यस्तेषामीश्वराणां मुखदर्शनेन [illegible] रेवोदरी वृत्तिं भूशय्या नववल्कलैः । [illegible]
विक्रीडितं वृत्तमिदम् ॥ ९६ ॥

भा० टी०—हे प्रिये चित्तवृत्ते ! तूं अब उठ और पवित्र [illegible] पालन कर, तथा वनीवनाई भूमिशय्या और नवीनवल्कल[illegible] हम तौ अब वनको जातेहैं. जहां अविवेककेकारण [illegible] और धनरूपी व्याधिजनित विकारसे जिनकी [illegible] नापभी नहीं सुनाईदेता ॥ ५६ ॥

दोहा—वकल वसन फल असन कर करियौ वनविश्राम।
जित अविवेकी नरनकौ सुनियत नाहीं नाम॥ ५६॥

मोहं मार्जयतामुपार्जय रतिं चन्द्रार्धचूडामणौ चेतः स्वर्गतरंगिणीतटभुवामासङ्गमङ्गीकुरु॥ को वा वीचिषु बुद्बुदेषु च तडिल्लेखासु च स्त्रीषु च ज्वालाग्रेषु च पन्नगेषु च सरिद्वेगेषु च प्रत्ययः॥ ५७॥

सं० टी०—विषयभोगेच्छां परित्यज्य "शिवे रतिं कुरु" इति स्वचेतः प्रतिबोधयति। मोहमिति। हे चेतः! मोहं मार्जयतां दूरीक्रियतां। रे प्राणिन्! चन्द्रार्धचूडामणौ शिवे रतिं तोषमुपार्जय सम्पादय। रे चेतः! स्वर्गतरंगिणीतटभुवां आसङ्गं सङ्गतिमङ्गीकुरु। नोऽस्माकं वाऽथवा वीचिषु कल्लोलेषु प्रत्ययो विश्वासः कः। चान्यज्जलबुद्बुदेषु वर्षावारिपुटेषु कः प्रत्ययः। चान्यत्तडिल्लेखासु सौदामिनीषु च पुनः स्त्रीषु कः प्रत्ययः। यथा एतेषु नोऽस्माकं प्रत्ययो नास्ति तथा जीवितेषु नास्ति। शार्दूलविक्रीडितं वृत्तमिदम्॥ ५७॥

भा० टी०—हे चित्त! मोहको छोडकर चन्द्रार्धचूडामणि श्रीशिवजीसे प्रीति कर और गङ्गातटके वृक्षोंके नीचे विश्राम ले। देखो! जलके तरंग, पानीके बबूले, बिजुलीकी चमक, अग्निकी ज्वालाकी शिखा, स्त्री, सर्प, और नदीके प्रवाहमें स्थिर रहनेका कुछ विश्वास नहींहै, अर्थात् यह सातों वस्तु स्थिर नहींरहसक्ती हैं, इसलिये स्त्रीके विलासमें मग्न मत हो॥ ५७॥

छप्पय—मोह छांड मन मीत प्रीतिसों चन्द्रचूड भज। सुर-सरिताके तीर धीर धर दृढ आसन सज। शम दम भोग विराग त्याग तपकों तू अनुसरि। वृथा विषय बकवाद स्वाद सबही तू परिहर। शिर नहिं तरंग बुदबुद तडित अगिनशिखा पन्नग सरित। त्योंही तन जोवन धन अथिर चल दल दल केसे चरित॥ ५७॥

अग्रे गीतं सरसकवयः पार्श्वतो दाक्षिणात्याः पृष्ठे लीलावलयरणितं चामरग्राहिणीनाम्॥ यद्यस्त्येवं कुरु

भवरसास्वादने लंपटत्वं नोचेच्चेतः प्रविश सहसा निर्विकल्पे समाधौ ॥ ५८ ॥

सं० टी०---पूर्णविषयसुखसमाधिसुखाभ्यामन्तरा वृथैव जन्मेति सूचयति । अग्रे गीत मिति । सिंहासनस्थस्य सतः पुरुषस्याग्रे पुरोभागे गीतं कुशलानां वारवधूनां गानं स्यात् । पार्श्वतो वामदक्षिणभागयोर्दाक्षिणात्या दक्षिणदेशीयाः सरसकवयः रससहितकवितया स्तुतिकारिणो भवेयुः । पृष्ठे पृष्ठभागे चामरग्राहिणीनां शोभनस्त्रीणां चामरचालनरूपा या लीला तया वलयानां कङ्कणानां रणितं शब्दः स्यात् । यद्येवमुक्तेन प्रकारेण भोगसाधनकलापोऽस्ति तर्हि भवस्य संसारस्य यो रसस्तस्यास्वादने हे चेतः ! त्वं लम्पटं संलग्नं भव । चेद्यद्येवं भोगसामग्री नास्ति तदा सहसा शीघ्रमेव निर्विकल्पे समाधौ त्वं प्रविश प्रवेशं कुर्वित्यर्थः । उभयाभावे वृथैव जन्मेतिभावः । अग्रे पश्चात् पार्श्वतो वा यदि शृङ्गारसम्पदः । तदा तु विषये रागो चेन्मनस्त्वं स्थिरीभव ॥ १ ॥ मन्दाक्रान्तावृत्तमिदम् ॥ ५८ ॥

भा० टी०—सन्मुख प्रवीण गवैये गातेहों, दाहिने बाँये दक्षिणदेशके सरस कवि उत्तम काव्य सुनातेहों, और पीछेसे चमरढोरनेवाली सुन्दरस्त्रियोंके कङ्कणोकी झुनकारका शब्द सुनाईदेता हो. जो तुझको ऐसी सामग्री प्राप्तहो तौ संसारके रसका स्वाद लेनेंमे मग्न हो. नहीं तो हे चित्त ! शीघ्रही स्थिरसमाधिमें प्रवेशकर ॥ ५८ ॥

छप्पय—छ हौ रागिनी राग गुनी गावत हैं निशिदिन । कविजन पढत कवित्त छन्द छप्पय छिनही छिन । लिये दुहू घाँ चौर करत ठाडी नवनारी । झनक मनक धुन होत लगत काननकूं प्यारी । जो मिलै तोहि यह सौंज सब तौ तू करि संसाररति । नहि मिलै इती हू तौ इतैं साधत क्यों न समाधिगति ॥ ५८ ॥

विरमत बुधा योषित्संगात्सुखात् क्षणभंगुरात्कुरुत करुणामैत्रीप्रज्ञावधूजनसंगमम् ॥ न खलु नरके हाराक्रान्तं घनस्तनमण्डलं शरणमथवा श्रोणीबिम्बं रणन्मणिमेखलम् ॥ ५९ ॥

सं० टी०---अधुना क्षणभङ्गुरात् स्त्रीसुखाद्वारयन् दैवसम्पल्लक्षणस्त्रीसङ्गं मित्रभावेन शिक्षयति । विरमतेति । हे बुधाः ! सारासारविवेकिनो योषितां स्त्रीणां संगो यस्मिंस्तस्मात्

क्षणभङ्गुरात् सुखात् यूयं विरमत विरक्ता भवत । करुणा च मैत्री च प्रज्ञा च प्रकृष्टबुद्धिस्ता एव वधूजनाः स्त्रीजनास्तेषां सङ्गमं सङ्गतिं कुरुत । खलु यस्मान्नरके हारैः पुष्पादिनिर्मितैराक्रान्तं वेष्टितं घनस्तनयोर्मण्डलं शरणं रक्षकं नास्ति । अथवा रणन्ती शब्दायमाना मणीनां मेखला कटिसूत्रं यस्मिंस्तच्छ्रोणीबिम्बं नितम्बमण्डलं नरके शरणं नास्ति । तस्मात् प्रथमत एव रत्यादिसुखं दूरतः परित्यज्य मैत्र्यादीन् सम्पाद्य सुखी भवेति भावः ॥ येषित्संगं परित्यज्य प्रज्ञा कार्या च सत्पथे । येन गच्छन् पुमान् याति तच्छम्भोः परमं पदम् ॥ १ ॥ हरिणीवृत्तमिदम् ॥ ५९ ॥

भा० टी०--हे पण्डितो ! स्त्रियोंके सङ्गमरूपी क्षणभङ्गुरसुखसे विश्राम लो और मैत्री करुणा और प्रज्ञारूपी वधूसे सङ्गम करो, क्योंकि जिससमय नरकमें ताडना होगी उससमय हारोंसे भूषित स्त्रियोंके स्तनमण्डल और शब्दायमान क्षुद्रघण्टिकासे शोभायमान कटी सहायता नहीं करेगी ॥ ५९ ॥

सोरठा—तजि तरुणीसों नेह बुद्धिवधूसों नेह कर ।
नरक निवारत रोह वहै नरक लै जात है ॥ ५९ ॥

मातर्लक्ष्मि भजस्व कंचिदपरं मत्कांक्षिणी मास्म भूर्भोगेभ्यः स्पृहयालवो नहि वयं का निःस्पृहाणामसि ॥ सद्यः स्यूतपलाशपत्रपुटिकापात्रे पवित्रीकृते भिक्षासक्तुभिरेव संप्रति वयं वृत्तिं समीहामहे ॥ ६० ॥

सं० टी०--हे मातर्लक्ष्मि ! कञ्चिदपरं धनार्थिनं भजस्व सेवय मयि कांक्षा यस्याः सा मदिच्छावती त्वं मास्मभूः माभव । हि यस्मात् वयं भोगेभ्यः स्पृहालवो भोगलिप्सवो न भवामोऽतोनिस्पृहाणां त्वं कासि न कापीत्यर्थः । तर्हि तव जीविका कथं स्यादिति तत्राह । सद्यः शीघ्रमेव स्यूतं निर्मितं यत्पलाशपत्राणां पुटिकापात्रं दोणपात्रं तस्मिन् पवित्रीकृते जलप्रोक्षणेन शुद्धीकृते भिक्षया प्राप्तैः सक्तुभिरेव सम्प्रतीदानीं वृत्तिं जीविकां वयं समीहामहे कर्तुमिच्छाम इत्यर्थः । यः प्रार्थनां सदा हित्वात्यक्त्वात्मन्निस्पृहो जनः । भिक्षाशनं प्रकुर्वाणः शिवं स्वान्ते सदा स्मरेत् ॥ १ ॥ शार्दूलविक्रीडितं वृत्तमिदम् ॥ ६० ॥

भा० टी०—हे लक्ष्मि मात ! अब तूं किसी अन्यपुरुषका सेवनकर, हमारी मतकरे । क्योंकि हमको विषयभोगकी इच्छा नहींहै, और (तूं जानतीही की जिनको कुछ इच्छा नहीं है उनके निकट तूं तुच्छ है । अब तो हम केवल

हरे ढाकके पत्तोंके बनायेहुए पवित्रदौनामें भिक्षाके सत्तूसे जीवननिर्वाह करनेकी इच्छा रखतेहैं. ॥ ६० ॥

दोहा—मोकों तजि भजि औरकों अरी लक्ष्मी मात ।
हौं पलाशके पातमें मांग्यौ सतुआ खात ॥ ६० ॥

यूंयं[1] वयं[2] वयं[3] यूयमित्यासीन्मतिरावयोः[4] ॥ किं[11]
जातमधुना[12] मित्रे[10] यूयं[9] यूयं[13] वयं[14] वयम्[15] ॥ ६१ ॥

सं० टी०—अविवेकदशायां मोहेनावयोरभेदेऽपि विवेकदशायां केनाप्यचिन्त्यमहिम्ना वैराग्येण तत्त्वज्ञानेन वा भेदो जात इत्याह । यूयमिति । भो मित्र ! मोहादविवेकदशायामतिस्निग्धयोः पितापुत्रयोरिवास्माकं स्नेहादभेदमतिरासीत् यूयं वयं वयं यूयमिति । अधुनेदानीं किमप्यपूर्वं वैराग्यं जातं येन यूयं यूयमेव विषयसक्ताः वयं वयमेव सर्वस्माद्विरक्ता इत्यर्थः । यद्वाऽधुना किमप्यपूर्वं तत्त्वज्ञानं जातं येन यूयं यूयमेवाज्ञा एव स्थिताः । वयं वयमेव शुद्धसच्चिदानन्दरूपा जाता इत्यर्थः ॥ पुराऽऽवयोरभेदोऽभूदज्ञानादधुना पुनः । येन यस्त्वं स एव त्वमहन्तु त्वद्विलक्षणः ॥ १ ॥ अनुष्टुव्वृत्तमिदम् ॥ ६१ ॥

भा०टी०—हे मित्र ! जो तुम हौ सो हम हैं, और जो हमहैं सो तुम हौ. परस्पर कुछ भेदही नहीं है, यह मति हमारी प्रथमही थी अवक्या नई वात होगई कि तुम तुमही हो और हम हमही हैं, अर्थात तुम विषयासक्त हो और हम सवसे विरक्त हैं ॥ ६१ ॥

दोहा—तुम हम हम तुम एक है सवविधि रह्यौ अभेद ।
अव तुम तुम हम हमहिं हैं भयौ कठिन यह भेद ॥६१॥

वाले लीलामुकुलितममीमन्थरा[2][3][4] दृष्टिपाताः[5] किं[6] क्षिप्यंते विरम विरम[9] व्यर्थ[13] एष[10] श्रमस्ते[12][11] ॥ संप्रत्यन्ये[14][16] वयं[15]-मुपरतं[18] वाल्यमास्था[17] वनान्ते[19] क्षीणो[22] मोहस्तृणमिव[21][24][25] जगज्जालमालोकयामः[23][26] ॥ ६२ ॥

सं० टी०—वाल इति । हे वाले हे सुन्दरि । तावकीना लीलामुकुलिता अमी मन्थरा दृष्टिपाता अस्मासु किं क्षिप्यन्ते विरम विरम । एष ते तव श्रमो व्यर्थो निरर्थकः । सम्प्रति वयं

अन्ये ते न भवामः। अस्माकं बाल्यमुपरतं। अस्माकमास्था वनान्ते। कथं। मोहः क्षीणो गतः। इदं जगज्जालं तृणमिव तुच्छमालोकयामो विलोकयामः ॥ ६२ ॥

भा० टी०—हे बाले! लीलासे किंचित् मुकुलित इन मन्द कटाक्षोंको हमपर क्यों फेंकती है? विश्राम ले। कारणकि यह तेरा श्रम व्यर्थ है, अब हम औरही हो गये हैं, हमारी बाल्यवस्था वनमेंही व्यतीत होगई, और अब हमारा अज्ञान नष्ट होगयाहै, इससमय जगत्‌रूपी जाल हमको तृणके समान तुच्छ दिखाई देताहै॥ ६२॥

छपप्य—करि २ बांके नैन हाय तू हमें निहारत। करत वृथाही खेद वादी तन वसन संवारत। हम वनवासी लोग वालपन खोयो-वनमें। तजी जगतकी आस कासना रही न मनमें। तृणके समान जानत जगत मोहजाल तोड्यौ तमक। आनन्द अखण्डित पाय हम रहे ज्ञानकी छाक छक ॥ ६२ ॥

इयं[1] बाला[2] मां[3] प्रत्यनवरतमिन्दीवरदलप्रभाचोरं[6] चक्षुः क्षिपति किमभिप्रेतमनया ॥ गतो मोहोऽस्माकं स्मरकुसुमबाणव्यतिकरज्वरज्वाला शान्ता तदपि न वराकी विरमति ॥ ६३ ॥

सं० टी०—पूर्वकथितां वैराग्यस्थितिमधुना प्रकारान्तरेण वर्णयति । इयमिति। इयं बाला मांप्रति चक्षुर्नेत्रं अनवरतं निरन्तरं किं क्षिपति। कथंभूतं चक्षुः। इन्दीवरदलप्रभाचोरं इन्दीवरस्य कमलस्य दलं इन्दीवरदलं तस्य प्रभां चोरयतीति इन्दीवरदलप्रभाचोरम्। अनया किमभिप्रेतं किं वाञ्छयते। अस्माकं मोहो गतः। स्मरकुसुमबाणव्यतिकरज्वरज्वाला शान्ता वराकी तदपि न विरमति विरामं न व्रजति। एवं जाते सति कामिन्याः कटाक्षपातो निरर्थक इति भावः। शिखरिणीवृत्तमिदम् ॥ ६३ ॥

भा० टी०—यह सुन्दरी जो मुझपर कमलकीभी शोभा चुरानेवाले नेत्रों-के कटाक्षोंको फैंकती है इससे इसका क्या प्रयोजन है। हमारा मोह तौ नष्ट हो गयाहै, और कामदेवके पुष्परूपीवाणोंसे निकलीहुई अग्निकी ज्वालाभी शान्त होगईहै, परन्तु यह वराकी फिरभी शान्त नहींहोती है ॥ ६३ ॥

दोहा—कहा कारण डारत वयन कमलनयन यह नार।
मोह काम मेरे नहीं तऊ न तिय चित हार ॥ ६३ ॥

रम्यं हर्म्यतलं न किं वसतये श्राव्यं न गेयादिकं किं वा प्राणसमासमागमसुखं नैवाधिकं प्रीतये ॥ किंतूद्भ्रान्तपतत्पतङ्गपवनव्यालोलदीपांकुरच्छायाचंचलमाकलय्य सकलं संतो वनांतं गताः ॥ ६४ ॥

सं० टी०—पूर्वेण सर्वपरित्यागिनं विहाय वनमेवाश्रयणीयमित्याह। रम्यमिति। सन्तः सत्पुरुषा वनान्तं गताः। किमिति सम्भावनायां। तेषां वसतये निवासाय हर्म्यतलं रम्यं नाभूत्किं। श्राव्यं श्रवणयोग्यं गेयं गानं नाभूत्किम्। अधिकप्रीतये प्राणसमायाः स्त्रियाः सुखं नाभूत्किम्, एतत्सर्वं अभूदिति यावत्। तथापि सन्तो वनान्तं गता वनं सेवयामासुः। किन्तूद्भ्रान्तपतत्पतङ्गपवनव्यालोलदीपाङ्कुरच्छायाचञ्चलं सकलं जीवलोकमाकलय्य विचिन्त्य हृदये ज्ञात्वा इत्यर्थः। शार्दूलविक्रीडितं वृत्तमिदम् ॥ ६४ ॥

भा० टी०—सन्तजनोंके रहनेकेलिये क्या सुन्दर महल नहीं थे? क्या उनके सुननेयोग्य उत्तमोत्तम गीत नहीं थे? क्या अधिक प्रीति उत्पन्नकरनेवाली प्राणप्यारी स्त्रीका समागमसुख उनके लिये नहीं था? यह सब कुछ था परन्तु वे तो इस संसारको गिरतेहुए पतङ्गकी पवनसे हिलतीहुई दीपककी छायाके समान चंचल समझकर वनको चलेगये ॥ ६४ ॥

छप्पय—महल महारमणीक कहा वसिवे नहिं लायक। नाहिं न सुनवे जोग कहा जो गावत गायक। नवतरुणीके संग कहा सुखहू नहिं लागत। तौ काहेकौ छांड २ ये वनकों भागत। इन जानलियौ या जगतकों जैसे दीपक पवनमें। बुझिजात छिनकमें छवि भयौ होत अंधेरो भवनमें ॥ ६४ ॥

किं कन्दाः कन्दरेभ्यः प्रलयमुपगता निर्झरा वा गिरिभ्यः प्रध्वस्ता वा तरुभ्यः सरसफलभृतो वल्कलिन्यश्च शाखाः ॥ वीक्ष्यन्ते यन्मुखानि प्रसभमुपगतप्रश्रयाणां खलानां दुःखोपात्ताल्पवित्तस्मयपवनवशान्नर्तितभ्रूलतानि ॥ ६५ ॥

सं० टी०—कन्दादौ जीवनोपाये सति किं खलमुखनिरीक्षणेनेत्याह। किं कन्दा इति। कन्दरेभ्यः पर्वतगुहाभ्यः क्षुधानिवृत्तिकरा औषधिमूलभूताः कन्दाः किं प्रलयं विनाशमुपगताः

प्राप्ताः । गिरिभ्यो निर्झरा जलस्राविणस्स्रोतसो वा प्रलयमुपगताः । वाथवा तरुभ्यः सरसं फलं बिभ्रति या वल्कलिन्यस्त्वग्विशिष्टाः शाखास्ताः किं प्रभग्ना भग्नाः । यस्मात् प्रसभमतिशयेनोपगतो नष्टः प्रश्रयो विनयो येषां तेषां दुर्जनानां खलानां मुखानि निर्विवेकिभिर्वीक्ष्यन्ते । कथंभूतानि मुखानि दुःखेनोपात्तं यदल्पं वित्तं तस्य यो गर्वः स एव पवनो वायुरोगस्तद्वशान्नर्तिता चलिता भ्रूलता येषु तानि एवंभूतानि तेषां मुखानि कदापि न वीक्षणीयानीतिभावः । जीवनायोपरचितं कन्दादि वसनं हि त्वक् । तस्मात्तत्पदमास्थाय त्यजेद्दुर्जनवीक्षणम् ॥ १ ॥ स्रग्धरावृत्तमिदम् ॥ ६५ ॥

भा० टी०—क्या गुफाओंसे कन्दमूल और पर्वतोंसे पानीके झरने नष्ट होगये? क्या वृक्षोंकी सरस फल उत्पन्नकरनेवाली शाखाएं टूटगई? जो मनुष्य अविनीत खलोंके दुःखसे प्राप्तकियेहुए अल्पधनके मदसे नाचनेवाले भौंहोंसेयुक्त मुखोंकीऔर देखतेहैं, अर्थात् खलोंका आश्रय छोडकर सत्पुरुषोंको वनकन्द मूल खाकर रहना उचितहै ॥ ६५ ॥

छप्पय—कहा कन्दराहीन भये पर्वत भूतलमें । झरना निर्जल भये कहा जे पूरित जलमें । कहा रहे सब वृक्ष फूल फलविन मुरझाये । सहे खलनके वैन अंधता जो मद छाये । कर संचित धन स्वल्प कुटिल भ्रू इत उत फेरें । रे मन भूल न जाहु कबहुं इनके तू नेरें ॥ ६५ ॥

गङ्गातरंगहिमशीकरशीतलानि विद्याधराध्युषितचारुशिलातलानि ॥ स्थानानि किं हिमवतः प्रलयं गतानि यत्सापमानपरपिण्डरता मनुष्याः ॥ ६६ ॥

सं० टी०—अपमानसहितपरान्नरुचिं त्यक्त्वा गङ्गातीरगिरिगुहानिवासो योग्य इत्याह । गंगातरंगेति । गंगायास्तरङ्गानां हिमाः शीतला ये शीकरा अम्बुकणास्तैः शीतलानि विद्याधरैर्गंधर्वविशेषैरध्युषितानि सेवितानि चारूणि रम्याणि शिलातलानि येषु तानि हिमवतो गिरेः स्थानानि किं प्रलयं नाशं गतानि । यद्यस्मात् सापमानपरपिण्डरता मनुष्याः अपमानेन सह वर्तमानो यःपरपिण्डः परदत्तआहारस्तत्र रता लुब्धा मनुष्या भवन्तीत्यर्थः । गंगासम्बन्धयुक्तानि हिमवद्गिरिसन्निधौ । स्थानानि यद्धि विद्यन्ते तदा किं दुष्टसेवया । वसन्ततिलकावृत्तमिदम् ॥ ६६ ॥

भा० टी०—गङ्गाकी तरंगोंके ठण्डे जलकणोंसे जो शीतल होरहे हैं, और जहां विद्याधर ठौर ठौरपर बैठे हैं ऐसे हिमालयपर्वतके स्थानोंका क्या लोप होगयाहै जो अपमान सहन करकेभी मनुष्य पराए दिएहुए अन्नमे रुचि करते हैं॥६६॥

दोहा—गङ्गातट गिरिवर गुफा उहां कहा नहिं ठौर।
क्यों सहते अपमान सों खात पराये कौर ॥ ६६ ॥

यदा मेरुः श्रीमान्निपतति युगान्ताग्निनिहतः समुद्राः शु-
ष्यंति प्रचुरनिकरग्राहनिलयाः॥धरा गच्छत्यन्तं धरणिधरपा-
दैरपि धृता शरीरे का वार्त्ता करिकलभकर्णाग्रचपले ॥ ६७॥

सं० टी०—कैमुतिकन्यायेन शरीरस्यास्थिरत्वमाह । यदेति । श्रीमान् कनकमयो मेरुर्युगान्तस्य प्रलयकालस्य योऽग्निस्तेन दग्धितघूर्णितः सन् यदा पतति । प्रचुराणां बहूनां मकराणां ग्राहाणां च जलचरविशेषाणां निलया आलयाः समुद्रा अपि तेन युगान्ताग्निना यदा शुष्यन्ति । तथा धरणीधराणां पर्वतानां पादैरन्तर्ग्रावभिर्धृता या धरा पृथिवी साप्यन्तं विनाशं तेनैव यदा गच्छति तदा करिकलभस्य गजशावकस्य कर्णाग्रचञ्चपले शरीरे का वार्ता स्थिरत्वसम्बन्धिनी न कापीत्यर्थः ॥ मेर्वादयः स्थिरा नस्युस्तदा किं वपुषः स्थितिः । भविता न तु केषांचिज्ज्ञानमेवं शिवं भजेत् ॥ १ ॥ शिखरिणीवृत्तमिदम् ॥ ६७ ॥

भा० टी०—प्रलयकालके अग्निका माराहुआ जब श्रीमान् सुमेरु पर्वत गिरपडताहै, बडे बडे ग्राहों और मकरोंके स्थान समुद्र जब सूखजातेहैं, और पर्वतोंके पगसे दबीहुई पृथ्वीभी जब नष्ट होजातीहै तो हाथीके बच्चाके कानके लोंके समान चंचल शरीरका स्थिरताका क्या भरोसा है ॥ ६७ ॥

दोहा—मेरु गिरत सूखत समुद्र धरनि प्रलय ह्वै जात ।
चल दलके दलसी चपल कहा देहकी वात ॥ ६७ ॥

एकाकी निःस्पृहः शान्तः पाणिपात्रो दिगम्बरः ॥
कदा शम्भो भविष्यामि कर्मनिर्मूलनक्षमः ॥ ६८ ॥

सं० टी०—इदानीं वैराग्यपूर्वकं ज्ञानं प्रार्थयति । एकाकीति । हे शम्भो ! एतादृशोऽहं कदा भविष्यामि कीदृश इत्याकांक्षायां सर्वाणि प्रथमान्तविशेषणानि एकाकीत्यादिनि । अद्वितीयः निस्पृह इच्छाशून्यः, अतएव शान्तः उपशमी । पाणी हस्तौ पात्रममत्रं यस्य स पाणिपात्रः । दिश एव अम्बरं वस्त्रं यस्य स दिगम्बरः । कर्मणां संचितप्रारब्धक्रियमाणानां निर्मूलने तत्त्वज्ञानेनाज्ञाननाशद्वारा नाशने क्षमः समर्थ इति । एकचारी स्पृहाहीनो दिग्वासः करभाजनः । कदा स्यामि हि तत्त्वज्ञः कर्म दग्धुं सदाशिव ॥ १ ॥ अनुष्टुब्वृत्तमिदम् ॥ ६८ ॥

भा० टी०—हे शम्भो ! मैं कब एकाचारी, इच्छाशून्य, शान्त, दिगम्बर, पाणिपात्र (अपने हाथोंकोही पात्र बनानेवाला) और कर्मोंकी जड उखाडनेमें समर्थ होऊंगा ॥ ६८ ॥

दोहा—एकाकी इच्छारहित पाणिपात्र दिगवस्त्र ।
शिव शिव हौं कब होउंगो कर्मशत्रुकौ शस्त्र ॥ ६८ ।

प्राप्ताः श्रियः सकलकामदुघास्ततः किं दत्तं पदं शिरसि विद्विषतां ततः किम् ॥ सम्मानिताः प्रणयिनो विभवैस्ततः किं कल्पं स्थितं तनुभृतां तनुभिस्ततः किम् ॥ ६९ ।

सं० टी०—जन्ममरणरूपसंसारनिवृत्तिं विना श्रीप्राप्त्यादि सर्वं व्यर्थमेवेत्याह । प्राप्त इति । सकलान् कामान् मनोऽभिलपितभोगान् दुहन्ति पूरयन्ति याः श्रियस्ता यदि प्राप्तास्तद ततस्तत्प्राप्तेः किं संसारनिवृत्तिर्भविष्यत्यपि तु नेत्यर्थः । विद्विषतां वैरिणां शिरसि यदि पदं दत्तं न्यस्तं तर्हि ततःकिम् । प्रणयिनः प्रियाः सम्बन्धिनो विभवैर्गजतुरगादिभिर्यदि सन्मानिताः सत्कारं प्रापितास्ततः किम् । तनुभृतां जीवानां तनुभिः शरीरैः कल्पं कल्पपर्य्यन्तं यदि स्थितमस्थायि ततः किं न किमपि । एतैर्भवबन्धनान्मुक्तिर्न भवेदित्यर्थः । श्रियः प्राप्तिर्वैरिजयः कल्पावधि च जीवनम् । सर्वं व्यर्थं भवेन्नृणां यदि नापैति संसृतिः ॥ १ ॥ वसन्ततिलकावृत्तमिदम् ॥ ६९ ॥

भा० टी०—यदि सर्वकामनाओंके देनेवाली लक्ष्मी पाई तौ इससे क्या ? शत्रुओंके शिरपर पग धरा तौ इससे क्या ? धनसे मित्रोंका सन्मान किया तौ इससे क्या ? यदि इस देहसे कल्पपर्यन्त जिये तौ क्या ? अर्थात जबतक मनुष्य जन्ममरणरूप संसार निवृत्तीको नहीं प्राप्तकरता तबतक उसकेलिये यह सब व्यर्थ है ॥ ६९ ॥

दोहा—इन्द्र भये धनपति भये भये शत्रुके साल ।
कलप जिये तौऊ गये अन्तकालके गाल ॥ ६९ ॥

जीर्णा कंथा ततः किं सितममलपटं पट्टसूत्रं ततः किं एका भार्या ततः किं हयकरिसुगणैरावृतो वा ततः किं ॥ भक्तं भुक्तं ततः किं कदशनमथवा वासरांते ततः किं व्रह्मज्योतिर्नवान्तर्मथितभवभयं वैभवं वा ततःकिम् ॥ ७० ॥

सं० टी०—जीर्णेति । जीर्णा कन्था लब्धा ततः किम् । सितं शुभ्रममलं स्वच्छं पटं वस्त्रं वा पट्टसूत्रं दुकूलादिकं ततः किम् । एका अद्वितीया भार्या ततः किम् । हया अश्वाः करिणो गजाश्च तेषां शोभना गणाः समूहास्तैराकृतो व्यामो वा ततः किम् । भक्तमोदनं भुक्तं ततः किम् । अथवा वासरान्ते दिनान्ते कदशनं कुत्सितभोजनं ततः किम् । तथा व्यक्तं प्रत्यक्षं ज्योतिर्बल यस्मिंस्तथाविधं मथितं भवभयं संसारभयं येन अन्तः हृदि वैभवं ऐश्वर्यं न ततः किम् । स्रग्धरावृत्तमिदम् ॥ ७० ॥

भा० टी०—यदि पुरानी गुदडी धारण की तौ क्या ? उज्ज्वल निर्मल वस्त्र या पीताम्बर धारण किया तौ क्या ? एकही स्त्री पास रही तौ क्या ? अथवा हाथी घोडोंसहित करोडों स्त्रियां रही तौ क्या ! यदि भात आदि उत्तम भोजन किया तौ क्या ? अथवा यदि सायंकालको कुत्सित अन्न खाया तौ क्या ? संसारभयके नष्टकरनेवाली ब्रह्मज्योतिको हृदयमें धारण न की और बडा वैभव पायाभी तौ इससेभी क्या है ? ॥ ७० ॥

छपय्य—जैसो कन्था चीर रेशमी सारी वैसी । जैसी नारी एक अश्वगजयुत बहु तैसी । व्यंजन बहुविध सरस कहा मन-कों ललचावै । सांझ समय विन नौन टूक तऊ भूक बुझावै । बहु-विध वैभव कहा कहा शतवर्षहि जीये । होय न भवभय दूर विना हरिपद चित दीये ॥ ७० ॥

भक्तिर्भवे मरणजन्मभयं हृदिस्थं स्नेहो न बन्धुषु न मन्मथजा विकाराः ॥ संसर्गदोषरहितो विजने निवासो वैराग्यमस्ति किमतःपरमर्थनीयम् ॥ ७१ ॥

यदि भगवद्भक्तिर्वैराग्यादिकमस्ति तर्हि तेनैव कृतार्थ इत्याह । भक्ति-

सं० टी०—रिति । भवति संसारोऽस्मादिति भवः शंकरस्तस्मिन् भक्तिः परानुरक्तिर्वर्तते । मरणजन्मनोर्भयं च हृदिस्थमस्ति, बन्धुषु स्नेहः सक्तिरपि न । तथा मन्मथः कामस्तज्जन्या ये विकाराः परस्त्रीदर्शनसंभाषादयस्तेऽपि न सन्ति । संसर्गदोषेण रहितो विजने वने निवासः स्थितिर्वर्तते । दैवसम्पन्मूलभूतं वैराग्यं चास्ति । अतो भक्त्यादिसाधनकलापात् परमन्यत् किमर्थनीयं याचनीयमस्ति न किमपीत्यर्थः । भक्तिर्भवे जनेर्भीतिर्न प्रीतिस्तनयादिषु । हृदि कामविकारो न वैराग्यं किमतःपरम् ॥ १ ॥ वसन्ततिलकावृत्तमिदम् ॥ ७१ ॥

भा० टी०--शिवजीमें भक्ति हो, मरण और जन्मका भय हृदयमें हो, भाईबन्धुओंमे स्नेह न हो, कामदेवजनित विकार मनसे दूर हों, और संसर्गदोषसे रहित निर्जनवनमें निवास हो तो फिर बताओ इससे बढकर और वैराग्य क्या है जो ईश्वरसे मांगनेयोग्य है ॥ ७१ ॥

दोहा—मन विरक्त हरभक्तियुत संगी वन तृणाडाभ ।
याहूतें कछु और है परम अर्थको लाभ ॥ ७१ ॥

तस्मादनन्तमजरं परमं विकासि तद्ब्रह्म चिन्तय किमेभिरसद्विकल्पैः ॥ यस्यानुषंगिण इमे भुवनाधिपत्यभोगादयः कृपणलोकमता भवन्ति ॥ ७२ ॥

सं० टी०-ब्रह्मोपदेशपूर्विकां लोकतुच्छतां दर्शयति । तस्मादिति । वैराग्यस्य ब्रह्मचिन्तनार्थत्वात् भो विरक्त त्वं ब्रह्म चिन्तय सम्यग् जानीहि । तर्हि कीदृशं ब्रह्मानन्तं देशकालवस्तुपरिच्छेदशून्यं यतोऽजरं देहधर्मजरादिविकारहीनमतएव परमं सर्वाधिष्ठानतया सर्वोत्कृष्टमतएव विशोकं शोकोपलक्षिता विद्या तत्कार्यरहितं तद्ब्रह्म विहाय किमेभिरसद्विकल्पैः देहेन्द्रियादिष्वात्मदृष्टया योगक्षेमार्थमत्संकल्पैः किं न किमपि सुखमस्ति । यस्मादस्य ब्रह्मानन्दस्यानुषङ्गिणः सम्बन्धिनः सन्त इमे भुवनाधिपत्यभोगादयो ब्रह्मेन्द्रादिसम्बन्धिसुखविशेषास्तत्साधनानि च कृपणलोकमताः विषयसुखेच्छया कृपणा दीनाः पामराः ये लोकास्तेषां मताः सत्यतयाऽभिमता भवन्ति । एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्तीति श्रुतेः । सच्चिदानन्दरूपं यत्तदन्तःकरणे यदि । आविर्भवेत् प्रियाः सर्वे तत्सम्पर्काद्भवन्ति वै ॥ १ ॥ वसन्ततिलकावृत्तमिदम् ॥ ७२ ॥

भा० टी०—हे विरक्त! तुम अनन्त, अजर, परमोत्कृष्ट, शोकरहित, ब्रह्मका चिन्तन करो । असद् विकल्पोंके करनेसे क्या लाभ है, पामरजनोंको भ्रमितकरनेवाले यह भुवनाधिपत्य भोगविलास आदि सब इसी परब्रह्मके आश्रितहैं॥७२॥

दोहा—ब्रह्म अखण्डानन्दपद सुमरत क्यों न निशंक ।
जाके छिन संसर्गसों लगत लोकपति रंक ॥ ७२ ॥

पातालमाविशसि यासि नभो विलंघ्य दिङ्मण्डलं भ्रमसि मानस चापलेन ॥ भ्रान्त्यापि जातु विमलं कथमात्मनीनं तद्ब्रह्म न स्मरसि निर्वृतिमेषि येन ॥ ७३ ॥

सं० टी०——मनःशान्त्यै [illegible] शिक्षयति । पातालमिति । हे चित्त ! [illegible] पातालमपि [illegible] प्रविशसि । कदाचित्त्वम् आकाशं विलंघ्य [illegible] दिगन्तरम् [illegible] । परन्तु [illegible] विस्मृत्यापि जातु कदाचिदात्मनि [illegible] [illegible] निर्वृत्तिं नित्यानन्दमपि प्राप्नोषी- [illegible] । [illegible] । यदि [illegible] भ्रमणं शान्तिमे- [illegible] ॥ ७३ ॥

भा० टी०——हे चित्त ! तूं अपनी चञ्चलताके वश पातालमें जाताहै, आकाशको फांदताहै, और सब दिशाओंमें भ्रमण करताहै, परन्तु भूलकरभी कभी हृदयमें स्थित विमल उस परब्रह्मका स्मरण नहींकरताहै कि जिसके स्मरण-मात्रसे तूं परमानन्दको प्राप्तहोसकताहै; बता इसका क्या कारण है ॥ ७३ ॥

कुण्डलिया——फांद्यौ तैं आकाशकों पैठ्यो तैं पाताल । दशों दिशामें तूं फिर्‍यौ ऐसी चंचल चाल ॥ ऐसी चंचल चाल इतै कबहू नहि आयौ । बुद्धिसदनको पाय पाय छिनहू न छुवा-यौ । देख्यौ नाहि निजरूप कूप अमृतको छांड्यौ । ऐरे मन मति-मूढ क्यों न भववारिधि फांद्यौ ॥ ७३ ॥

रात्रिः सैव पुनः स एव दिवसो मत्वा बुधा जन्तवो धाव-न्त्युद्यमिनस्तथैव निभृतप्रारब्धतत्तत्क्रियाः ॥ व्यापारैः पुन-रुक्तभुक्तविषयैरेवंविधेनामुना संसारेण कदर्थिताः कथमहो मोहान्न लज्जामहे ॥ ७४ ॥

सं० टी०——कस्यचित् संसारसम्बन्धिकव्यापारैः खिन्नपुरुषस्योक्तिः । रात्रिरिति । अहो इति दुःखे । अमुना एवंविधेन संसारेण कदर्थिता वयं मोहान्मौढ्यात् कथं न लज्जामहे । कैः व्यापारैः । किंभूतैः व्यापारैः । पुनरुक्तविषयैः पुनर्विहितानि पुनरुक्तानि यानि भुक्तानि भोजनानि अन्ये च विषयाः पुनः पुनरुक्तास्तैर्बुधाःपण्डिता जन्तवः प्राणिनः उद्यमिनः उद्यमवन्तो धावन्ति । किंभूता जन्तवः तथैव पुनः पुनर्निभृतप्रारब्धतत्तत्क्रियाः वारंवारं निभृताः प्रारब्धास्तत-त्क्रिया येस्ते । किं कृत्वा तां रात्रिं मत्वा । चान्यत् पुनस्तथैव दिवसं मत्वा ज्ञात्वा । यतः पुनरपि रजनी पुनरपि दिवसः पुनरपि पक्षः पुनरपि मासः ॥ पुनरपि सायं पुनरपि वर्षं पुनरपि वृद्धः पुनरपि याति समेति च कालः । एवंविधं कालस्य स्वरूपं ज्ञात्वा तस्मात् संसाराद्विरक्तिरेव न भवतीति व्रीडा । शार्दूलविक्रीडितं वृत्तमिदम् ॥ ७४ ॥

भा० टी०—वेहि रात्रि होतीहै, वेही दिन होतेह, यह जानकरभी बुद्धिमान मनुष्य उद्योग करतेहुए वारंवार कहे और भोगलिये विषय जिनके ऐसे अनेककार्यागारोसें पुनः पुनः आरंभकियी उन्ही २ क्रियाओंको करते जिस संसारमें डोलतेहैं; इस संसारकरके कदर्थनकियेहैं तौभी अपनी मूढताहेतुसें अहो आश्चर्य है कि हम लज्जित नहीं होतेहैं, और इस असारसंसारका परित्याग नहीं करतेहैं ॥ ७४ ॥

कुण्डलिया—वेही निशि वेही दिवस वेही तिथि वेही वार। वे उद्यम वेही क्रिया वेही विषयविकार। वेही विषयविकार सुनत देखत अरु सुंघत। वेही भोजन भोग जागि सोवत अरु ऊंघत। महा निलज यह जीव भोगमें भयौ विदेही। अजहूं पलटत नांहि कढत गुण वेके वेही ॥ ७४ ॥

मही[1] शिष्टा[2] शय्या[3] विपुलमुपधानं[5] भुजलता[4] वितानं[6] चाकाशं[7] व्यजनमनुकूलोऽयमनिलः[13][11][10][12] ॥ स्फुरद्दीपश्चन्द्रो[15][14] विरतिवनितासङ्गमुदितः[16] सुखं[22] शान्तः[19] शेते[23] मुनिरतनुभूतिर्नृपं[18][17] इव[20][21] ॥ ७५ ॥

सं० टी०—अधुना विरक्तस्य मुनेरैश्वर्येण राजतुल्यतां वर्णयति । महीति । मुनेः पृथिव्येव शिष्टा श्रेष्ठा शय्याऽस्ति। भुजलतैव विपुलमुत्तममुपधानमुपबर्हणं । आकाशमेव वितानमुपरितनावरकवस्त्रमण्डपः । अयमनुकूलोऽनिलो वायुर्व्यजनम् । चन्द्र एव स्फुरद्दीपः । विरतिः विरक्तिरेव वनिता स्त्री तस्याःसङ्गेन मुदितः आनन्दयुक्तः । एवंभूतो मुनिः शान्तःसन् सुखं शेते क इवातनुभूतिरतिसमृद्धो नृप इवेत्यर्थः । मह्यादि शय्यादि विना श्रमेण लब्ध्वा मुनिः शान्तमना वितृष्णः । शेते सुखं भूप इवाल्पबुद्धीः शिवं स्मरन्नष्टजगद्विमोहः ॥ १ ॥ शिखरिणीवृत्तमिदम् ॥ ७५ ॥

भा० टी०—पृथ्वीही जिसकी उत्तम शय्या है, भुजाही उत्तम तकिया हैं, आकाशही जिसका ओढनेका वस्त्र है, यह अनुकूल हवाही जिसका उत्तम पंखा है, चन्द्रमाही जिसका प्रकाशमान दीपक है, और विरतिही जिसकी स्त्री है, ऐसे प्रसन्नचित्त शान्त योगीश्वर अतिसमृद्धिमान् राजाओंकेसमान सुखपूर्वक शयन करतेहैं ॥ ७५ ॥

छप्पय—पृथ्वी परम पुनीत पलंग ताकौ मन मान्यौ। तकिया अपनौ हाथ गगनकौ तम्बू तान्यौ। सोहत चन्द चिराक वी-

जना करत दसोंदिसि । वानिता अपनी वृत्ति संगही रहत दिवसनिशि । अतुलित अपार सम्पति सहित सोहत हैं सुखमें मगन । मुनिराज महानृपराज ज्यों पौढे देखे हम दृगन ॥ ॥७५

त्रैलोक्याधिपतित्वमेवं विरसं यस्मिन्महाशासने तल्लब्ध्वासनवस्त्रमानघटने भोगे रतिं मा कृथाः ॥ भोगः कोऽपि स एक एव परमो नित्योदितो जृम्भते यत्स्वादाद्विरसा भवन्ति विषयास्त्रैलोक्यराज्यादयः ॥ ७६ ॥

